अथ

॥ श्री दुर्गा सप्तशती ॥

॥ षोडशांग चंडीपाठः ॥

द्वितीयावृत्तिः

॥ प्रस्तावना ॥

श्री दुर्गासप्तशतीनाम्ना कालांतरात्प्रचलितो चण्डीपाठो भारतीयसकलवर्णाश्रम संप्रदायाश्रितानां प्रजानां ऐहिकामुष्मिककल्याणकरः परमसाम्प्रदायिकमंत्रग्रन्थ इति सार्वजनीनं। अद्ययावत् मुद्रितेषु पुस्तकेषु उवाच—मंत्रार्धैश्च सप्तशतमंत्रसंख्या पूर्ति-र्विधीयते। इयमेव मंत्रसंख्यापूरकपद्धतिः सहस्रशो वर्षेभ्यो व्यवहृतैव। वर्षद्वयात्प्राक् ब्रह्मचारी लालबाबा दुधवावडी माउन्ट आबु इत्येतैः कस्माच्चित्प्राचीन पुस्तका-ल्लिखितांकृत्यैकं पुस्तकं अस्मत्सविधे प्रेषितं समवलोक्यास्य स्वरूपं मुद्रापयितुं समभूत्तीव्रा मनीषा। यतोऽत्र नोपलभ्यन्ते संख्यापूर्तिकरा मंत्रार्धा ये पूर्णश्लोकत्वेन परिगणिताः स्युः। उवाचेति शब्दानां मंत्रसंख्यात्वेन न गणना कृता चात्र। प्रचलित सप्तशतीपाठस्थाः सर्वेऽपि मंत्राश्चात्र विद्यन्ते तदुपरि अतिरिक्तैर्मंत्रैश्च सप्तशतसंख्या पूर्यते। अत्रत्यमंत्रसंख्यायाः प्रमाणतायां एतद्विषयविदुषां मान्त्रिकानामभिप्रायो निर्णायको भविष्यतीत्याशासे। उक्तब्रह्मचारिसकाशात् यानि प्राप्तान्यङ्गानि, विशिष्टा अस्मद्ग्रन्थ-भाण्डागारस्था विषयाश्च अनेन सहैव प्रकटयितुं योग्या इति मत्वा मुद्रापिताः।

एतत्पुस्तकं येषां तांत्रिकविदुषां हस्तगतं स्यात्तैः समालोच्यास्य स्वमत-प्रेषणेन कृतार्थीकरणीयोऽयं जनो येन तृतीयावृत्तौ संशोधनं शक्येत। इति शिवम्।

गोंडल वि. सं. २००१
श्रावण शुक्ल २ गुरौ

विदुषां वशंवदो वत्ससगोत्रीयो व्यासः
राजवैद्य जीवरामः कालिदासात्मजः शास्त्री

२

३

॥ प्रधानसंकल्पः १ ॥

ॐ श्रीगणेशाय नमः ॥ प्रथमं शुद्धः कृतनित्यक्रियः पुरुष आचामेत् । ॐ विष्णुर्विष्णुर्विष्णुः ॥ ॐ भूः ऐं आत्मतत्त्वं शोधयामि नमः स्वाहा ॥ ॐ भुवः ह्रीं विद्यातत्त्वं शोधयामि नमः स्वाहा ॥ ॐ स्वः क्लीं शिवतत्त्वं शोधयामि नमः स्वाहा ॥ ॐ ऐं ह्रीं क्लीं सर्वतत्त्वं शोधयामि नमः स्वाहा ॥ ततो गायत्र्या शिखाबंधनम् ॥ ततः सेकः ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥ ततः पृथ्वीशोधनम् ॥ कल्पितासनाधो जलादिना त्रिकोणं विलिख्य ॥ ॐ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्म्मो देवता आसने विनियोगः ॥ ततो ध्यानम् ॐ चतुर्भुजां शुक्लवर्णा कूर्म्मपृष्ठोपरि स्थिताम् ॥ प्रसन्नवदनां देवीं धरित्रीं प्रणमाम्यहम् ॥१॥ संकल्पः ॥ श्रीमन्महागणाधिपतये नमः ॥ इष्टदेवताभ्यो नमः ॥ कुलदेवताभ्यो नमः ॥ ग्रामदेवताभ्यो नमः ॥ स्थानदेवताभ्यो नमः ॥ वास्तुदेवताभ्यो नमः ॥ वाणीहिरण्यगर्भाभ्यां नमः ॥ श्रीलक्ष्मीनारायणाभ्यां नमः ॥ श्रीउमामहेश्वराभ्यां नमः ॥ शचीपुरंदराभ्यां नमः ॥ मातापितृचरणकमलाभ्यां नमोनमः ॥ सर्वेभ्यो देवेभ्यो नमः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमोनमः ॥ निर्विघ्नमस्तु ॥

सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ॥
लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥१॥

धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ॥
द्वादशैतानि नामानि यः पठेत् शृणुयादपि ॥२॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ॥
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥३॥
शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ॥
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशांतये ॥४॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ॥
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥५॥
सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥
शरण्ये त्र्यंबके गौरि नारायणि नमोस्तुते ॥६॥
सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् ॥
येषां हृदिस्थो भगवान्मंगलायतनो हरिः ॥७॥
तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव ॥
विद्याबलं दैवबलं तदेव लक्ष्मीपतेस्तेंऽघ्रियुगं स्मरामि ॥८॥
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥९॥

५

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥
तत्र श्रीर्विजयो भूतिर्ध्रुवाणीति मतिर्मम ॥१०॥
सर्वेष्वारंभकार्येषु त्रयस्त्रिभुवनेश्वराः ॥
देवा दिशंतु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥११॥
विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् ॥
सरस्वतीं प्रणम्यादौ सर्वकामार्थसिद्धये ॥१२॥

ॐ विष्णुर्विष्णुर्विष्णुः ॥ अद्य श्रीमत कस्यचित् सच्चिदानंदरूपस्य परब्रह्मणो निर्वाच्यमायाशक्तिविजृंभिताविद्यायोगात् कालकर्मस्वभावाविर्भूतमहत्तत्वोदिताहंकारतृतीयोद्भूतवियदादिपंचकर्मेंद्रियदेवतानिर्मितांडकटाहे चतुर्दशलोकात्मके लीलया तन्मध्यवर्तिश्रीमद्भगवतः श्रीनारायणस्य नाभिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धरणाय च प्रजापतिप्रार्थितस्य महापुरुषस्य सितवराहावतारेण ध्रियमाणायामस्यां धरित्र्यां भूर्लोकसंज्ञितायां सप्तद्वीपमंडितायां क्षीरोदाद्यब्धिद्विगुण द्वीपवलयीकृतलक्षयोजनविस्तीर्णे जंबुद्वीपे स्वर्गस्थितामराद्याशासिते गंगादिसरिद्भिः पाविते भारते वर्षे निखिलजनपावनशौनकादिमुनिकृतनिवसतिके नैमिषारण्ये कुमारिसौराष्ट्रमंडले रेवाया उत्तरे तीरे प्रभासान्तवर्तिवस्त्रापथक्षेत्रे श्रीभगवतो मार्तंडस्य कृपापात्रकालत्रयज्ञगर्गवराहाचार्यादिगणितायां संख्यायां श्रीब्रह्मणो द्वितीये परार्द्धे

कर्मारंभः प्रधान संकल्पः १

श्रीश्वेतवाराहकल्पे चतुर्दश मन्वंतराणां मध्ये आदिभूते सप्तकल्पानां मध्ये वैवस्वतमन्वंतरे श्रीविष्णोर्बुद्धावतारे युगानां त्रिचत्वे गते अष्टाविंशतितमे कलियुगे प्रथमचरणे श्रीमन्नृप विक्रमार्क समयातीतसंवत्सराणां व्यतिक्रांतानामेकोनविंशतिशतानामुपरि व्युत्क्रममाणे अमुकाब्दे अमुकसंवत्सरे अमुकराशिगते श्रीसूर्ये अमुकायने गते श्रीसूर्ये अमुक ऋतौ मासे पक्षे तिथौ वासरे नक्षत्रे योगे करणे चंद्रे सवितरि देवगुरौ शेषेषु ग्रहेषु यथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषणविशिष्टायां शुभपुण्यतिथौ पुण्ये देशे काले च शतशतगुणीकृतज्योतिष्टोमातिरात्रजन्मफलप्राप्तिकामोऽहं अमुक गोत्रप्रवरवेदशाखाध्यायिनः अमुकशर्मणः ममात्मनः एतज्जन्मजन्मांतरीय चतुर्विध कायिक वाचिक मानसिक सांसर्गिक सर्वपापक्षयपूर्वकं दीर्घायुर्विपुलधनधान्यपुत्रपौत्राद्यविच्छिन्न संततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टचतुर्विधपुरुषार्थ सिद्ध्यर्थं महाकाली महालक्ष्मी महासरस्वती देवताप्रीत्यर्थं षोडशाङ्गदुर्गापाठांगभूतं कवचार्गलाकीलक पठनैकादशन्यासपूर्वकं नवार्णमंत्राष्टोत्तरशतजपरात्रिसूक्तादिपठन पूर्वकं देवीसूक्त पठननवार्णमंत्राष्टोत्तर शतजपरहस्यत्रयपठनांतं संकलितायाः अथवा अमुकमंत्रपल्लवितायाः अथवा अमुकमंत्रसंपुटितायाः श्रीचंडी दुर्गासप्तशत्याः नवचंड्यात्मकं अथवा विशेषचंड्यात्मकं सहोमं पाठं करिष्ये ॥ इति प्रधानसंकल्पः ॥

ततो नित्यसंकल्पः॥ यथापूर्वसंकलितशतचंडी संख्यापरिपूर्तये नवचंड्यां नव-

चंडीसंख्यापरिपूर्त्यर्थं पूर्वसंकल्पितरीत्या पाठाख्यं कर्म करिष्ये ॥ तदंगत्वेनादौ संक्षेपतः आसनविधिः भूशुद्धिभूतशुद्ध्यादि कर्म दीपस्थापनं पूजनं सप्तशती पूजनं ॥ रहस्योक्तं यंत्रस्थप्रधानदेवतापूजनं ॥ तंत्रोक्तनवार्णयंत्रयंत्रस्थप्रधानदेवता-पूजनं पायसेन इक्षुखंडकूष्मांडाद्यन्यतमफलेन वा पूजांगबलिदानं च ॥ सकल शाप प्रतिबंधनिवृत्तये तंत्रोक्तशापोद्धारमंत्रस्य सप्तवारजपं इष्टफलसिद्धि प्रतिबंधनिवृत्तये तंत्रोक्तोत्कीलनमंत्रस्य पाठादौ पाठांते च एकविंशत्येकविंशतिसंख्याजपं च करिष्ये आदौ निर्विघ्नतासिद्ध्यर्थं महागणपतिस्मरणं गुरुपादुकास्मरणं च करिष्ये ॥

आवाहनं ॥ ॐ आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ॥ पृथिवी लोक दत्तासि काश्यपेनाभिवंदिते । ॐ ह्रीं आधारशक्ति कमलासनाय नमः ॥ ॐ पृथिव्यै नमः इतिमंत्रेण संपूज्य ततः प्रणमेत् ॥ ॐ उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ दंष्ट्राग्रैर्लीलया देवि यज्ञार्थं प्रणमाम्यहम् ॥१॥ ततः वरप्रार्थना ॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुनोद्धृता ॥ त्वं च धारय मां नित्यं पवित्रं कुरु चासनं ॥ इत्यासनशोधनम् ॥ अथ विघ्नोत्सारणं आत्मरक्षणं च ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे ॥ दिव्यदृष्ट्यवलोकनेन दिव्यान् विघ्नानुत्सारयामि ॥ ॐ फडिति वामपादपार्ष्णिघातेन भौमान् विघ्नानुत्सारयामि ॥ ॐ अस्त्राय फट् इति तालत्रयेण दिग्बंधनं कुर्यात् ॥

॥ दीपस्थापनं ॥ २ ॥

कर्मसाक्षित्वेन दीपस्थापनं ॥ मूलेनाचम्य ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे प्राणानायम्य प्रणवेन पूरकं द्वात्रिंशता ३२ ॥ कुंभकं चतुःषष्ट्या ६४ ॥ रेचकं षोडशसंख्यया १६ ॥ तत्र दीपाधारयंत्रं गंधेन देवीदक्षिणतस्त्रिकोणं विलिख्य ॥ ॐ दीपाधारयंत्राय नमः इति संपूज्य ॥ तदुपरि दीपं संस्थाप्य ॥ गंधादिना संपूज्य ॥ प्रार्थयेत ॥ ॐ भो दीप देवीरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत यावत्कर्मसमाप्तिः स्यात् तावत्त्वं सुस्थिरो भव ॥१॥ घृतदीपा भवेद्दक्षे तैलदीपस्तु वामतः ॥ ततो दीपप्रार्थना ॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्योज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ अग्निर्वर्च्चो ज्योतिर्वर्च्चः स्वाहा सूर्यो वर्च्चो ज्योतिर्वर्च्चः स्वाहा ॥ ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥१॥ (यजु० अ० ३ मं ९) ततः

॥ अथ मालापूजनम् ३ ॥

माले माले महामाले सर्वतत्त्वस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ ॐ ह्रीं मालायै नमः मालां दक्षिणकरे निधाय हृत्प्रदेशे समानीय शिरसि धृत्वा ततः पात्रे धृत्वा गंधादिभिः संपूज्य प्रार्थयेत ॥ त्वं माले सर्वभूतानां सर्वलोकप्रिया मता ॥ शिवं कुरुष्व मे भद्रे यशोवीर्यं च देहि मे ॥ ॐ ह्रीं सिद्ध्यै नमः ॥ ततः नवार्णन्यासः ॥

अष्टोत्तरसंख्यया मंत्रराजं जपेत ॥ ऐं ह्रीं क्लीं चामुंडायै विच्चे ॥ जपान्ते पुनः ॥ ॐ ह्रीं मालायै नमः इति संपूज्य ॥ त्वं माले सर्वदेवानां सर्वसिद्धिप्रदा मता ॥ तेन सत्येन मे सिद्धिं देहि मातर्नमोस्तुते ॥१॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥२॥

॥ अथ पुस्तक पूजनम् ४ ॥

मूलेनाचम्य प्राणायामं कृत्वा ॥ निध्यायुलिख्य ॥ श्रीमहाकाली महालक्ष्मी महासरस्वतीप्रीतये षोडशांगसहितसप्तशतीपाठांगपुस्तकपूजनमहंकरिष्ये निर्विघ्नता सिध्यर्थं ॐगणानान्त्वा गणपति ० ० हवामहे प्रियाणान्त्वा प्रियपति ० ० हवामहे निधीनान्त्वा निधिपति ० ० हवामहे वसो मम आहमजानिगर्भधमात्वमजासिगर्भधम ॥१॥ इति स्मृत्वा पूजयेत् ॥ ॐ ह्रीं ग्लौंगं गणपतये नमः ॥ ॐ ह्रीं क्षां क्षौं क्षेत्रपालाय नमः ॥ इति मंत्राभ्यां पुस्तकाग्रे द्वारदेवते संपूज्य ॥ ॐ ह्रीं तीक्ष्णशृंगाय महिषाय नमः ॥ ॐ ह्रीं वनस्पतिपुत्राय सिंहाय नमः ॥ ॐ ह्रीं गुरुपादुकाभ्यां नमः ॥ ॐ ह्रीं ब्रह्मणे नमः ॥ ॐ ह्रीं विष्णवे नमः ॥ ॐ ह्रीं रुद्राय नमः ॥ ॐ ह्रीं ब्राह्म्यै नमः ॥ ॐ ह्रीं माहेश्वर्यै नमः ॥ ॐ ह्रीं कौमार्यै नमः ॥ ॐ ह्रीं वैष्णव्यै नमः ॥ ॐ ह्रीं वाराह्यै नमः ॥ ॐ ह्रीं नारसिंह्यै नमः ॥ ॐ ह्रीं चामुंडायै नमः ॥ ॐ ह्रीं चंडीकायै नमः ॥ ॐ ह्रीं चंडमूर्त्यै नमः ॥ ॐ ह्रीं दुर्गायै नमः ॥ ॐ ह्रीं कात्यायन्यै नमः ॥ ॐ ह्रीं महाकाल्यै नमः ॥ ॐ ह्रीं महालक्ष्म्यै नमः ॥ ॐ ह्रीं महासरस्वत्यै नमः ॥ ॐ

ह्रीं पिशाचिकिरिकिरि त्रिशूलखड्गहस्ते सिंहारूढे एह्येहि आगच्छ मम पूजां गृहाण गृहाण स्वाहा सिद्धिं कुरुकुरु चंडिकायै नमः ॥ ॐ ह्रीं विन्ध्यवासिन्यै नमः ॥ ॐ ह्रीं रक्तदंतिकायै नमः ॥ ॐ ह्रीं शताक्ष्यै नमः ॥ ॐ ह्रीं शाकंभर्यै नमः ॥ ॐ ह्रीं दुर्गायै नमः ॥ ॐ ह्रीं भीमायै नमः ॥ ॐ ह्रीं भ्रामर्यै नमः ॥

॥ कन्यापूजनं ५ ॥

ॐ मंत्राक्षरमयीं लक्ष्मीं मातृकारूपधारिणीम् ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥१॥ ॐ कल्याणीं जननीं सत्यां कामदां करुणाकराम् ॥ अनंतशक्तिसंपन्नां दुर्गामावाहयाम्यहम् ॥२॥

अदित्यैरास्नासीन्द्राण्याऽउष्णीषः ॥ पूषासिघर्म्मायदीष्व ॥१॥ ऐंद्र्यै नमः॥

अम्बेऽअम्बिकेम्बालिके नमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥२॥ कौमार्यै नमः

इंद्रायाहिधियेषितोविप्रजूतः सुतावतः ॥ उपब्रह्माणिवाघतः ॥३॥ ब्राह्म्यै नमः॥

इन्द्रस्यक्रोडोदित्यैपाजस्यन्दिशाजत्रवोदित्यैभसञ्जीमूतान्हृदयौपशेनान्तरिक्षम्पुरीतता नभऽउदर्य्येणचक्रवाकौमतस्नाभ्यान्दिवंवृक्काभ्याङ्गिरीन्प्लाशिभिरुपलान्प्लीह्नावल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिःस्रवन्तीर्ह्रदान्कुक्षिभ्यांसमुद्रमुदरेणवैश्वानरम्भस्मना ॥४॥ वाराह्यै नमः ॥

ॐ प्राणायस्वाहापानायस्वाहाव्यानायस्वाहा ॥ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकःसुभद्रिकांकाम्पीलवासिनीम् ॥५॥ दुर्गायैनमः

आप्यायस्वसमेतुतेविश्वत—सोमवृष्ण्यम् ॥ भवाव्वाजस्यसङ्गथे ॥ ६ ॥ वायव्यै नमः ॥

यातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥७॥ माहेश्वर्यै नमः ॥

समकृत्ये देव्व्याधियासन्दक्षिणयोरुचक्षसा ॥ मासऽआयःप्रमोपोर्मोऽअहन्तवव्वीरंविदेयतवदेविसन्दृशि ॥८॥ विनायक्यै नमः ॥

पावकानः सरस्वतीव्वाजेभिर्व्वाजिनीवति ॥ यज्ञं व्वष्टुधियावसुः ॥ ९ ॥ ईशान्यै नमः ॥

॥ अथ भूशुद्धिः ६ ॥

आचम्य गायत्र्या प्राणानायम्य ॥ हुं इति बीजेन कुंडलिनीमुत्थाप्य हृदिस्थं दीपकलिकाकारं जीवं ॐ हंसः इतिमंत्रेण ब्रह्मणि संयोज्य ॥ ब्रह्मरंध्रगते चंद्रमंडलेऽमृतवर्षिणीं॥ भवानीं भूमिशुद्ध्यर्थं भावयेदमृतेश्वरीम् ॥ ततस्तन्मौलिनिष्पंदसुधाकल्लोलवृष्टिभिः ॥ नितयेन्मनसास्मानं भूमिशुद्धिरियं भवेत ॥ अद्यपूर्वो० तिथौ भगवती प्रीत्यर्थं भूशुद्धिं करिष्ये इति संकल्पः ॥ दक्षिणे ॐ सरस्वत्यै नमः शंखनिधये

नमः । वामभागे लक्ष्म्यै नमः पद्मनिधये नमः । आसनम ॥ पृथ्वीति० ॥ पृथ्वित्वया० प्रार्थना । ॐ विश्वशक्त्यै नमः । ॐ मायाशक्त्यै नमः । ॐकूर्मासनाय नमः । ॐयोगासनाय नमः । ॐअनंतासनाय नमः ॥ ॐविमलासनाय नमः ॥ मध्येपरमसुखासनायनमः ॐभूर्भुवः स्वः आत्मासनाय नमः । पुष्पादिना आत्मनः आसनदानम ॥ शिखाबंधनम ॥ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने ॥ तिष्ठ देवि शिखामध्ये चामुंडे चापराजिते । विष्णोर्नामसहस्राणि शिखाबंधं करोम्यहम ॥ दिग्बंधः ॥ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ॥ ये भूता विघ्नकर्त्तारस्ते नश्यंतु शिवाज्ञया ॥१॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशम । सर्वेषामविरोधेन जपकर्म्म समारभे ॥ मूलमंत्रेण दिव्यदृष्ट्यवलोकनेन विघ्नानुत्सारयामि ॥ भूमौ वामपादेन पार्ष्णिना घातत्रयेण भौमान्विघ्नानुत्सारयामि ॥ तालत्रयेण ॥ ॐ सर्वभूतनिवारकाय शार्ङ्गाय सशराय सुदर्शनायाऽस्त्रराजाय हुंफट् स्वाहा ॥ स्वपरितः सर्वदिक्षु अस्त्रमुद्रां प्रदर्शयेत् ॥ स्वदक्षिणभागे ॐ गुरुभ्यो नमः । ॐ परमगुरुभ्यो नमः ॥ ॐ परमेष्ठिगुरुभ्यो नमः ॥ परात्परगुरुभ्यो नमः । ॐ पूर्वसिद्धेभ्यो नमः । ॐ आचार्येभ्यो नमः ॥ स्ववामभागे ॐ श्रीगणेशाय नमः । ॐ दुर्गायै नमः । ॐ क्षेत्रपालाय नमः । ॐ योगिनीभ्यो नमः ॥ भूरसीत्यस्य प्रजापतिर्ऋषिः मातृका देवता प्रस्तारपंक्तिश्छंदः भूशुद्धौ विनियोगः ॥ भूमौ हस्तौ कृत्वा ब्रूयात ॥ ॐ भूरसि भूमिरस्यदितिरसि विश्वध-

भायाविश्वस्य भुवनस्य धर्त्री ॥ पृथिवींयच्छपृथिवीन्द ०‿० हपृथिवीन्माहि ०‿०
सीः ॥१॥ इतिभूशुद्धिः ॥

अथ भैरव नमस्कारः॥यो भूतानामित्यस्य कौण्डिन्य ऋषिः नारायणो देवता अनुष्टुप् छंदः भैरवनमस्कारे विनियोगः॥तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम ॥ भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि॥१॥ ॐ यो भूतानामधिपतिर्यस्मिँल्लोकाऽअधिश्रिताः। यऽईशे महतो महांरस्तेन गृह्णामित्वामहम्मयिगृह्णामित्वामहम ॥१॥

॥ अथ भूतशुद्धिः ॥७॥

आचम्य प्राणानायम्य ॥ मूलाधारात्समुत्थाप्य कुंडलीं परदेवताम । सुषुम्णामार्गमाश्रित्य ब्रह्मरंध्रगतां स्मरेत् ॥ जीवं ब्रह्मणि संयोज्य हंसमंत्रेण साधकः ॥१॥ अथ भूतोपसंहारः आदौ भूतध्यानं ॥ पादादिजानुपर्यंतं पृथ्वीस्थानम् तत्र पार्थिवमंडलं चतुरस्रं वज्रलांछितं तन्मध्ये पीतवर्णं लं बीजयुक्तं पंचगुणं ध्यायेत्। ॐ लं पृथिव्या अधिपतये निवृत्तिकलात्मने ॐ हुं फट् स्वाहा ॥ ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्मसप्रथाः ॥१॥ लं भूम्यै नमः ॥ पृथ्वीं अप्सु प्रविलापयामि ॥१॥

जान्वादिनाभिपर्यंतं आपः स्थानं तत्र वारुणं मंडलं धनुराकारं उभयोः कोट्योः श्वेतपद्मलांछितं तन्मध्ये श्वेतवर्णं वं बीजयुक्तं चतुर्गुणं ध्यायेत ॥ वं विष्णवे प्रतिष्ठाकलात्मने ॐ फट् स्वाहा॥ ॐतत्त्वायामि ब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥

अहेडमानोव्वरुणेहबोद्ध्युरुश ०‿० समानऽआयुःप्प्रमोषीः ॥२॥ आपोऽग्नौ प्रविलापयामि॥

नाभ्यादि हृदयपर्यंतं अग्निस्थानं वह्निमंडलं त्रिकोणं स्वस्तिकलांछितं तन्मध्ये रक्तवर्णं रंबीजयुक्तं त्रिगुणं ध्यायेत् ॥ ॐ अग्निं दूतं पुरोदधेहव्यवाहमुपब्ब्रुवे ॥ देवाँऽ आसादयादिह ॥३॥ रं रुद्राय विद्याकलात्मने हुं फट् स्वाहा। अग्निं वायौ प्रविलापयामि ॥

हृदयादि भ्रूमध्यपर्यंतं वायुमंडलं षट्कोणं षट्बिंदुलाञ्छितं तन्मध्ये धूम्रवर्णं यं बीजयुक्तं द्विगुणं ध्यायेत् ॥ वायवे ईशानाय शांतिकलात्मने हुंफट् स्वाहा ॥ वायुं आकाशे प्रविलापयामि ॥ ॐआनोनियुद्भिःशतिनोभिरध्वर ०‿० सहस्त्रिणीभिरुपयाहियज्ञम् ॥ व्वायोऽअस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदानः॥४॥

भ्रूमध्यादिब्रह्मरंध्रपर्यंतं आकाशमंडलं वर्तुलाकारं ध्वजलांच्छितं तन्मध्ये नीलवर्णं हंबीजयुक्तं एकगुणं ध्यायेत् ॥ हं सदाशिवाय शांत्यतीताय कलात्मने हुंफट् स्वाहा ॥ आकाशं अहंकारे प्रविलापयामि ॥ ॐयावाङ्कशामधुमत्यश्श्विनासूनृतावती ॥ तया यज्ञम्मिमिक्षतम् ॥ उपयामगृहीतोस्यश्श्विभ्यान्त्वैषतेयोनिर्म्माद्ध्वीभ्यान्त्वा ॥५॥

पृथ्वीं पंचगुणां लंबीजेन षड्डुद्धातप्रयोगेणाप्सु प्रविलापयामि ॥ लं ६ चतुर्गुणा अपः वंबीजेन पंचोद्धातप्रयोगेणाग्नौ प्रविलापयामि॥ वं ५ त्रिगुणं वह्निं रं बीजेन चतुरुद्धात प्रयोगेण वायौ प्रविलापयामि ॥ रं ४ द्विगुणं वायुं यं बीजेन त्रिरुद्धातप्रयोगेणाऽऽकाशे प्रविलापयामि ॥ यं ३ एकगुणमाकाशं हं बीजेन द्विरुद्धातप्रयोगेणाहंकारे प्रविलापयामि ॥

Scanned with OKEN Scanner

१५

अहंकारं महत्तत्वे प्रविलापयामि ॥ महत्तत्वं प्रकृतौ प्रविलापयामि ॥ प्रकृतिं पुरुषे प्रविलापयामि ॥ ॥ पुरुषं परब्रह्मणि प्रविलापयामि एवं प्रविलाप्य ॥

अहं देहो न चान्योस्मि ब्रह्मैवाहं न शोकभाक् ॥
सच्चिदानंदरूपोहं निर्विकल्पस्वभाववान् ॥१॥ इति आत्मानं विभाव्य ॥

केवलदेहे पापपुरुषं ध्यायेत् ॥ अथ पापपुरुषध्यानं ॥

शुद्धसच्चिन्मयो भूत्वा चिंतयेत् पापपूरुषम् ॥
वामकुक्षिस्थितं कृष्णमङ्गुष्ठपरिमाणकम् ॥२॥

हस्ते जलमादाय यं इति वायुबीजस्य किष्किंध ऋषिः जगती छंदः वायुर्देवता ॥ रं इति अग्निबीजस्य कश्यप ऋषिः त्रिष्टुप्छंदः अग्निर्देवता ॥ यं इति वायुबीजस्य किष्किंध ऋषिः जगतीच्छंदः वायुर्देवता पापपुरुषस्य शोषणे दहने भस्मरेचने विनियोगः ॥ यँ इति वायुबीजेन पूरकेण १६ जपित्वा तदुत्थितवायुना पापपुरुषं शोषितं विभावयेत् ॥ रँ इति वन्हिबीजं कुंभकेन ६४ चतुःषष्ठीवारं जपित्वा तदुत्थिताग्निना तद्भस्मीभूतं विभावयेत् ॥ रेचकेन द्वात्रिंशद्वारं जपित्वा पापपुरुषभस्म रेचयेत् ॥

पुनः जलमादाय वं इति वरुणबीजस्य हिरण्यगर्भ ऋषिः त्रिष्टुप्छंदः वरुणो देवता ॥ लं इति पृथ्वीबीजस्य ब्रह्मा ऋषिः गायत्रीच्छंदः पृथ्वी देवता ॥ हं इति आकाशबीजस्य शिव ऋषिः अव्यक्ता गायत्रीच्छंदः परमशिवो देवता पापपुरुषस्य भस्मप्लावने

भस्मकठिनीकरणे अंगानामुत्पादने च विनियोगः ॥

॥ वं इति सुधाबीजं पूरकेन षोडशवारं (१६) जपित्वा तद्बीजेन भस्म संप्लावयेत् ॥ लं इति भूबीजं कुंभकेन चतुः षष्ठीवारं (६४) जपित्वा तद्बीजोत्थकाठिन्यकरणे तनुःदृढीभूतं भावयेत् ॥ हं इति आकाशबीजं रेचकेन द्वात्रिंशद्वारं (३२) जपित्वा तद्बीजेन मूर्द्धादिपादपर्यंतान्यङ्गानि विभावयेत ॥

एवं शरीरं विचिन्त्य परमात्मनः सृष्टिक्रमेण तत्वानि स्वस्वस्थाने स्थापयेत् ॥

यथा परब्रह्मणः सकाशात् प्रकृतिस्वरूपा माया प्रादुर्भूता । प्रकृतेः महत्तत्वं । महत्तत्वादहंकारः । अहंकारादाकाशः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्यः अन्नं ॥ अन्नाद्रेतः । रेतसः पुरुषः । स वा एष पुरुषो अन्नमयः । हंसः सोहम् ॥

कुंडलीजीवमादाय परसंगात्सुधामयं ॥ संस्थाप्य हृदयांभोजे मूलाधारगतं स्मरेत् ॥१॥

एवं स्वशरीरं पुनरुत्पन्नं तेजोमयं पुण्यात्मकं सकलपुरुषार्थसाधकं निरस्तकिल्बिषं देवताराधनयोग्यं विभावयेत् ॥ इति भूतशुद्धिः ॥

॥ अथ प्राणप्रतिष्ठा ॥ ८ ॥

आचम्य प्राणानायम्य हस्ते जलमादाय अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामानि छन्दांसि । जगत्सृष्टिकारिणी प्राणशक्तिर्देवता ।

आं बीजं। ह्रीं शक्तिः। क्रौं कीलकं। मम प्राणप्रतिष्ठापने विनियोगः ॥ अथ न्यासाः ॥ ॐ ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः शिरसि। ॐऋग्यजुःसामच्छंदोभ्यो नमः मुखे। ॐ जगत्स्रष्ट्र्यै प्राणशक्तिदेवतायै नमः हृदये। ॐआं बीजाय नमः लिङ्गे। ॐ ह्रींशक्त्यै नमः पादयोः। ॐक्रौं कीलकाय नमः सर्वांगे ॥ अथ षडङ्गन्यासाः ॥

ॐ अं कं खं गं घं ङं आँ पृथिव्यप्तेजोवाय्वाकाशात्मने अङ्गुष्ठाभ्यां नमः हृदयाय नमः ॥ ॐ इं चं छं जं झं ञं ई शब्द स्पर्श रूप रस गंधात्मने तर्जनीभ्यां नमः शिरसे स्वाहा ॥ ॐ उं टं ठं डं ढं णं ऊं त्वक् चक्षुर्जिह्वा घ्राणात्मने मध्यमाभ्यां नमः शिखायै वषट् ॥ ॐ एं तं थं दं धं नं ऐं वाक् पाणि पादपायूपस्थात्मने अनामिकाभ्यां नमः कवचाय हूं ॥ ॐ ओं पं फं बं भं मं औं वचनादान गति विसर्गानन्दात्मने कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट् ॥ ॐ अं यं रं लं वं शं षं सं अः मनोबुद्ध्यहंकारचित्तविज्ञानात्मने करतलकरपृष्ठाभ्यां नमः अस्त्राय फट् ॥ ततः ॐ आं नमः नाभ्यादि पादपर्यंतं। ॐ ह्रीं नमः हृदयादिनाभ्यंतं ॥ ॐ क्रौं नमः भ्रूमध्यादिहृदयान्तं विन्यसेत ॥ हृदये सप्तधातुन्विन्यसेत् ॥ तद्यथा ॥ ॐ यं त्वगात्मने नमः। ॐ लं मांसात्मने नमः। ॐ वं मेदसात्मने नमः। ॐ शं अस्थ्यात्मने नमः। ॐ षं मज्जात्मने नमः। ॐ सं शुक्रात्मने नमः। ॐ हां ओजसात्मने नमः। ॐ हं प्राणात्मने नमः। ॐ सं जीवात्मने नमः इति हृदये विन्यस्य ॥

ॐ अं नमः । ॐ आं नमः । इं नमः इत्यारभ्य ॐ क्षं नमः इत्यंतं व्यापकं कुर्यात् ॥
ततः स्वहृदि मंडूकाय नमः । कालाग्निरुद्राय नमः इत्यादि पीठशक्तिं संपूज्य ध्यायेत

रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पंच बाणान् ॥
बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥१॥

इति ध्यात्वा मानसोपचारैः संपूज्य । सुमुख वृत्त चतुरस्त्र गोक्षुर योनिमुद्रां प्रदर्शयेत् ॥ ततो हृदि ज्ञानमुद्रया हस्तं दत्वा प्राणस्थापनं कुर्यात् तद्यथा ॥

ॐ आं ह्रीं क्रों यंरंलंवंशंषंसं हंसः सोहम् प्राणा इह प्राणाः ॥
ॐ आं ह्रीं क्रों यंरंलंवंशंषंसं हंसः सोऽहम जीव इह स्थितः ॥
ॐ आं ह्रीं क्रों यंरंलंवंशंषंसं हंसः सोऽहम सर्वेंद्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानीहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥
ॐ ह्रीं क्षं लं हं सं ह्रीं ह्रीं इति प्राणप्रतिष्ठामंत्रं त्रिवारं पठेत ॥

पंचदशसंस्कारसिद्धयर्थं ॐ ॐ ॐ इत्थं पंचदशवारं प्रणवं जपेत ॥ अनेन मम देहस्य पंचदशसंस्कारा संपद्यंताम ॥ अयं देहः सर्वकर्मारंभयोग्यो जात इति भावयेत् ॥ ज्योतिर्मयं स्वशरीरं च भावयेत ॥ प्राणायामं कुर्यात् ॥ अकारादि-

षोडश स्वरानुचार्य वामनासिकया वायुं पुरयेत ॥ ककारादिपंचविंशति वर्णानुच्चार्य कुंभकेन वायुं स्थिरीकुर्यात् ॥ यकारादि क्षकारान्तान्वर्णानुचार्य वायुं रेचयेत् ॥ एवं प्राणायामत्रयं कुर्यात् ॥

यथा पर्वतधातूनां दोषं दहति पावकः ॥
एवमंतर्गतं पापं प्राणायामेन दह्यते ॥१॥

॥ इति तांत्रिक प्राणप्रतिष्ठा ॥

॥ अथ वैदिक प्राणप्रतिष्ठा ॥ १ ॥

अयम्पुरोभुवस्तस्यप्प्राणोभौवायनोव्वसन्तःप्प्राणायनोगायत्रीव्वासन्तीगायत्र्यै-गायत्त्रङ्गायत्त्रादुपा ॰ शुरुपा ॰ त्रोस्तित्रवृत्त्रिवृतोरथन्तरंव्वसिष्ठऋषि÷प्र-जापतिगृहीतयात्त्वयाप्प्राणङ्गृह्णामिप्प्रजाब्भ्य÷ ॥१॥

अयन्दक्षिणाव्विश्श्वकर्म्मातस्यमनोव्वैश्वकर्म्मणङ्ग्रीष्मोमानसस्त्रिष्टुब्ग्रैष्मी-त्रिष्टुभ÷स्वार ॰ स्वारादन्तर्य्यामोन्तर्य्यामात्पञ्चदशःपञ्चदशाद्बृहद्भरद्वाजऋषि÷प्प्रजापतिगृहीतयात्त्वयामनोगृह्णामिप्प्रजाब्भ्य÷ ॥२॥

अयम्पश्चाद्विश्श्वव्यचास्तस्यचक्षुर्वैश्श्वव्यचसंव्वर्षाश्चाक्षुष्याजगतीवार्षीजग-त्त्याऽऋक्समम्नृक्समाच्छुक्रःशुक्रात्सप्तदशःसप्तदशाद्वैरूपञ्जमदग्निर्ऋषि÷प्र-जापतिगृहीतयात्त्वयाचक्षुर्गृह्णामिप्प्रजाब्भ्य÷ ॥३॥

कर्मारंभः योगिनी नामानि १०

इदमुत्तरात्स्वस्तस्यश्श्रोत्र ०‿० सौव ०‿० शरच्छ्रोत्यनुष्टुप्शारद्यनुष्टुभऽऐडमैडान्मन्थीमन्थिनऽएकवि ०‿० शऽएकवि ०‿० शाद्वैराजंविश्श्वामित्रऽऋषि÷प्रजापतिगृहीतयात्वयाश्श्रोत्रङ्गृह्णामिप्प्रजाब्भ्य÷ ॥४॥

इयमुपरिमतिस्तस्यैवाङ्ग्वात्याहेमन्तोवाच्च्यःपङ्क्तिर्हैमन्तीपङ्क्त्यैनिधनवन्निधनवतऽआग्ग्रयणऽआग्ग्रयणात्त्रिणवत्त्रयस्त्रि ०‿० शौत्रिणवत्त्रयस्त्रि ०‿० शाभ्या ०‿० शा ०‿० कूकर रैवतेविश्श्वकर्म्मऽऋषि÷प्रजापतिगृहीतयात्वयावाचङ्गृह्णामिप्प्रजाब्भ्यो लोकन्ताऽइन्द्रम् ॥ लोकम्पृणच्छिद्रम्पृणाथोसीदध्रुवात्वम्॥ इन्द्राग्नीत्वाबृहस्पतिरस्मिन्न्योनावसीषदन् ॥ १ ॥ ताऽअस्यसूददोहसःसोम ०‿० श्रीणन्तिपृश्नयः । जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः॥२॥ इन्द्रंविश्श्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिर÷ ॥ रथीतमरथीनांवाजाना ०‿० सत्पतिम्पतिम् ॥३॥ ॥५॥

प्राणायस्वाहापानायस्वाहाव्व्यानायस्वाहा ॥ अम्बेऽअम्बिकेम्बालिकेनमानयति कश्चन ॥ ससस्त्यश्श्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ॥६॥

॥ अथ योगिनीनामानि ॥ १० ॥

दिव्ययोगी महायोगी सिद्धयोगी गणेश्वरी। प्रेताशी डाकिनी काली कालरात्रिर्निशाचरी ॥१॥
जृंभिणयुद्धवैताली ह्रींकारी भूतडंबरी। ऊर्ध्वकेशी विरूपाक्षी शुष्कांगी नरभोजनी ॥२॥
राक्षसी घोररक्ताक्षी विश्वरूपा भयंकरी। वीराकौमारी चामुंडा वाराही मुंडधारिणी ॥३॥

भासुरी रक्तवैताली भ्रामरी त्रिपुरांतकी। भैरवी ध्वंसिनी क्रोधी दुर्मुखी प्रेतवाहिनी॥४॥
खट्वांगी दीर्घलंबोष्ठी मालिनी मंत्रयोगिनी। कालाग्नी ग्रामणी चक्री कंकाली भुवनेश्वरी ५
फट्कारी वीरभद्रेशी धूम्राक्षी कलहप्रिया। कंटकी नाटकीमाया यमदूती करालिनी।६।
खेटकी मर्दिनीयक्षी कामराजप्रचारिणी। सहस्राक्षी कामलोभा कामदंडाद्यघोमुखी।७।
धूर्जटी विकटी घोरा कपाली विषलंघिनी। चतुःषष्टिःसमाख्याता योगिन्यो वरसिद्धये।८।
नित्यं स्मरणमात्रेण सर्वपापक्षयो भवेत्।इति चतुःषष्टियोगिनीनामानि ॥

॥ अथ दशावरणदेवता यंत्रं ॥११॥

ॐ गौर्यासह रुद्रायनमः ५	ॐ स्वरयासह विरिंचये नमः ४	ॐ लक्ष्म्या सह हृषीकेशाय नमः ६	
ॐ ऐंमहाकाल्यै नमः १	ॐ ह्रींमहालक्ष्म्यै नमः २	ॐ क्लींमहासरस्वत्यै नमः ३	
ॐ अष्टभुजायै नमः ९	ॐ अष्टादशभुजायै नमः ७	ॐ दशाननायै नमः ८	
ॐ महिषाय नमः १०	ॐ सिंहाय नमः ११	ॐ कालाय नमः १२	ॐ मृत्यवे नमः १३

इति दशावरणदेवताः।

॥ तांत्रिकं नवार्णयंत्रं यथा ॥ १२ ॥



अथ लिखेदष्टदलमित्यादिश्लोकद्वयोक्तंनवार्णयंत्रं ॥ अस्मिन्यंत्रे नावरणानि किंतु मूलमंत्रांते श्रीमहाकालीमहालक्ष्मीमहासरस्वतीस्वरूपिण्यै दुर्गायै नमः इतिमंत्रेणावाहनादिसर्वोपचारान् समर्पयेत् ॥ तद्यथा ॥ लिखेदष्टदलं पद्मं चंदनागुरुकुंकुमैः ॥ पद्ममध्ये लिखेच्चक्रं षट्कोणं चंडिकामयं ॥१॥ षट्कोणचक्रमध्यस्थमाद्यबीजत्रयं लिखेत् ॥ पूर्वादिकोणषट्के तु बीजान्यन्यानि विन्यसेत् ॥२॥ अथवा तंत्रोक्तं सप्तशतीमहायंत्रं ॥

अथ प्रयोगः ॥ वेद्यां विरचिते रम्ये सर्वतोभद्रमंडले ॥ घटं संस्थाप्य विधिवत्तत्रावाह्यार्चयेच्छिवां ॥३॥ तदग्रे कन्यकाश्चापि पूजयेद्ब्राह्मणानपि ॥ उपचारैस्तु विविधैर्नवार्णावर्णैरपीति ॥४॥

॥ प्रथमं कलश स्थापनं ॥ १३ ॥

ॐभूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री ॥ पृथिवींयच्छपृथिवीन्दृ ० ० हपृथिवीम्माहि ० ० सीः ॥१॥ इति भूमिशोधनम् ॥

ॐआजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः ॥ पुनरूर्जानिवर्त्तस्वसान ÷ सहस्र-

न्धुक्क्षोरुधागपयस्वतीपुनर्म्माविशताद्द्रयिः ॥ २ ॥ इति कलशस्पर्शः ॥

ॐमहोद्यौःपृथिवीचनऽइमंय्यज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः ॥ ३ ॥ इति जलं पूरयेत् ॥

ॐत्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ॥ त्वामोषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत ॥४॥ इति गंधप्रक्षेपः ॥

ॐधान्यमसि धिनुहिदेवान्प्राणायत्वोदानायत्वाव्यानायत्वा ॥ दीर्घामनुप्रसितिमायुषेधान्देवोवः सविताहिरण्यपाणिःप्रतिगृभ्णात्वच्छिद्रेणपाणिनाचक्षुषे त्वामहीनाम्पयोसि ॥५॥ इति धान्यप्रक्षेपः ॥

ॐकाण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥ एवानोदूर्व्वेप्प्रतनुसहस्रेणशतेनच ॥६॥ इति दूर्वाप्रक्षेपः ॥

ॐहिरण्यगर्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥७॥ इति हिरण्य प्रक्षेपः ॥

ॐयाःफलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्प्रसूतास्तानोमुञ्चन्त्व ० ० हसः ॥८॥ इति फलप्रक्षेपः ॥

ॐपरिवाजपतिःकविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥९॥ इति पंचरत्नप्रक्षेपः ॥

ॐ या ओषधीः पूर्व्वा जाता देवेभ्यस्त्रियुगम्पुरा ॥ मनैनुबभ्रूणामह ०‿० शतन्धामानिसप्तच ॥१०॥ इति सर्वौषधि प्रक्षेपः ॥

ॐ अश्वत्थेवोनिषदनम्पर्ण्णेवोवसतिष्कृता ॥ गोभाजऽइत्किलासथय त्सनवथपूरुषम् ॥११॥ इति पंचपल्लवानि ॥

ॐ पूर्णादर्व्विपरापतसुपूर्ण्णापुनरापत ॥ व्वस्नेवविक्रीणावहाऽइषमूर्ज्जं ०‿० शतक्रतो ॥१२॥ इति पूर्णपात्रस्थापनं ॥

ॐ सुजातोज्ज्योतिषासहशर्म्मवरूथमासदत्स्वः ॥ वासोऽअग्नेविश्वरूप ०‿० संव्ययस्वविभावसो ॥१३॥ इति वस्त्रवेष्टनम् ॥

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञः ०‿० समिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोम्प्रतिष्ठ ॥१४॥ इति कलशप्रतिष्ठा ॥

येषां सर्वतोभद्रे ×ब्रह्मांडमंडलदेवता आवाह्य संपूज्य देवदक्षिणतः त्रिकोणं मंडलं कृत्वा जलेन प्रोक्ष्य त्रिकोणांतरे ह्रीं बीजं विलिख्य ॐ ह्रीं आधारशक्त्यै नमः इति मंत्रेण संपूज्य ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे फट् इति मंत्रेण त्रिपदाधारं प्रक्षाल्य त्रिकोणमध्ये संस्थाप्य ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे नमः इति संपूजयेत् ॥ ततः सुदर्शनास्त्राय फट् इति मंत्रेण ताम्रादिकलशं प्रक्षाल्य आधारोपरि हस्तद्वयेन संस्थाप्य

× इदं यंत्रं प्रयोगविधावयलोकनीयं ॥

रक्तवस्त्रमाल्यादिना पूजयित्वा ॐ गं ह्रीं क्लीं चामुंडायै विच्चे नमः इति जलमापूर्य ॐ भूर्भुवः स्वः वरुण इहागच्छ इह तिष्ठ इति वरुणमावाह्य तन्मध्ये स्वेष्टदेवतां ध्यात्वा गंधाक्षतपुष्पैः संपूजयेत ॥ इति कलशं संस्थाप्य ततः उपर्युक्त वैदिक मंत्रैस्त-त्तद्वस्तुसमावेशः ॥ ततः कलशस्य मूले मूलाधाराय नमः मूलाधारमावाहयामि १ ॥ इति सर्वत्र तदुपरि कूर्माय नमः २ ॥ तदुपरि शेषाय नमः ३ ॥ तदुपरि पृथिव्यै नमः ४ ॥ मंडलस्य मध्यभागे ॐकारपीठाय नमः १ ॥ पं पूर्ण गिरिपीठाय नमः २ ॥ कं कामगिरिपीठाय नमः ३ ॥ प्राच्यां दिशि ॐ उं उड्यानपीठाय नमः ४ । आग्ने-य्याम् ॐ मां मातृपीठाय नमः ५ । दक्षिणे ॐ जं जालंधरपीठाय नमः ६ । नैर्ऋत्ये ॐ कं कोल्हापुरोपपीठाय नमः ७ । पश्चिमे ॐ पूं पूर्णगिरिपीठाय नमः । वायव्यां ॐ सों सोहारोपपीठाय नमः ९ । उत्तरे ॐ कं कोल्हागिरिपीठाय नमः १० । ऐशा-न्याम् ॐ कं कामरूपपीठाय नमः ११ । इति पीठं संपूज्य । दक्षिणे ॐ गुरवे नमः १ । ॐ परमगुरवे नमः २ । ॐ परमेष्टिगुरवे नमः ३ । ॐ गुरुपंक्तये नमः ४ । ॐ माता पितृभ्यां नमः ५ । ॐ उपमन्युनारदसनकव्यासादिभ्यो नमः । वामे ॐ गं गणपतये नमः १ । ॐ दुं दुर्गायै नमः २ । ॐ सं सरस्वत्यै नमः ३ । ॐ क्षं क्षेत्रपालाय नमः ४ । इति नत्वा पीठदेवताः स्थापयेत् । तद्यथा । पीठमध्ये ॐ मं मंडूकाय नमः १ । ॐ आं आधारशक्त्यै नमः २ । ॐ मूं मूलप्रकृत्यै नमः ३ । ॐ कं कालाग्निरुद्राय नमः

४ । तदुपरि ॐ अं आदिकूर्माय नमः ५ । ॐ अं अनंताय नमः ६ । ॐ आं आदिवराहाय नमः ७ । ॐ पं पृथिव्यै नमः ८ । तदुपरि ॐ अमृतार्णवाय नमः ९ । ॐ रं रत्नदीपाय नमः १० । ॐ हं हेमगिरये नमः ११ । ॐ नं नंदनोद्यानाय नमः १२ । ॐ कं कल्पवृक्षाय नमः १३ । ॐ मं मणिभूतलाय नमः १४ । ॐ दं दिव्यमंडपाय नमः १५ । ॐ सं स्वर्णवेदिकायै नमः १६ । ॐ रं रत्नसिंहासनाय नमः १७ । ॐ धं धर्माय नमः १८ । ॐ ज्ञां ज्ञानाय नमः १९ । ॐ वैं वैराग्याय नमः २० । ॐ ऐं ऐश्वर्याय नमः २१ । इति संपूज्य पूर्वे ॐ अं अधर्माय नमः २२ । दक्षिणे ॐ अं अज्ञानाय नमः २३ । पश्चिमे ॐ अं अवैराग्याय नमः २४ । उत्तरे ॐ अं अनैश्वर्याय नमः २५ । पुनर्मध्ये ॐ सं सत्त्वाय नमः २६ । ॐ पं प्रबोधात्मने नमः २७ । ॐ रं रजसे नमः २८ । ॐ पं प्रकृत्यात्मने नमः २९ । ॐ तं तमसे नमः ३० । ॐ मं मोहात्मने नमः ॐ सों सोममंडलाय नमः ३२ । ॐ सं सूर्यमंडलाय नमः ३३ । ॐ वं वह्निमंडलाय नमः ३४ । ॐ मं मायातत्त्वाय नमः ३५ । ॐ विं विद्यातत्त्वाय नमः ३६ । ॐ शं शिवतत्त्वाय नमः ३७ । ॐ ब्रं ब्रह्मणे नमः ३८ । ॐ मं महेश्वराय नमः ३९ । ॐ आं आत्मने नमः ४० । ॐ अं अंतरात्मने नमः ४१ । ॐ पं परमात्मने नमः ४२ । ॐ जं जीवात्मने नमः ४३ । ॐ ज्ञं ज्ञानात्मने

नमः ४४ । ॐ कं कंदाय नमः ४५ । ॐ नं नालाय नमः ४६ । ॐ पं पद्माय नमः ४७ । ॐ मं महापद्माय नमः ४८ । ॐ रं रत्नेभ्यो नमः ४९ । ॐ कं केसरेभ्यो नमः ५० । ॐ कं कर्णिकायै नमः ५१ । इति पीठदेवताः संपूज्य नवपीठशक्तीः पूजयेत् । तद्यथा । पूर्वाद्यष्टसु दिक्षु । ॐ नंदायै नमः १ । ॐ भगवत्यै नमः २ । ॐ रक्तदंतिकायै नमः ३ । ॐ शांकभर्य्यै नमः ४ । ॐ दुर्गायै नमः ५ । ॐ भीमायै नमः ६ । ॐ कालिकायै नमः ७ । ॐ भ्रामर्यै नमः ८ । मध्ये । ॐ शिवदूत्यै नमः ९ । इति पूजयित्वा प्रयोगोक्तपीठशक्तिं वा पूजयेत् । इति पीठपूजां कृत्वा पात्रासादनं कुर्यात् ॥

॥ अथ पात्रासादन प्रयोगः ॥

कुंभस्थापनं ॥ देव्या अग्रे त्रिकोणमंडलं कृत्वा जलेन प्रोक्ष्य त्रिकोणांतर्मायां (ह्रीं) विलिख्य ॐ ह्रीं आधारशक्तये नमः इति संपूज्य शालिपुंजापरि स्वर्णादिरचितं कुंभं नवतंतुना वेष्टितं चंदनादिचर्चितं सुधूपितं सहिरण्यं वज्रमुक्ताफलपद्मरागनीलमरकतैः पंचरत्नैः समायुक्तं संस्थाप्य मूलेन नमः इति जलेनापूर्य तत्र कुंकुमागुरुकर्पूरचंदनपंकं सुकुसुमानि च निक्षिप्य तस्य मुखे आम्रदलानि निधाय नारिकेलफलाद्यं सतंडुलं निधाय ॐ भूर्भुवः स्वः वरुण इहागच्छ इह तिष्ठ इति वरुणमावाह्य ॐ तत्त्वायामि ब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरु-

णेहृणोद्गृत्यमुक्षा ०‿० समानऽआयु ०‿० प्रमोषीः ॥ इतिमंत्रेण अपांपति वरुणाय सांगाय सपरिवाराय नमः इति वरुणमावाह्य तन्मध्ये स्वेष्टदेवतां ध्यात्वा गंधाक्षतपुष्पैः संपूज्य प्रणमेत् (अयं कलशस्थापन प्रयोगो विस्तरशः उपरिलिखितः) इति कलशस्थापनं ।×

अथ शंखस्थापनम् । देवीवामतः त्रिकोणमंडलं कृत्वा जलेन प्रोक्ष्य त्रिकोणांतर्मायां (ह्रीं) विलिख्य ॐ ह्रीं आधारशक्त्यै नमः इति संपूज्य मूलेन फट् इति त्रिपदमाधारं प्रक्षाल्य त्रिकोणमध्ये संस्थाप्य तत्र देशे ॐ मं वह्निमंडलाय दशकलात्मने शंखपात्रासनाय नमः इति आधारं संपूज्य आधारे पूर्वादिषु दशाग्निकलाः पूजयेत् । तद्यथा । ॐ यं धूम्रार्चिषे नमः १ । ॐ रं उष्मायै नमः २ । ॐ लं ज्वलिन्यै नमः ३ । ॐ वं ज्वालिन्यै नमः ४ । ॐ शं विस्फुलिंगिन्यै नमः ५ । ॐ सं सुश्रियै नमः ६ । ॐ सं स्वरूपायै नमः ७ । ॐ हं कपिलायै नमः ८ । ॐ लं हव्यवाहायै नमः ९ । ॐ क्षं कव्यवाहायै नमः १० । इति पूजयेत् । ततः ॐ क्लीं महाजलचराय हुं फट् स्वाहा पांचजन्याय नमः इति मंत्रेण प्रक्षालितं शंखमाधारोपरि संस्थाप्य तत्र देशे । ॐ अं सूर्यमंडलाय द्वादशकलात्मने

× १ अथ कामनापरत्वेन कलशमध्ये निक्षेपपदार्थाः "धनकामो न्यसेत्स्वर्णं धान्यकामस्तु [illegible] ॥ श्रीकामः कमलं न्यस्य कामार्थी दमनं न्यसेत् ॥ मोक्षकामो न्यसेद्रत्नं जयकामोऽपराजिताम ॥ उच्चाटनार्थं हिंगुलं वश्यार्थं शिखिमूलिकाम् ॥ मारणाय मरीचं तु केतकीं मोहनाय च ॥ आकर्षणार्थं धत्तूरं [illegible] ॥"

श्री दुर्गाशंखपात्राय नमः इति शखं संपूज्य पात्रे स्वाग्रादिप्रादक्षिण्येन द्वादशसूर्य-कलाः पूजयेत । तद्यथा । ॐ कं भं तपिन्यै नमः १ । ॐ खं बं तापिन्यै नमः २ । ॐ गं फं धूम्रायै नमः ३ । ॐ घं पं मरिच्यै नमः ४ । ॐ ङं नं ज्वालिन्यै नमः ५ । ॐ चं धं रुच्यै नमः ६ । ॐ छं दं सुषुम्णायै नमः ७ । ॐ जं थं भोगदायै नमः ८ । ॐ झं तं विश्वायै नमः ९ । ॐ ञं णं बोधिन्यै नमः १० । ॐ टं ढं धारिण्यै नमः ११ । ॐ ठं डं क्षमायै नमः १२ । इति पूजयेत । ततः ॐ क्षं ळं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं इत्येकाधिकपंचाशत ५१ विलोममातृकामुच्चार्य मूलेन नमः इति शंखे जलमापूर्य तत्र देशे ॐ सोममंडलाय षोडश-कलात्मने श्रीदुर्गाशंखपात्रामृताय नमः इति गंधादिभिः संपूज्य जले षोडशचन्द्र-कलाः पूजयेत् । तद्यथा । ॐ अं अमृतायै नमः १ । ॐ आं मानदायै नमः २ । ॐ इं पूषिण्यै नमः ३ । ॐ ईं तुष्ट्यै नमः ४ । ॐ उं पुष्ट्यै नमः ५ । ॐ ऊं रत्यै नमः ६ । ॐ ऋं धृत्यै नमः ७ । ॐ ॠं शशिन्यै नमः ८ । ॐ ऌं चंद्रिकायै नमः ९ । ॐ ॡं कांत्यै नमः १० । ॐ एं ज्योत्स्नायै नमः ११ । ॐ ऐं श्रियै नमः १२ । ॐ ओं प्रीत्यै नमः १३ । ॐ औं अंगदायै

नमः १४ । ॐ अं पूर्णायै नमः १५ । ॐ अः पूर्णामृतायै नमः १६ । इति संपूज्याभिमंत्रयेत् । तद्यथा । " ॐ शंखादौ चंद्रदैवत्यं कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजापतिश्चैवमग्रे गंगा सरस्वती ॥१॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ॥ शंखे तिष्ठंति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत् " ॥१॥ इत्यभिमंत्र्य प्रार्थयेत् " ॐ त्वं पुरा सागरजातो विष्णुना विधृतः करे ॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोस्तुते ॥१॥ " ततः ॐ पांचजन्याय विद्महे पावमानाय धीमहि ॥ तन्नः शंखः प्रचोदयात ॥ इति शंखगायत्रीमष्टधा जपित्वा शंखमुद्राः प्रदर्शयेत् ॥ इति शंखस्थापनम् ॥१॥

ततो देव्यग्रे चार्घ्यं देवीदक्षिणतः प्राक्षणीपात्रं च एवमेवविधिना संस्थाप्य त्रिरर्घ्यस्थापनानंतरं अर्घाद्वामतः श्रीपात्रं १ गुरुपात्रं २ देवीपात्रं शक्तिपात्रं ४ योगिनीपात्रं ५ भोगपात्रं ६ वीरपात्रम् ७ आत्मपात्रं ८ बलिपात्रं ९ एतानि नव पात्राणि संस्थाप्य दक्षिणे पाद्यार्घाचमनीयमधुपर्कानिति चत्वारि पात्राणि संस्थापयेत्। अशक्तश्चेद्गुरुवीरात्मबलिभोगसंज्ञकानीति पंचपात्राणि पाद्याद्युपचारार्थमेकं वा पात्रं स्थापयेत् । तैलाभ्यंगानंतरं । पंचमं स्नानपात्रं स्थापयेत् उद्वर्तनार्थं

अथ घंटास्थापनं देवीदक्षिणतः जगद्ध्वनिमंत्रमातः स्वाहा इति मंत्रेण घंटां च संपूज्य ॐ सुपर्णोसि गरुत्मांस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ॥ स्तोमऽआत्मा-

च्छन्दा ०‿० स्यज्ञानियज् ०‿० पिनाम ॥ सामतेतनूर्वांमदेव्ल्यंयज्ञायज्ञियम्पुच्छन्धि-
ष्ण्ण्याःशुफाः ॥ सुपर्णोसिगरुत्मान्दिवङ्गच्छस्व—पत ॥४॥

गरुडमुद्रां प्रदर्शयेत् । ततः गंधाक्षतपुष्पादींश्च पूजोपकरणार्थं स्वदक्षिणपार्श्वे निधाय । ॐ दुर्गार्चनकाले तु यानि यानीह सांप्रतम् ॥ वस्तूनि गोरसाद्यानि पवित्राणि भवन्तु वै ॥१॥ मूलेन नमः इति जलेन प्राश्य जलार्थं बृहत्पात्रं व्यजनं-छत्रादर्शचामराणि च स्ववामे संस्थाप्य अखंडदीपस्थापनं कुर्यात् ।

देवीदक्षिणभागे घृतदीपं वामे तैलदीपं स्थापयेत् । तद्यथा । दक्षिणे दीपपात्रं गोघृतेन तैलेन वामपात्रमापूर्य मंत्रवर्णतंतुभिः वर्तिं निक्षिप्य प्रणवेन प्रज्वाल्य सुदर्शन-मंत्रेण घृतदीपं पूजयेत् । तत्र मंत्रः । ॐ रां रीं रूं रैं रौं रः ॐ सहस्रार हुं फट् स्वाहा १ । तैलदीपं पाशुपतास्त्रमंत्रेण पूजयेत । तत्र मंत्रः । ॐ श्लीं पशु हुं फट् स्वाहा । इति मंत्रेण गंधपुष्पाभ्यां संपूज्य हस्तद्वयेन दीपशिखां स्पृष्ट्वा मंत्रं पठेत् । तत्र मंत्रः ॐ घोराय घोरतमाय महारौद्राय वीरभद्राय ज्वालामा-लिने सर्वदुष्टापसंहर्त्रे हुं फट् स्वाहा ॥१॥ इति पठित्वा पश्चात्तत्तेजसात्मानं सम-र्प्य ततःस्वकायचित्तशोधनं कुर्यात् । ॐ हुं फट् स्वाहा । इति मुखे ॐ रक्षरक्ष हुं फट् स्वाहेति हृदि हस्तं दत्त्वात्मरक्षां विधाय । ॐ इति मंत्रेण चंदनपुष्पाणि कराभ्यां मर्दयित्वा पुष्पाक्षतानादाय, ते सर्वे विलयं यांतु ये मां

हिंसंति हिंसकाः ॥ मृत्युरोगभयक्लेशाः पतंतु रिपुमस्तके ॥१॥ इति मंत्रेण ऐशान्यां दिशि दूरतः पुष्पं क्षिप्त्वा हस्तौ प्रक्षाल्याचमेत । अथ पूजाप्रयोगः आदौ अग्न्युत्तारणं तत्रादावग्न्युत्तारणप्रयोगः आचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुकदेवतानूतनयंत्रमूर्तीनां टंकघनादिदोषपरिहारार्थमग्न्युत्तारणं करिष्ये इति संकल्प्य स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां चाधोलिखितमंत्रैः कुर्यात् । तत्र मंत्राः । ॐ समुद्रस्य त्वावकयाग्ने परिव्ययामसि ॥ पावकोऽअस्मभ्य ०‿० शिवो भव ॥१॥ हिमस्य त्वा जरायुणाग्ने परिव्ययामसि ॥ पावकोऽअस्मभ्य ०‿० शिवो भव ॥२॥ उपज्मन्नुपवेतसेऽवततरन्नदीष्वा॥ अग्ने पित्तमपामसि मण्डूकिताभिरागहि सेमन्नो॥ यज्ञम्पावकवर्ण ०‿० शिवं कृधि ॥३॥ अपामिदन्न्ययन ०‿० समुद्रस्य निवेशनम्॥ अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्य ०‿० शिवो भव ॥४॥ अग्ने पावकरोचिषामन्द्रयादेवजिह्वया॥ आ देवान्वक्षियक्षिच ॥५॥ सनः पावक दीदिवोऽग्ने देवाँ २ इहावह ॥ उप यज्ञ ०‿० हविश्चनः ॥६॥ पावकयायश्चितयन्त्याकृपाक्षामन्रुरुचउपसानभानुना॥ तूर्वन्नयामन्नेतशस्य नूरण-

१ लिंगस्थां पूजयद्देवीं पुस्तकस्थां तथैव च । मंडलस्थां महामायां यंत्रस्थां प्रतिमासु च । मौदर्णे राजते ताम्रे पट्टे भूर्जेऽथवा भुवि ॥ विना यंत्रेण चेत्पूजा देवता न प्रसीदति ॥ अन्यत्रापि-यंत्रमित्याहुरेतस्मिन्देवः प्रीणाति पूजितः । विना यंत्रेण पूजायां देवता न प्रसीदति ॥ यंत्रं मंत्रमयं प्रोक्तं मंत्रात्मा देवतेति च । देहात्मनोर्यथा भेदो मंत्रदेवतयोस्तथा ॥

ऽआयो घृणेन ततृपाणोऽअजर ॥७॥ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे ॥ अन्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्य ँ शिवोभव ॥८॥ नृषदे वेडप्सुषदे वेड्बर्हिषदे वेड्वनसदे वेड्स्वर्विदे वेट् ॥९॥ येदेवा देवानांय्यज्ञिया यज्ञियाना ँ संवत्सरीणमुप भागमासते ॥ अहुतादो हविषो यज्ञेऽअस्मिन्त्स्वयम्पिबन्तु मधुनो घृतस्य ॥१०॥ येदेवादेवेष्वधिदेवत्वमायन्न्येब्रह्मणः पुरऽएतारोऽअस्य ॥ येभ्योनऽऋतेपवते धाम किञ्चन न ते दिवो न पृथिव्याऽअधिस्नुषु ॥११॥ प्राणदाऽअपानदा व्यानदा वर्चोदा वरिवोदाः ॥ अन्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्य ँ शिवोभव ॥१२॥ इत्यग्न्युत्तारणं कृत्वा स्वच्छवस्त्रेण संशोष्य मूलमन्त्राक्षासनमन्त्रेण पुष्पाद्यासनं दत्वा पीठमध्ये संस्थापयेत् ॥

१४ अथ संक्षेपतः पूजाविधिः

अस्य श्रीनवार्णमंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । गायत्र्युष्णिगनुष्टुभश्छंदांसि । श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । नंदाशाकंभरीभीमाः शक्तयः । रक्तदंतिकादुर्गाभ्रामर्यो बीजानि । अग्निवायुसूर्यास्तत्त्वानि । श्रीजगदंबाप्रीत्यर्थे न्यासे पूजायां च विनियोगः ॥ ऋष्यादिन्यासान् मूलषडंगन्यासांश्च विधाय कलशशंखघंटाः संपूज्य ॥ अपवित्रः पवित्रो वा सर्वावस्थांगतोपि वा ॥ यः स्मरेत्पुंडरीकाक्षं सबाह्याभ्यंतरं शुचिः ॥ मूलेनात्मानं पूजाद्रव्याणि च संप्रोक्ष्य यंत्रं

संस्पृश्य ॐ आं सोहं इति त्रिवारोच्चारितमंत्रेण यंत्रस्य प्राणप्रतिष्ठां कृत्वा ततः त्रिखंडामुद्रया पुष्पमादाय स्वहृदिस्थां त्रिगुणां देवीं सुषुम्णामार्गेण ब्रह्मरंध्रद्वारा कुसुमे समागतां विभाव्य हस्ते पुष्पं गृहीत्वा तत्र रूपत्रयं बिभ्राणां ध्यायेत् ॥

ॐ ऐं खड्गं चक्रगदेषुचापपरिघं शूलं भुशुंडिं शिरः
शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥ १ ॥

ॐ ह्रीं अक्षस्रक्परशुं गदेषु कुलिशं पद्मं धनुः कुंडिकां
दंडं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनम् ॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभैः
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥ २ ॥

ॐ क्लीं घंटाशूलहलानि शंखमुशले चक्रं धनुःसायकान्
हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभां ॥
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा–
पूर्वामत्र सरस्वतीमनुभजे शुंभादिदैत्यार्दिनीम् ॥ ३ ॥

इति तत् पुष्पं यंत्रे स्थाप्य तत्र मध्यबीजत्रये महाकाली महालक्ष्मी महासर-

स्वती देवतात्रयं संस्थितं विभावयेत् ततःआवाहनी स्थापनी संनिधापिनी संनिरोधिनी धेनु योनिमुद्रा मूलेन प्रदर्श्य मूलमुच्चार्य श्रीमहाकाली महालक्ष्मी महासरस्वती देवताभ्यो नमः आवाहयामि एवं मूलेनासनपाद्यार्घ्याचमनीयस्नानमंगलस्नान मधुपर्क पंचामृतपूजां विधाय स्नानं चंदनं पुष्पं धूपं दीपं पंचामृतशेषनैवेद्यं समर्प्य अनेन पूजाराधनेन भगवती दुर्गा देवी प्रीयतां॥ उत्तरे निर्माल्यं विसर्ज्य श्रीसूक्तेनाभिषेकः

ॐ ऐं हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ॥
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥ ऐं ओं

ओं ह्रीं तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ॥
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२॥ ह्रीं ओं

ओं श्रीं अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ॥
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३॥ श्रीं ओं

ओं क्लीं कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ॥
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४॥ क्लीं ओं

ओं वदवद
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ॥

तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५॥
वद्वद् ओं ॥

ओं वाग्वादिनी
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ॥
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः
॥६॥ वाग्वादिनी ओं ॥

ॐ ऐं उपैतु मां देवसखः कीर्तिश्च मणिना सह ॥
प्रादुर्भूतः सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥७॥ ऐं ओं ॥

ॐ सौं क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ॥
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ॥८॥ सौं ओं ॥

ॐ हंसः गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥ हंसः ओं ॥

ॐ आं मनसः काममाकूतिं वाचः सत्यमशीमहि ॥
पशूनां रूपमन्यस्य मयि श्रीः श्रयतां यशः ॥१०॥ आं ओं ॥

ॐ ह्रीं कर्दमेन प्रजा भूता मयि संभव कर्दम ॥
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥ ह्रीं ओं ॥

ओं क्लीं आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ॥
वाचंदेवीं मातरं श्रियं वासय मे कुले ॥१२॥ क्लीं ओं ॥
ओं क्षीं आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ॥
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥ क्षीं ओं ॥
ओं श्रीं आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ॥
सूर्यां हिरण्यमयीं लक्ष्मीं जातवेदो म आवह ॥१४॥ श्रीं ओं ॥
ओं हूं तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ॥
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥१५॥ हूं ओं ॥
ओं गं स्वाहा यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥ स्वाहा गं ओं ॥

ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे श्रीमहाकाली महालक्ष्मी महासरस्वती देवताभ्यः वस्त्रं समर्पयामि नमः इति प्रत्युपचारमुच्चार्य वस्त्रादिपुष्पान्तां पूजां कुर्यात् । वस्त्रोपवस्त्रोत्तरीयकंचुकीवस्त्रयज्ञोपवीतचंदनालंकारहरिद्राकुंकुमकज्जलसिंदूरपरिमलद्रव्यकंकणकंठसूत्रादिसौभाग्यालंकारपुष्पाणि ॥ तथैव आवरणदेवता आवाह्य संपूजयेत् ॥ अत्र सर्वत्र, पूज्यपूजकयोर्मध्ये प्राची दिक् संप्रकीर्तिता ॥ इतिवचनमनुसृत्य प्रागादिदिशो ग्राह्याः ॥ इंद्रादिलोकपालतदायुधविषये तु सूर्योदयिका एव इति ज्ञेयं ॥

तत्र यंत्रषट्कोणस्यपश्चिमकोणेमहालक्ष्मीपृष्ठभागे सरस्वतीब्रह्मभ्यांनमः सरस्वतीब्रह्माणावावाहयामि पादुकां पूजयामि तर्पयामि ॥१॥ नैऋत्यकोणे गौरीरुद्राभ्यां नमः गौरीरुद्रावावाहयामि पादुकां पूजयामि तर्पयामि ॥ २ ॥ वायुकोणे लक्ष्मीहृषीकेशाभ्यां नमः लक्ष्मीहृषीकेशावावाहयामि पादुकां पूजयामि तर्पयामि ॥ ३ ॥ पूर्वकोणे अष्टादशभुजायै नमः अष्टादशभुजामावाहयामि पादुकां पूजयामि तर्पयामि ॥४॥ अग्निकोणे दशाननायै नमः दशाननामावाहयामि पादुकां पूजयामि तर्पयामि ॥५॥ ईशानकोणे अष्टभुजायै नमः अष्टभुजामावाहयामि पादुकां पूजयामि तर्पयामि ॥६॥ दयाब्धे त्राहि संसार सर्पान्मां शरणागतं ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं ॥ अनेन प्रथमावरणार्चनेन भगवती श्रीमहाकाली महालक्ष्मी महासरस्वती देवताः प्रीयंतां ॥१॥

पुनः षट्कोणेषु प्रागादिषु ॥ ॐ नं नंदजायै नमः नंदजां आवाहयामि पादुकां पूजयामि तर्पयामि ॥१॥ ॐ रं रक्तदंतिकायै नमः रक्तदंतिकां आवाहयामि तर्पयामि ॥२॥ ॐ शां शाकंभर्यै नमः शाकंभरीं आवाहयामि तर्पयामि ॥३॥ ॐ दुं दुर्गायै नमः दुर्गां आवाहयामि तर्पयामि ॥४॥ ॐ भीं भीमायै नमः भीमां आवाहयामि तर्पयामि ॥५॥ भ्रां भ्रामर्यै नमः भ्रामरीं आवाहयामि तर्पयामि ॥६॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतं ॥ भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनं ॥२॥ अनेन द्वितीया

वरणार्चनेन भगवती श्रीमहाकाली महालक्ष्मी महासरस्वती देवताः प्रीयन्ताम् ॥२॥

षट्कोणाद्बहिराग्नेयादिचतुर्भागेषु ॐ जं जयायै नमः जयां आवाहयामि पादुकां पूजयामि तर्पयामि १ ॥ ॐ विं विजयायै नमः विजयां आवाहयामि पादुकां पूजयामि तर्पयामि २ ॥ ॐ जं जयंत्यै नमः जयंतीं आवाहयामि पादुकां पूजयामि तर्पयामि ३ ॥ ॐ अं अपराजितायै नमः अपराजितां आवाहयामि पादुकां पूजयामि तर्पयामि ४ ॥ षट्कोणपार्श्वयोः दक्षिणभागे ॐ सिंहाय नमः सिंहं आवाहयामि पादुकां पूजयामि तर्पयामि ५ ॥ उत्तरभागे ॐ महिषाय नमः महिषं आवाहयामि पादुकां पूजयामि तर्पयामि ६ ॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतं ॥ भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनं ॥ अनेन तृतीयावरणार्चनेन भगवती श्री महाकाली महालक्ष्मी महासरस्वती देवताः प्रीयन्ताम् ॥३॥

अष्टपत्रेषु प्रागादिषु ॐ ब्रां ब्राह्म्यै नमः ब्राह्मीं आवाहयामि पादुकां पूजयामि तर्पयामि १ ॥ ॐ मां माहेश्वर्यै नमः माहेश्वरीं आवाहयामि पादुकां पूजयामि तर्पयामि २ ॥ ॐ कौं कौमार्यै नमः कौमारीं आवाहयामि पादुकां पूजयामि तर्पयामि ३ ॥ ॐ वैं वैष्णव्यै नमः वैष्णवीं आवाहयामि पादुकां पूजयामि तर्पयामि ४ ॥ ॐ वां वाराह्यै नमः वाराहीं आवाहयामि पादुकां पूजयामि तर्पयामि ५ ॥ ॐ नां नारसिंह्यै नमः नारसिंहीं आवाहयामि पादुकां पूजयामि तर्पयामि ६ ॥

ॐ गं गंगै नमः ऐंद्रीं आवाहयामि पादुकां पूजयामि तर्पयामि ७ ॥ ॐ चां चामुंडायै नमः चामुंडां आवाहयामि पादुकां पूजयामि तर्पयामि ८ ॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतं ॥ भक्त्या समर्पये तुभ्यं चतुर्थ वरणार्चनं ॥ अनेन चतुर्थावरणार्चनेन भगवती श्री महाकाली महालक्ष्मी महासरस्वती देवताः प्रीयन्ताम् ॥४॥

पुनरष्टदलेषु प्रागादिषु ॐ अं असितांगभैरवाय नमः असितांगभैरवं आवाहयामि पादुकां पूजयामि तर्पयामि १ ॥ ॐ रुं रुरुभैरवाय नमः रुरुभैरवं आवाहयामि पादुकां पूजयामि तर्पयामि २ ॥ ॐ चं चंडभैरवाय नमः चंडभैरवं आवाहयामि पादुकां पूजयामि तर्पयामि ३ ॥ ॐ क्रों क्रोधभैरवाय नमः क्रोधभैरवं आवाहयामि पादुकां पूजयामि तर्पयामि ४ ॥ ॐ उं उन्मत्तभैरवाय नमः उन्मत्तभैरवं आवाहयामि पादुकां पूजयामि तर्पयामि ५ ॥ ॐ कं कपालभैरवाय नमः कपालभैरवं आवाहयामि पादुकां पूजयामि तर्पयामि ६ ॥ ॐ भीं भीषणभैरवाय नमः भीषणभैरवं आवाहयामि पादुकां पूजयामि तर्पयामि ७ ॥ ॐ सं संहारभैरवाय नमः संहारभैरवं आवाहयामि पादुकां पूजयामि तर्पयामि ८ ॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतं ॥ भक्त्या समर्पये तुभ्यं पंचमावरणार्चनं ॥ अनेन पंचमावरणार्चनेन भगवती श्री महाकाली महालक्ष्मी महासरस्वती देवताः प्रीयन्ताम् ॥५॥

॥३८॥

चतुर्विंशतिदलेषु प्रागादिक्रमेण ॐविष्णुमायायै नमः विष्णुमायां आवाहयामि पादुकां पूजयामि तर्पयामि १ ॥ ॐचेतनायै नमः चेतनां आवाहयामि पादुकां पूजयामि तर्पयामि २॥ ॐबुद्ध्यै नमः बुद्धिं आवाहयामि पादुकां पूजयामि तर्पयामि ३ ॥ ॐनिद्रायै नमः निद्रां आवाहयामि पादुकां पूजयामि तर्पयामि ४ ॥ ॐक्षुधायै नमः क्षुधां आवाहयामि पादुकां पूजयामि तर्पयामि ५ ॥ ॐ छायायै नमः छायां आवाहयामि पादुकां पूजयामि तर्पयामि ६॥ ॐशक्त्यै नमः शक्तिं आवाहयामि पादुकां पूजयामि तर्पयामि ७ ॥ ॐतृष्णायै नमः तृष्णां आवाहयामि पादुकां पूजयामि तर्पयामि ८ ॥ ॐक्षान्त्यै नमः क्षान्तिं आवाहयामि पादुकां पूजयामि तर्पयामि ९ ॥ ॐजात्यै नमः जातिं आवाहयामि पादुकां पूजयामि तर्पयामि १० ॥ ॐलज्जायै नमः लज्जां आवाहयामि पादुकां पूजयामि तर्पयामि ११ ॥ ॐशांत्यै नमः शांतिं आवाहयामि पादुकां पूजयामि तर्पयामि १२ ॥ ॐश्रद्धायै नमः श्रद्धां आवाहयामि पादुकां पूजयामि तर्पयामि १३ ॥ ॐकांत्यै नमः कांतिं आवाहयामि पादुकां पूजयामि तर्पयामि १४ ॥ ॐलक्ष्म्यै नमः लक्ष्मीं आवाहयामि पादुकां पूजयामि तर्पयामि १५ ॥ ॐधृत्यै नमः धृतिं आवाहयामि पादुकां पूजयामि तर्पयामि १६ ॥ ॐवृत्त्यै नमः वृत्तिं आवाहयामि पादुकां पूजयामि तर्पयामि १७ ॥ ॐस्मृत्यै नमः स्मृतिं आवाहयामि पादुकां पूजयामि तर्पयामि १८ ॥

ॐदयायै नमः दयां आवाहयामि पादूकां पूजयामि तर्पयामि १९ ॥ ॐतुष्ट्यै नमः तुष्टिं आवाहयामि पादूकां पूजयामि तर्पयामि २० ॥ ॐपुष्ट्यै नमः पुष्टिं आवाहयामि पादूकां पूजयामि तर्पयामि २१ ॥ ॐमात्रे नमः मातरं आवाहयामि पादूकां पूजयामि तर्पयामि २२ ॥ ॐभ्रांत्यै नमः भ्रांतिं आवाहयामि पादूकां पूजयामि तर्पयामि २३ ॥ ॐचित्यै नमः चितिं आवाहयामि पादूकां पूजयामि तर्पयामि २४ ॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतं ॥ भक्त्या समर्पये तुभ्यं षष्ठाख्यावरणार्चनं॥ अनेन षष्ठाख्यावरणार्चनेन भगवती श्रीमहाकाली महालक्ष्मी महासरस्वती देवताः प्रियन्ताम् ॥६॥

भूगृहरव्युदयप्रागादिपु ॐलं इंद्राय नमः इंद्रं आवाहयामि पादूकां पूजयामि तर्पयामि १ ॥ ॐरं अग्नये नमः अग्निं आवाहयामि पादूकां पूजयामि तर्पयामि २ ॥ ॐमं यमाय नमः यमं आवाहयामि पादूका पूजयामि तर्पयामि ३ ॥ ॐक्षं निर्ऋतये नमः निर्ऋतिं आ० पा० पू० तर्पयामि ४॥ ॐवं वरुणाय नमः वरुणं आवाहयामि पादूकां पूजयामि तर्पयामि ५। ॐयं वायवे नमः वायुं आवाहयामि पादूकां पूजयामि तर्पयामि ६ ॥ ॐसं सोमाय नमः सोमं आवाहयामि पादुकां पूजयामि तर्पयामि ७ ॥ ॐहं रुद्राय नमः रुद्रं आवाहयामि पादुकां पूजयामि तर्पयामि ८ ॥ ॐईशानी प्रागंतराले ॐआं ब्रह्मणे नमः ब्रह्माणं आवाहयामि पादुकां पूजयामि तर्पयामि ९ ॥ ॐवरुण-

निर्ऋत्यंतराले ह्रीं शेषाय नमः शेषं आवाहयामि पादुकां पूजयामि तर्पयामि ॥१०॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतं ॥ भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनं ॥ अनेन सप्तमावरणार्चनेन भगवती श्री महाकाली महालक्ष्मी महासरस्वती देवताः प्रीयन्ताम् ॥७॥

पुनस्तेनैव क्रमेण वंवज्राय नमः वज्रं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐशंशक्त्यै नमः शक्तिं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐदंदंडाय नमः दंडं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐखंखड्गाय नमः खड्गं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐपांपाशाय नमः पाशं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐअंअंकुशाय नमः अंकुशं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐगंगदायै नमः गदां आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐत्रिंत्रिशूलाय नमः त्रिशूलं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐपंपद्माय नमः पद्मं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐचंचक्राय नमः चक्रं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ १० दयाब्धे त्राहि संसारसर्पान्मां शरणागतं ॥ भक्त्या समर्पये तुभ्यं अष्टमावरणार्चनं ॥ अनेन अष्टमावरणार्चनेन भगवती श्री महाकाली महालक्ष्मी महासरस्वती देवताः प्रीयन्ताम् ॥८॥

भूयहाद्बहिः प्रागादिदिक्षु ॐगंगणपतये नमः गणपतिं आवाहयामि पादुकां

पूजयामि तर्पयामि ॥ ॐक्षंक्षेत्रपालाय नमः क्षेत्रपालं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐवंबटुकाय नमः बटुकं आवाहयामि पादुकां पूजयामि तर्पयामि ॥ ॐयोंयोगिनीभ्यो नमः योगिनीं आवाहयामि पादुकां पूजयामि तर्पयामि ४ ॥ दयाब्धे त्राहि संसारसर्पान्मां शरणागतं ॥ भक्त्या समर्पये तुभ्यं नवमावरणार्चनं ॥ अनेन नवमावरणार्चनेन भगवती श्रीमहाकाली महालक्ष्मी महासरस्वती देवताः प्रियन्ताम् ॥९॥

ॐआवरणदेवताभ्यो नमः चंदनं पुष्पं धूपं दीपं नैवेद्यं समर्पयामि नमः ॥ ततः मूलमुद्रार्य श्री महाकाली महालक्ष्मी महासरस्वती देवताभ्यो नमः ॥ धूपं दीपं नैवेद्यं तांबूलं दक्षिणां फलानि महानीराजनदीपं कर्पूरदीपं नमस्कारान् प्रदक्षिणाः मंत्रपुष्पांजलिं समर्पयामि नमः ॥ अपराधसहस्राणि क्रियन्तेहर्निशं मया ॥ दासोयमिति मां मत्वा क्षमस्व परमेश्वरि ॥१॥ आवाहनं न जानामि न जानामि विसर्जनं ॥ पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥२॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥ यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥३॥ अपराधशतं कृत्वा जगदंबेति चोच्चरेत् ॥ यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥४॥ सापराधोस्मि शरणं प्राप्तस्त्वां जगदंबिके ॥ इदानीमनुकंप्योहं यथेच्छसि तथा कुरु ॥५॥ अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतं ॥ तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥७॥ गुह्यातिगुह्यगोप्त्री

त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥८॥ प्रार्थनां समर्पयामि ॥ गीतवाद्यनृत्यछत्रचामरांदोलनदर्पणसर्वराजोपचारार्थे अक्षतान् समर्पयामि ॥ नमस्करोमि ॥ अनेन यथाशक्त्यर्चनेन भगवती श्री जगदंबा महाकाली महालक्ष्मी महासरस्वती मातरः प्रीयन्तां ॥ शाक्तेभ्यो नमः सर्वोपचारार्थे गंधाक्षतपुष्पंधूपदीप नैवेद्यं समर्पयामि ॥

॥ अथ कुमारी पूजा १५ ॥

यजमानः पूजयेच्च कन्यायां नवकं शुभं ॥ द्विवर्षाद्या दशाब्दांताः कुमारीः परिपूजयेत् ॥ अर्थादेकहायनाल्पवयस्का वर्ज्या ॥ ता आसने उपवेश्यावाहयेन्मंत्रेण ॥ मंत्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीं ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं ॥ अनेनैव मंत्रेण नवापि आवाहयेत् ॥ अशक्तौ यथाशक्ति एकामपि ॥ अथ नवानां पूजामंत्राः ॥ द्विहायनाकुमारीसंज्ञका ॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोस्तुते ॥ कौमारीं आवाहयामि गंधाक्षत पुष्प धूप दीप नैवेद्यं समर्पयामि नमः ॥१॥ त्रिहायना त्रिमूर्तिस्तन्मंत्रः ॥ त्रिपुरां त्रिपुराधारां त्रिवर्षां ज्ञानरूपिणीं ॥ त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहं ॥ त्रिमूर्तिं आवाहयामि गंधाक्षत पुष्प धूप दीप नैवेद्यं समर्पयामि नमः ॥२॥ चतुर्वर्षा कल्याणी तत्पूजामंत्रः ॥ कलात्मिकां कलातीतां कारुण्यहृदयां शिवां ॥ कल्याणजननीं देवीं

कल्याणीं पूजयाम्यहं ॥ कल्याणीं आवाहयामि गंधाक्षत पुष्प धूप दीप नैवेद्यं समर्पयामि नमः ॥३॥ पंचवर्षा रोहिणी तत्पूजामंत्रः ॥ अणिमादिगुणाधारामकाराद्यक्षरात्मिकां ॥ अनंतशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहं ॥ रोहिणीं आवाहयामि गंधाक्षत पुष्प धूप दीप नैवेद्यं समर्पयामि नमः ॥४॥ षड्वर्षा कालिका तत्पूजामंत्रः ॥ कामचारां शुभां कांतां कालचक्रस्वरूपिणीं ॥ कामदां करुणोदारां कालिकां पूजयाम्यहम् ॥ कालिकां आवाहयामि गंधाक्षत पुष्प धूप दीप नैवेद्यं समर्पयामि नमः ॥५॥ सप्तवर्षा चंडिका तत्पूजामंत्रः ॥ चंडवीरां चंडमायां चंडमुंडप्रभंजनीं ॥ पूजयामि सदा देवीं चंडिकां चंडविक्रमां ॥ चंडिकां आवाहयामि गंधाक्षत पुष्प धूप दीप नैवेद्यं समर्पयामि नमः ॥६॥ अष्टवर्षा शांभवी तत्पूजामंत्रः ॥ सदानंदकरीं शांतां सर्वदेवनमस्कृतां ॥ सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहम् ॥ शांभवीं आवाहयामि गंधाक्षत पुष्प धूप दीप नैवेद्यं समर्पयामि नमः ॥७॥ नवहायना दुर्गा तत्पूजामंत्रः ॥ दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीं ॥ पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीं ॥ दुर्गां आवाहयामि गंधाक्षत पुष्प धूप दीप नैवेद्यं समर्पयामि नमः ॥८॥ दशवर्षा सुभद्रा तत्पूजामंत्रः ॥ सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीं ॥ सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहं ॥ सुभद्रां आवाहयामि गंधाक्षत पुष्प धूप दीप नैवेद्यं समर्पयामि नमः ॥९॥

इति प्रत्येकमंत्रांते तत्तन्नाममंत्रेण नवापि षोडशोपचारैः पंचोपचारैर्वापूजयेत् इति ॥

॥ अथ बलिदानं ॥

मूलांते श्रीमहालक्ष्म्यै नमः पायसबलिं समर्पयामि इति महाकाल्यादियोगिन्यंतयंत्रस्थावरणदेवताभ्यः प्रत्येकं सर्वाभ्यो बलिं दद्यात् ॥

॥ अथ कूष्मांड बलि विधानं ॥

आचम्य प्राणानायम्य देशाद्युच्चार्य मम सकुटुंबस्य सर्वारिष्टप्रशांतिसर्वाभीष्टसिद्धिकल्पोक्तफलावाप्तिद्वारा श्रीमहाकाली महालक्ष्मी महासरस्वतीदेवताप्रीत्यर्थं कूष्मांडबलिदानं करिष्ये तदंगत्वे पंचोपचारैः पूजनं बलिपूजनं च करिष्ये ॥ मूलेन मुख्यदेवतां पंचोपचारैः संपूज्य तत्पुरतः स्वयमुदङ्मुखं पीठेवस्त्रगुंठितं कूष्मांडं निधाय ॐकूष्मांडबलये नमः इतिआवाहनवस्त्रगंधादिभिःसंपूज्य अभिमंत्रयेत् ॥ पशुस्त्वं बलिरूपेण मम भाग्यादवस्थितः ॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणं ॥१॥ चंडिकाप्रीतिदानेन दातुरापद्विनाशनं ॥ चामुंडाबलिरूपाय बले तुभ्यं नमोस्तुते ॥२॥ यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयंभुवा ॥ अतस्त्वां घातयाम्यद्य यस्मायज्ञे मता वधः ॥ इति ॥ ततः शस्त्रंगंधादिना संपूज्य अभिमंत्रयेत ॥ ॐऐंह्रींश्रीं रसना त्वं चंडिकायाः सुरलोकप्रसाधकः ॥ इति ह्रांह्रींखड्गआंहुंफट् इति हस्ते शस्त्रं गृहीत्वा ॐ कालिकालिवज्रेश्वरि लोहदंडायै नमः इति

पठन् छित्वा छेदनावसरे न विलोकयेत् ॥ कौशिकि रुधिरेणाप्यायतामिति देव्यै अर्धं निवेद्य अवशिष्टार्धस्य पंचभागान्कृत्वा पूतनायै बलिभागं निवेदयामि चरक्यैबलि० विदार्यै बलि० पापराक्षस्यै बलि० ततो माषपिष्टपशुं शत्रुं शस्त्रेण छित्वा स्कंदाय पश्वर्धं समर्पयामि इति समर्प्य शेषं रक्षोभ्यो हरेत ॥ मंत्रास्तु ॐ ह्रीं स्फुरस्फुरॐक्रींॐहुंफट्मर्दमर्दहुं इति तच्छेदं बहिर्दद्यात् ॥ बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा ॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥१॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः ॥ डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥२॥ जृंभकाः सिद्धगंधर्वाः साध्या विद्याधरा नगाः ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥३॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ॥ माविघ्नं माच मे पापं मासंतु परिपंथिनः ॥ सौम्या भवंतु तृप्तास्ते भूतप्रेताः सुखावहाः ॥४॥ भूतानि यानीह वसंति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तं ॥ अन्यत्र वासं परिकल्पयंतु रक्षंतु मां तानि सदैव चात्र ॥५॥ इति ॥ ततः स्नात्वा कृततिलको देवीं प्रार्थयेत् खड्गिनीशू० इति ५ मंत्राः ॥ शूलेनपा० इति ४ मंत्राः ॥ सर्वस्वरूपे० इति ५ मंत्राः ॥ रूपंदेहिजयंदेहि भगंभवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वं कामांश्च देहि मे ॥ महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ॥ आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तुते ॥ इतिप्रार्थयेत् एतद्बलिदानं होमांगं तच्च होमो-

त्तरमेव ॥ पूजांगं वैकल्पिकं ॥ तत्र च पायस बलिदानमवश्यमेव ॥ इति बलिदानविधिः ॥

॥ अथ सरस्वती पूजनं ॥

ॐनमः पिशाचनिकरंकिनि त्रिशूल खड्गहस्ते सिंहारूढे एह्येहि आगच्छ आगच्छइमांपूजां गृह्णगृह्णस्वाहा श्रीसप्तशतिसरस्वत्यैनम आवाहयामि तत ॐन्ह्रींचडिकायैनमः इति मंत्रेणषोडशोपचारैः पूजयेदिति ॥

सरस्वती पूजनं

Scanned with OKEN Scanner

৫০

Scanned with OKEN Scanner

॥ अथ श्री सप्तशती दुर्गापाठः षोडशांगः ॥

॥ अथ श्रीदुर्गामहाचंडीदेवताया आवाहनं ॥ प्रथमाङ्गं ॥ १

श्री गणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीदुर्गायै नमः ॥ श्रीशिवाम्बायै नमः ॥ ॐ अस्य श्रीमहाकालीमहालक्ष्मीमहासरस्वतीमहाचंडीचामुंडामहाचंडीत्रिगुणात्ममूर्तिदुर्गाम्बाया आवाहनमहामंत्रस्य ॐ श्रीब्रह्मविष्णुमहेश्वरा ऋषयः ॥ ॐ गायत्र्युष्णिगनुष्टुभश्छंदांसि ॥ श्रीत्रिगुणात्मकमूर्ति दुर्गाम्बा देवता ॥ ॐ प्रणवः बीजं ॥ ॐ ह्रीं दुं दुर्गाया शक्तिः ॥ ॐ स्वाहा कीलकं ॥ श्रीत्रिगुणात्मकमूर्तिदुर्गाम्बाया आवाहने विनियोगः ॥

ॐ क्लीं ह्रीं क्लीं ऐं ॐ नमः अंगुष्ठाभ्यां नमः ॐ क्लीं ह्रीं क्लीं ऐं ॐ नमः हृदयाय नमः

,,	तर्जनीभ्यां स्वाहा	,,	शिरसे स्वाहा
,,	मध्यमाभ्यां वषट्	,,	शिखायै वषट्
,,	अनामिकाभ्यां हुं	,,	कवचाय हुं
,,	कनिष्ठिकाभ्यां वौषट्	,,	नेत्रत्रयाय वौषट्
,,	करतलकरपृष्ठाभ्यां फट्	,,	अस्त्राय फट्

ॐ भूर्भुवः स्वरोमिति दिग्बन्धः॥

५२

ॐ क्लीं सिंहस्था शशिशेखरा मरकतप्रख्या चतुर्भिर्भुजैः
शंखं चक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिः शोभिता ॥
आमुक्तांगदहारकंकणरणत्कांचीकणन्नूपुरा
दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुंडला ॥१॥
ॐ क्लीं विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां ।
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥
हस्तैश्चक्रगदासिखेटविशिखां चापं गुणं तर्जनीं ।
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥ ॥२॥
ॐ क्लीं ध्यायेन्नित्यां महादेवीं मूलप्रकृतिमीश्वरीम् ॥३॥
ब्रह्मविष्णुशिवादीनां पूज्यां वंद्यां सनातनीम् ॥४॥
ॐ क्लीं दुर्गे देवि पूजाग्रहणार्थे इहागच्छ दुर्गाम्बे सुरेश्वरि
ॐ क्लीं एह्येहि देवदेवेशि त्रिपुरे देवपूजिते ॥
परामृतप्रिये शीघ्रं सांनिध्यं कुरु सिद्धिदे ॥५॥
ॐ क्लीं सर्वदेवदेवेशि प्रेमभक्तिसुलभे सर्वाभरणसंयुते ॥
यावत्त्वां पूजयिष्यामि प्रथममध्यमोत्तमचरित्रस्य
पारायणेन आराधयामि तावत्त्वं दुर्गाम्बा सुस्थिरा भव ॥६॥

ॐ क्लीं दुर्गे देवि इहागच्छ सानिध्यमिह कल्पय ॥
पूजाग्रहणार्थं त्वं योगिनीकोटिभिः सह ॥७॥
ॐ क्लीं दुर्गे देवि आवाहिता भव ॥ क्लीं स्थापिता भव ॥ क्लीं सन्निरुद्धा भव ॥
ॐ क्लीं श्रीं महाकाली महालक्ष्मी महासरस्वती श्रीमन्महाकालसहिता दक्षिणकालिका महाचंडी चामुंडा त्रिगुणात्मकमूर्तिदुर्गाम्बा सांगा सपरिवारा सायुधा सवाहना सर्वशक्तिसहिता वटुकभैरवसहिता क्लीं सुप्रतिष्ठिता भव ॥ क्लीं वरदा भव ॥ क्लीं सुखशांतिदा भव ॥

योनिमुद्रां प्रदर्श्य ॥

ॐ क्लीं स्वागतं देवदेवेशि मद्भाग्यात्त्वमिहागता ॥
प्राकृतं दृष्ट्वा दुर्गे देवि त्वं मां बालवत् पुत्रवत्परिपालय ॥८॥
ॐ ह्रीं दुं दुर्गा देवी क्लीं ह्रीं क्लीं ऐं क्लीं मम हृदये चिरं तिष्ठ चिरं तिष्ठ दुर्गाम्बा शिवाम्बा सुरेश्वरी ॥
ॐ क्लीं हे मातरस्यामर्चायां सन्निरुद्धा भवाम्बिके ॥
ॐ क्लीं दुर्गाम्बा वटुकभैरवसहिता इहागच्छ त्वत्प्राणाश्चाधःप्राणैः महाच्युते ॥
इहागच्छ दुर्गाम्बा त्वन्निमंत्रेन सर्वशक्तयः ॥९॥
ॐ क्लीं दुर्गाम्बा सर्वेन्द्रियाधिदेवतास्ता इहागच्छतु चंडिके ॥
इहागच्छतु शिवाम्बा सर्वशक्तिसहिता सहेश्वरा ॥१०॥

ॐ क्लीं स्वागतं ते भवत्वंब शिवलोकात् शिवप्रिये ॥
प्रसादं कुरु मां भद्रे भद्रकालि नमोस्तु ते ॥११॥
ॐ क्लीं धन्योहं कृतकृत्योहं सफलं जीवनं मम ॥
आगतासि यतो मातर्माहेश्वरी ममालयं ॥१२॥
ॐ क्लीं हस्तन्यस्तवराम्बुजाभयगदां मुक्ताभृतांभोरुहै-
र्युक्तामम्बुजपुंजपिंजरपरां विद्युत्प्रभासन्निभाम्
प्रातःपूषमयूखमंडलवलद्व्योमानुकारांबरां
लक्ष्यालक्ष्यविलोललोचनवतीमावाहयामीश्वरीम् ॥१३॥
ॐ क्लीं वाणाम्भोरुहपुस्तकाक्षवलयैः स्फूर्जत्कराम्भोरुहै-
र्लीक्षाकौस्तुभशुद्धकाधरदलैर्विभ्राजतीं शारदाम् ॥
वाग्देवीमरविंदसुंदरदृशीं कर्पूरकुंदोज्ज्वलां
दुग्धांभोनिधिसुंदरामरवरामावाहयेद्भारतीम् ॥

॥ इति श्री दुर्गाम्बाया आवाहनं नाम प्रथमांगं १ ॥

॥ अथ श्रीभगवतीस्तुतिः ॥ द्वितीयांगं २ ॥

ॐ क्लीं नमश्चण्डिकायै ॥

ॐ क्लीं या ब्रह्मविष्णुशिववन्दितपादपद्मा क्षेमंकरी स्मरणमात्रत एव तुष्टा ॥
मार्गे गृहे जल्हुताशनशत्रुमध्ये सा चंडिका विपदि रक्षतु सर्वदा माम् ॥१॥
,, लक्ष्मीस्त्वयालंकृतमानवा ये पापैर्विमुक्ता नृपलोकमान्याः ॥
गुणैर्विहीना गुणिनो भवंति दुःशीलिनः शीलवतां वरिष्ठाः ॥२॥
,, लक्ष्मीर्भूषयते रूपं लक्ष्मीर्भूषयते कुलम् ॥
लक्ष्मीर्भूषयते विद्यां सर्वाल्लक्ष्मीर्विशिष्यते ॥३॥
,, लक्ष्मीस्त्वद्गुणकीर्तनेन कमला भूर्यादलं जिह्मतां
रुद्राद्या रविचंद्रदेवपतयो वक्तुं च नैव क्षमाः ॥
अस्माभिस्तव रूपलक्षणगुणान्वक्तुं कथं शक्यते
मातर्मां परिपाहि विश्वजननी कृत्वा ममेष्टं ध्रुवम् ॥४॥
ॐ क्लीं गं क्लीं ॐ नमः खड्गचक्रगदाबाणचापानि परिघं तथा ॥
शूलं भुशुंडीं च शिरः शंखं संदधतीं करैः ॥५॥
महाकालीं त्रिनयनां नानाभूषणभूषितां ॥
नीलांजनसमप्रख्यां दशपादाननां भजे ॥६॥

॥५॥

मधुकंटभनाशार्थं यां तुष्टावांबुजासनः ॥
ॐ क्लीं ऐं क्लीं ॐ नमः ॥
ॐ क्लीं जातवेदसे सुनवाम सोममरातियतो निदहाति वेदः ॥
सनः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः ॥७॥
ॐ क्लीं तामग्निवर्णां तपसा ज्वलंती वैरोचनीं कर्मफलेषु जुष्टाम् ॥
दुर्गां देवीं शरणमहं प्रपद्ये सुतरसितरसे नमः सुतरसितरसे नमः ॥८॥
ॐ क्लीं दुर्गा दुर्गेषु स्थानेषु शन्नो देवीरभिष्टये ॥
" दुर्गेषु विषमे घोरे संग्रामे रिपुसंकटे ॥९॥
" दुर्गेषु विषमेषु त्वं संग्रामेषु वनेषु च ॥
" तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् ॥१०॥
ॐ हँ क्षँ क्लीं ऐं क्लीं ह्रीं क्लीं क्षँ हँ ॐ नमः ॥
ॐ क्लीं शुद्धस्फटिकसंकाशां शुद्धसत्त्वस्वरूपिणीम् ॥
परमानंदरूपां च शिवां पद्मां सनातनीम् ॥११॥
ॐ क्लीं परब्रह्मस्वरूपां च निर्वाणपददायिनीम् ॥
ब्रह्मतेजोमयीं शक्तिं महादेवीं शिवां शंकरीम् ॥१२॥
ॐ क्लीं सर्वसिद्धिप्रदां देवीं परमां योगरूपिणीम् ॥

कालीं कृष्णरूपां कृष्णतुल्यां कृष्णां कृष्णस्वरूपिणीम् ॥१३॥
ॐ क्लीं कृष्णभावनया शश्वत्कालीं कृष्णवर्णां सनातनीम् ॥
संहर्तुं सर्वब्रह्मांडं कालिकां कालरूपिणीम् ॥१४॥
,, सा शिवा परमा देवी परब्रह्मस्वरूपिणी ॥
सा शिवा च महादेवी शिवा शिवस्वरूपिणी ॥१५॥
,, शुद्धस्फटिकसंकाशः शतकोटिरविप्रभः ॥
त्रिशूलपट्टिशधरो व्याघ्रचर्माम्बरो हरः ॥१६॥
,, नमो देव्यै महादेव्यै सिद्ध्यै शांत्यै नमोनमः ॥
शुद्धसत्त्वस्वरूपायै शिवायै च नमोनमः ॥१७॥
,, शांतिकरी पुष्टिकरी भगवती माहेश्वरी ॥
पराशक्तिर्महादेवी सर्वत्र शांतिं करोतु मे ॥१८॥
,, पार्वती पररूपा च परब्रह्मस्वरूपिणी
पार्वती परमा विद्या ब्रह्मविद्याप्रदायिनी ॥१९॥

॥ इति श्री भगवती स्तुतिः द्वितीयांगं २ ॥

॥ अथ महालक्ष्मी हृदयस्तुतिः द्वितीयं द्वितीयांगं २ ॥

ॐ क्लीं वंदे लक्ष्मीं परशिवमयीं शुद्धजाम्बूनदाभां
तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलांगीम् ॥
बीजापूरं कनककलशं हेमपद्मं दधानां
आद्यां शक्तिं सकलजननीं विष्णुवामांकसंस्थाम् ॥२०॥

ॐ क्लीं श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीम् ॥
सर्वकामफलावाप्तिसाधनैकसुखावहाम् ॥२१॥

ॐ क्लीं शांत्यै नमोस्तु शरणागतरक्षणायै ॐ कांत्यै नमोस्तु कमनीयगुणाश्रयायै ॥

ॐ क्लीं ॐ क्षांत्यै नमोस्तु दुरितक्षयकारणायै ॐ धात्र्यै नमोस्तु धनधान्यसमृद्धिदायै ॥२२॥

ॐ क्लीं शक्त्यै नमोस्तु शशिशेखरसंयुतायै ॐ रत्यै नमोस्तु रजनीकर सोदरायै ॥
ॐ भक्त्यै नमोस्तु भवसागरतारिकायै ॐ मत्यै नमोस्तु मधुसूदन वल्लभायै ॥२३॥

ॐ क्लीं लक्ष्म्यै नमोस्तु शुभलक्षणलक्षितायै ॐ सिद्ध्यै नमोस्तु शिवसिद्ध सुपूजितायै ॥

॥८॥

ओं धृत्यै नमोस्त्वमितदुर्गतिभंजनायै ओं गत्यै नमोस्तु वरसद्गतिदायिकायै ॥२४॥
ॐ क्लीं देव्यै नमोस्तु दिवि देवगणार्चितायै ओं भूत्यै नमोस्तु भुवनार्तिविनाशनायै ॥
ओं दात्र्यै नमोस्तु धरणीधरवल्लभायै ओं पुष्ट्यै नमोस्तु पुरुषोत्तमवल्लभायै ॥२५॥
ॐ क्लीं सुतीव्रदारिद्र्यविदुःखहंत्र्यै नमोस्तु ते सर्वभयापहन्त्र्यै ॥
ओं श्रीविष्णुवक्षःस्थलसंस्थितायै ओं नमोनमः सर्वविभूतिदायै ॥२६॥
ओं महालक्ष्म्यै नमोनमः ॥

ॐ क्लीं जयति जयति लक्ष्मीर्लक्षणालंकृतांगी
ओं जयति जयति पद्मा पद्मसद्माभिवंद्या ॥
ओं जयति जयति विद्या विष्णुवामांकसंस्था
ओं जयति जयति सम्यक् सर्वसंपत्करी श्रीः ॥२७॥
ॐ क्लीं जयति जयति देवी देवसंघाभिपूज्या
ओं जयति जयति भद्रा भार्गवी भाग्यरूपा ॥
ओं जयति जयति नित्या निर्मलज्ञानरूपा
ओं जयति जयति शुक्ला निर्मलज्ञानवेद्या ॥
ओं जयति जयति सत्या सर्वभूतांतरस्था ॥२८॥
ओं क्लीं जयति जयति रामा रत्नगर्भान्तरस्था

Scanned with OKEN Scanner

६०

ओं जयति जयति शुभ्रा शुद्धजाम्बूनदाभा ॥
ओं जयति जयति कांता कांतिमद्भासितांगी
ओं जयति जयति शांता शीघ्रमागच्छ सौम्ये ॥२९॥

ओं यं हं कं लं पं श्रीं

ॐ क्लीं ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासां
विद्युद्वर्णाम्बरवरधरां भूषणाढ्यां सुशोभां ॥
बीजापूरं सरसिजयुगं बिभ्रतीं स्वर्णपात्रं
भर्त्रा युक्तां मुहुरभयदां मह्यमप्यच्युतश्रीः ॥३०॥

ओं क्लीं गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो
हरेः पत्नीं पद्मां हरसहचरीमाद्रितनयाम् ॥
तुरीया कापि त्वं दुरधिगमनिःसीममहिमा
महामाये विश्वं भ्रमयसि परब्रह्ममहिषी ॥३१॥

ॐ क्लीं निधे नित्यस्मेरे निरवधिगुणे नीतिनिपुणे
निराघातज्ञाने नियमपरचित्तैकनिलये ॥
नियत्या निर्मुक्ते निखिलनिगमान्तस्तुतिपदे
निरांतके नित्ये निगमय ममापि स्तुतिमिमां ॥३२॥

॥१०॥

६१

ॐ क्लीं प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चंद्रोपलजललवैरर्घ्यघटना ॥
स्वकीयैरंभोभिः सलिलनिधिसौहित्यकरणं
त्वदीयाभिर्वाग्भिस्तव जननि वांचां स्तुतिरियं ॥३३॥

ओं क्लीं दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा
दवीयांसं दीनं श्नपय कृपया मामपि शिवे ॥
अनेनायं धन्यो भवति च न ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥३४॥

ॐ क्लीं शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां
वरत्रासत्राणस्फटिकघुटिकां पुस्तककरां ॥
सकृन्नत्वा न त्वां कथमिव सतां संनिदधते
मधुक्षीरद्राक्षामधुरिमधुरीणां भणितयः ॥३५॥

ॐ क्लीं कवीन्द्राणां चेतः कमलवनबालातपरुचिं
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीम् ॥
विरिंचिप्रेयस्यास्तरलतरशृंगारलहरी
गर्भाराभिर्वाग्भिर्विदधति सतां रंजनममी ॥३६॥

ओं क्लीं सवित्रीभिर्वाचां शशिमणिशिलाभंगरुचिभि–
र्वशीन्याद्याभिस्त्वां सह जननि संचिन्तयति यः ॥
स कर्ता काव्यानां भवति वचसां भंगिसुभगै
र्वचोभिर्वाग्देवीवदनकमलामोदमधुरैः ॥३७॥

ॐ क्लीं भवानि त्वद्दासे मयि वितर दृष्टिं सकरुणा–
मिति स्तोतुं वांछन्कथयति भवानि त्वमिति यः ॥
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं
मुकुन्द ब्रह्मेन्द्रस्फुटमुकुटनीराजितपदं ॥३८॥

ॐ क्लीं हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं
पुरा नारीभूत्वा पुररिपुमपि क्षोभमनयत् ॥
स्मरोपि त्वां नत्वा रतिनयनलेह्येन वपुषा
मुनीनामप्यंतः प्रभवति हि मोहाय महतां ॥३९॥

ॐ क्लीं सुधासिंधोर्मध्ये सुरविटपिवाटीपरिवृते
मणिद्वीपे नीपोपवनवति चिंतामणिगृहे ॥
शिवाकारे मंचे परमशिवपर्यंकनिलयां
भजंति त्वां धन्याः कतिचन चिदानन्दलहरीम् ॥४०॥

ॐ क्लीं महीं मूलाधारे किमपि मणिपूरे हुतवहं
स्थितिं स्वाधिष्ठाने हृदि विकचमाकाशमुपरि ॥
मनोऽपि भ्रूमध्ये सकलमपि जित्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥२१॥

ॐ क्लीं सुधाधारासारैश्चरणयुगलान्तर्विगलितैः
प्रपंचं सिंचंती पुनरपि रसाम्नाय महसा
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुंडे कुहरिणी ॥२२॥

ॐ क्लीं चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिरपि
प्रभिन्नाभिः शंभोर्नवभिरिति मूलप्रकृतिभिः ॥
त्रयश्चत्वारिंशद्वसुदलकलाब्जत्रिवलय-
त्रिरेखाभिः सार्धं तव भवनकोणाः परिणताः ॥२३॥

॥ ॐ वषट् वौषट् क्ली ऐं क्ली ह्रीं क्लीं ह्रूं फट् स्वाहा ॥

ॐह्रींक्लींऐंॐ शंखादिचापकरभिन्नकरां त्रिनेत्रां तिग्मेतरांशुकलया विलसत्किरीटां ॥
सिंहस्थितां सकलसिद्धनतां च दुर्गां दुर्गाभिधां दुरितवर्गहरां नमामि ॥२४॥

ॐ ऐं क्लीं ह्रीं ॐ नमः

ॐ ह्रीं ऐं. क्लीं कल्याणी कमनीये च माये माकाम्बिके शिवे ॥
सत्ये नित्ये सदानंद नारायणि नमोस्तुते ॥ क्लींऐंह्रीं ॐनमः ॥

ॐऐंह्रींक्लीॐ दशपादाम्बुजां देवीं दशमंडलपूजिताम् ॥
दशाननां त्रिनेत्रां च समुन्नतपयोधराम् ॥ ,, ,, ॥
,, रक्तवस्त्रपरीधानां रक्तगंधानुलेपनाम् ॥
एवं ध्यात्वा महाज्वालां महिषासुरमर्दिनीम् ॥ ,, ,, ॥
,, महासिंहसमासीनां सर्वालंकारभूषणाम् ॥
अष्टमातृकमध्यस्थां अष्टभैरवपूजिताम् ॥ ,, ,, ॥
,, चिंतामणिनिभां दुर्गा सर्वशत्रुविनाशिनीम् ॥
दुःखदारिद्र्यनाशां च सर्व संकटवारिणीम् ॥ ,, ,, ॥

॥ ॐ दुर्गाम्बाये नमोनमः ॥

॥ अथ दुर्गा स्तुतिः ॥

ॐ क्लीं स्तोष्यामि प्रयतो देवीं शरण्यां बह्वृचप्रियाम् ॥
सहस्रसंमितां दुर्गां जातवेदसे सुनवाम सोममरातियतो निदहाति वेदः ।
सनः पर्षदतिदुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः ॥ १ ॥

ॐ क्लीं शांत्यर्थं तद्द्विजातीनां ऋषिभिः सोमपाश्रिताः ॥
ऋग्वेदे त्वं समुत्पन्नाऽरातियतो निदहाति वेदः ॥ २ ॥
" ये त्वां देवि प्रपद्यंति ब्राह्मणा हव्यवाहिनीम् ॥
अविद्या बहुविद्या वा सनः पर्षदतिदुर्गाणि विश्वा ॥ ३ ॥
येऽग्निवर्णां शुभां सौम्यां कीर्तयिष्यंति ये द्विजाः ॥
तां तारयति दुर्गाणि नावेव सिंधुं दुरितात्यग्निः ॥ ४ ॥
" दुर्गेषु विषमे घोरे संग्रामे रिपुसंकटे ॥
अग्निचोरनिपातेषु दुष्टग्रहनिवारणी दुष्टग्रहनिवारिण्यैं नमः ॥ ५ ॥
" दुर्गेषु विषमेषु त्वां संग्रामेषु वनेषु च ॥
मोहयित्वा प्रपद्यंते तेषां मे अभयं कुरु तेषां मे अभयं कुर्वों नमः ॥ ६ ॥
" केशिनी सर्वभूतानां पंचमीति च नाम च
सा मां समा निशा देवी सर्वतः परिरक्षतु सर्वतः परिरक्षत्वों नमः ॥ ७ ॥
" तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टाम् ॥
दुर्गां देवीं शरणमहं प्रपद्ये सुतरसितरसे नमः सुतरसितरसे नमः ॥ ८ ॥
" दुर्गा दुर्गेषु स्थानेषु शन्नो देवीरभिष्टये क्लीं ॐ नमः ॥ ९ ॥

॥ इति श्री भगवतीस्तुतिः द्वितीयांग २ ॥

॥ अथ श्रीनवार्णन्यासः तृतीयांगम् ३ ॥

ॐ अस्यश्रीनवार्णमहामंत्रस्य ॐ ब्रह्मविष्णुमहेश्वरा ऋषयः ॥ ॐ गायत्र्युष्णिगनुष्टुभश्छंदांसि ॥ ॐ श्री महाकाली महालक्ष्मी महासरस्वती देवताः ॥ ऐं बीजं ॥ ह्रीं शक्तिः ॥ क्लीं कीलकं ॥ श्री महाकाली महालक्ष्मी महासरस्वती त्रिगुणात्मकमूर्तिदुर्गाम्बाप्रीत्यर्थं नवार्णन्यासे विनियोगः ॥

ॐ ऐं अंगुष्ठाभ्यां हृदयाय नमः ॥
ॐ ह्रीं तर्जनीभ्यां शिरसे स्वाहा ॥
ॐ क्लीं मध्यमाभ्यां शिखायै वषट् ॥
ॐ चामुण्डायै अनामिकाभ्यां कवचाय हुं ॥
ॐ विच्चे कनिष्ठिकाभ्यां नेत्रत्रयाय वौषट् ॥
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां अस्त्राय फट् ॥

ॐ ऐं नमः शिखायां ॥ ॐ ह्रीं नमः दक्षनेत्रे ॥ ॐ क्लीं नमः वामनेत्रे ॥ ॐ चां नमः दक्षकर्णे ॥ ॐ मुं नमः वामकर्णे ॥ ॐ डां नमः दक्षनासायां ॥ ॐ यैं नमः वामनासायां ॥ ॐ विं नमः मुखे ॥ ॐ च्चें नमः गुह्ये ॥

ॐ ऐं प्राच्यै नमः ॥ ॐ ऐं आग्नेय्यै नमः ॥ ॐ ह्रीं दक्षिणायै नमः ॥

ॐ ह्रीं नैर्ऋतये नमः ॥ ॐ क्लीं प्रतीच्यै नमः ॥ ॐ क्लीं वायव्यै नमः ॥ ॐ क्लीं चामुंडायै उर्दीच्यै नमः॥ ॐ क्लीं विच्चे ईशान्यै नमः॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऊर्ध्वायै नमः ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे भूम्यै नमः

ॐ ऐं नमः हृदयाय नमः॥ ॐ ह्रीं नमः शिरसे स्वाहा॥ ॐ क्लीं नमः शिखायै वषट्॥ ॐ चामुंडायै नमः कवचाय हुं ॥ ॐ विच्चे नमः नेत्रत्रयाय वौषट्॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः अस्त्राय फट् ॥

ॐ अं क्लींह्रींऐं अं नमः शिरसि ॥	ॐ एं क्लींह्रींऐं एं नमः ऊर्ध्वोष्ठे ॥
ॐ आं ,, आं ,, ललाटे ॥	ॐ ऐं ,, ऐं ,, अधरोष्ठे ॥
ॐ इं ,, इं ,, दक्षनेत्रे ॥	ॐ ओं ,, ओं ,, ऊर्ध्वदंतपंक्तौ॥
ॐ ईं ,, ईं ,, वामनेत्रे ॥	ॐ औं ,, औं ,, अधोदंतपंक्तौ॥
ॐ उं ,, उं ,, दक्षकर्णे ॥	ॐ अं ,, अं ,, जिह्वायां ॥
ॐ ऊं ,, ऊं ,, वामकर्णे ॥	ॐ अः ,, अः ,, ग्रीवायां ॥
ॐ ऋं ,, ऋं ,, दक्षनासापुटे॥	ॐ कं ,, कं ,, दक्षकरमूले ॥
ॐ ॠं ,, ॠं ,, वामनासापुटे ॥	ॐ खं ,, खं ,, दक्षकूर्परे ॥
ॐ लृं ,, लृं ,, दक्षगंडे ॥	ॐ गं ,, गं ,, दक्षमणिबंधे॥
ॐ लॄं ,, लॄं ,, वामगंडे ॥	ॐ घं ,, घं ,, दक्षकरांगुलिमूले॥

ॐ ङं क्लींह्लींएं ङं नमः दक्षकरांगुल्यग्रे ॥
ॐ चं ,, चं ,, वामकरमूले ॥
ॐ छं ,, छं ,, वामकूर्परे ॥
ॐ जं ,, जं ,, वाममणिबन्धे ॥
ॐ झं ,, झं ,, वामकरांगुलिमूले ॥
ॐ ञं ,, ञं ,, वामकरांगुल्यग्रे ॥
ॐ टं ,, टं ,, दक्षपादमूले ॥
ॐ ठं ,, ठं ,, दक्षजानुनि ॥
ॐ डं ,, डं ,, दक्षगुल्फे ॥
ॐ ढं ,, ढं ,, दक्षपादांगुलिमूले॥
ॐ णं ,, णं ,, दक्षपादांगुल्यग्रे ॥

ॐ तं क्लींह्लींएं तं नमः वामपादमूले ॥
ॐ थं " थं " वामजानुनि ॥
ॐ दं " दं " वामगुल्फे ॥
ॐ धं " धं " वामपादांगुलिमूले॥
ॐ नं " नं " वामपादांगुल्यग्रे ॥
ॐ पं " पं " दक्षपार्श्वे ॥
ॐ फं " फं " वामपार्श्वे ॥
ॐ बं " बं " पृष्ठे ॥
ॐ भं " भं " नाभौ ॥
ॐ मं " मं " उदरे ॥
ॐ यं " यं "त्वगात्मनेनमोहृदये॥

ॐ रं क्लींह्लींएं रं ,, असृगात्मने नमः दक्षांसे ॥
ॐ लं ,, लं ,, मांसात्मने नमो वामांसे ॥
ॐ वं ,, वं ,, मेदात्मने नमः ककुदि ॥
ॐ शं ,, शं ,, अस्थ्यात्मने नमो हृदयादि दक्षहस्ताग्रांतं ॥
ॐ षं ,, षं ,, मज्जात्मने नमो हृदयादि वामहस्ताग्रांतं ॥

ॐ सं क्लीं ह्रीं ऐं सं नमः शुक्रात्मने नमो हृदयादि दक्षपादाग्रान्तं ॥
ॐ हं ,, हं नमः प्राणात्मने नमो हृदयादि वामपादाग्रान्तं ॥
ॐ ळं ,, ळं नमः शक्त्यात्मने नमो हृदयाद्गुदान्तं ॥
ॐ क्षं ,, क्षं नमः चामुंडायै क्रोधात्मने नमो हृदयादि मुखांतं ॥
ॐ क्लीं ह्रीं ऐं चामुंडायै विच्चे ऐं ह्रीं क्लीं सर्वांगे न्यसेत् ॥ इति प्रथम न्यासः ॥१॥

अथ द्वितीयः सारस्वतन्यासः ॥ ॐ ऐं ह्रीं क्लीं नमः कनिष्ठिकाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं नमोऽनामिकाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं नमो मध्यमाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं नमो तर्जनीभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं नमोऽङ्गुष्ठाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं नमः करमध्ये ॥ ॐ ऐं ह्रीं क्लीं नमः करपृष्ठयोः ॥ ॐ ऐं ह्रीं क्लीं नमो मणिबन्धे ॥ ॐ ऐं ह्रीं क्लीं नमो हृदये ॥ ॐ ऐं ह्रीं क्लीं नमः शिरसि ॥ ॐ ऐं ह्रीं क्लीं नमः शिखायाम् ॥ ॐ ऐं ह्रीं क्लीं नमः कवचे ॥ ॐ ऐं ह्रीं क्लीं नमो नेत्रयोः ॥ ॐ ऐं ह्रीं क्लीं नमोऽस्त्रायफट् ॐ ऐं ह्रीं क्लीं नमः पूर्वे ॥ ॐ ऐं ह्रीं क्लीं नमः आग्नेये ॥ ॐ ऐं ह्रीं क्लीं नमो दक्षिणे ॥ ॐ ऐं ह्रीं क्लीं नमो नैर्ऋत्ये ॥ ॐ ऐं ह्रीं क्लीं नमः पश्चिमे ॥ ॐ ऐं ह्रीं क्लीं नमो वायव्ये ॥ ॐ ऐं ह्रीं क्लीं नमः उत्तरे ॥ ॐ ऐं ह्रीं क्लीं नमः ईशाने ॥ ॐ ऐं ह्रीं क्लीं नमः ऊर्ध्वे ॥ ॐ ऐं ह्रीं क्लीं नमोऽधः ॥ ॐ एवं सारस्वतन्यासे महत्यस्मिन्कृतेसति ॥ दुरितं विलयं याति जाड्यं प्राक् पाप संभवम ॥ इति द्वितीयः सारस्वतो न्यासः ॥२॥

अथ तृतीयो मातृगणन्यासः ॥ ॐ ह्रीं ब्रह्माणी मां पूर्वतः पातु ॥ ॐ ह्रीं माहेश्वरी मामाग्नेय्यां पातु ॥ ॐ ह्रीं कौमारी मां दक्षिणे पातु ॥ ॐ ह्रीं वैष्णवी मां नैऋत्ये पातु ॥ ॐ ह्रीं वज्रवाराही मां पश्चिमे पातु ॥ ॐ ह्रीं रुद्राणी मां वायव्ये पातु । ॐ ह्रीं चामुण्डा मामुत्तरे पातु ॥ ॐ ह्रीं चण्डिका मामीशाने पातु ॥ ॐ ह्रीं व्योमेश्वरी मामूर्ध्वं पातु ॥ ॐ ह्रीं सप्तद्वीपेश्वरी मामधः पातु ॥ ॐ ह्रीं नागेश्वरी मां पाताले पातु ॥ तृतीयं मातृगणन्यासं कृत्वा तु निर्भयं जायते ॥ त्रिषु लोकेषु सर्वप्रियो भवेत ॥ इति तृतीयो मातृगणन्यासः ॥३॥

अथ चतुर्थःषड्देवीन्यासः ॥ ॐ कमलाङ्कुशमण्डितानन्दजा पूर्वाङ्गं पातु ॥ ॐ खड्गपात्रधरारक्तदन्तिका दक्षिणाङ्गं पातु ॥ पुष्पपल्लवमूलादिधारिणी शाकंभरी पश्चिमाङ्गं पातु ॥ ॐ धनुर्बाणधरा दुर्गार्तिहारिणी दुर्गा वामाङ्गं पातु ॥ ॐ शिरः पात्रधराभीमा मस्तकाच्चरणान्तं पातु ॥ ॐ चित्रकान्तिभृद्भ्रामरी चरणाभ्यां शिरः पर्यन्तं पातु ॥ ॐ अनेनन्यासयोगेन जरामृत्युविवर्जितः ॥ निर्भयश्चाग्निचौराभ्यां मानुतस्तरक्षणोभवेत ॥ इति चतुर्थः षड्देवीन्यासः ॥४॥

अथ पञ्चमो ब्रह्मादिन्यासः ॥ ॐ ब्रह्मासनातनः पादादिनाभिपर्यन्तं पातु ॥ ॐ जनार्दनो नाभेर्विशुद्धिपर्यन्तं पातु ॥ ॐ रुद्रस्त्रिलोचनो विशुद्धेः शिखापर्यन्तं पातु ॥ ॐ हंसः पादद्वयं पातु ॥ ॐ वैनतेयः करद्वयं पातु ॥ ॐ वृषभश्चक्षुषी पातु ॥ ॐ

गजाननः सर्वाङ्गं पातु ॥ ॐ आनंदमयो हरिः परापरदेहभागो मांपातु ॥ ॐ अभेद्यः पंचमोन्यासः कर्तुः कामदुघाफलम् ॥ महापापोपपापानां प्रायश्चित्तमिदं भवेत् ॥ इति पञ्चमः ॥५॥

अथ षष्ठो लक्ष्म्यादिन्यासः ॥ ॐ अष्टादशभुजामहालक्ष्मीर्मध्यं पातु ॥ ॐ अष्टभुजा महासरस्वत्युर्ध्वं पातु ॥ ॐ त्रिंशल्लोचनमण्डिता महाकाल्यधः पातु ॥ ॐ सिंहो हस्तद्वयं पातु ॥ ॐ परमहंसोऽक्षिमंडलं पातु ॥ ॐ महिषेण समायुक्तो यमः पादद्वयं पातु ॥ ॐ महेशानी सर्वाङ्गं पातु ॥ ॐ चण्डिका शरीरमुत्कृष्टं पातु ॥ महपापोपपापानां प्रायश्चित्तमिदं भवेत् ॥ वैकुण्ठसुखदन्यासः षष्ठः कष्टापशान्तये ॥ इति षष्ठो लक्ष्म्यादिन्यासः ॥६॥

अथ सप्तमो मन्त्रबीजन्यासः ॥ ॐ ऐं नमो ब्रह्मरन्ध्रे ॥ ॐ ह्रीं नमो दक्षनेत्रे ॥ ॐ क्लीं नमो वामनेत्रे ॥ ॐ चां नमो दक्षकर्णे ॥ ॐ मुं नमो वामकर्णे ॥ ॐ डां नमो दक्षनासापुटे ॥ ॐ यें नमो वामनासापुटे ॥ ॐ विं नमो मुखे ॥ ॐ च्चें नमो गुह्ये ॥ रोगक्षयकरः सप्तमन्यासः ॥ इति बीजन्यासः सप्तमः ॥७॥

अथ अष्टमो न्यासः॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चेनमः पादयोः ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चेनमः पायौ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो लिङ्गे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो मुखे॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो दक्षनासापुटे॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै

कर्मारंभ एकादश न्यासः ३ अंग.

विच्चेनमो वामनासापुटे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो दक्षनेत्रे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो वामनेत्रे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो दक्षकर्णे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो वामकर्णे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो ब्रह्मरन्ध्रे ॥ न्यासद्वयमिदंप्रोक्तं सुगोप्योसप्तमाष्टमौ ॥ महाभयमहाव्याधिशत्रुचोराग्निघातकौ ॥ इत्यष्टमो न्यासः ॥८॥

अथ नवमो मन्त्रन्यासः ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो मूर्द्धनि ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो मुखे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो हृदये ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो गुह्ये ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमः पादयोः ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो गुह्ये ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो हृदि ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो मुखे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो मूर्द्धनि ॥ महारक्षोगणानां च कल्पान्ताग्निसमो भवेत् ॥ अस्मिन्न्यासे कृते चैव नवमे देववद्भवेत् ॥ इति नवमो मन्त्रन्यासः ॥९॥

अथ दशमोन्यासः ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चेनमो हृदयाय नमः ॥ ॐ ऐं ह्रीं क्लीं चामुंडाय विच्चेनमः शिरसेस्वाहा ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमः शिखायैवषट् ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमः कवचायहुं ॥ ॐ ऐं ह्रीं क्लीं चामु-

ण्डायै विच्चे नमो नेत्रत्रयाय वौषट् ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमःअस्त्रायफट् ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमः पूर्वे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमः आग्नेये ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो दक्षिणे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो नैर्ऋत्ये ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमः पश्चिमे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमो वायव्ये ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनम उत्तरे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनम ईशान्ये ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नम ऊर्ध्वे ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेनमःअधः ॥ इति त्रैलोक्य वशंकरो दशमो न्यासः ॥१०॥

अथैकादशमो न्यासः ॥ ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शङ्खिनी चापिनी बाणभुशुण्डी परिघायुधा ॥ हृदयाय नमः ॥ ॐ सौम्या सौम्यतराशेष सौम्येभ्यस्त्वतिसुन्दरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥ शिरसे स्वाहा ॥ ॐ यच्च किंचित्क्वचिद्वस्तु सदसद्वाऽखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ॥ शिखायै वषट् ॥ ॐ यया त्वया जगत्स्रष्टा जगत्पातात्ति यो जगत् ॥ सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ कवचाय हुं ॥ ॐ विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥ नेत्रत्रयाय वौषट् ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते ॥ अस्त्राय फट् ॥ ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शङ्खिनी चा-

पिनी बाणभुशुण्डी परिघायुधा ॥ हृदि ॥ ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ गुह्ये ॥ ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥ यानि चात्यर्थघोराणि तैरक्षास्मांस्तथा भुवम् ॥ दक्षपादे ॥ ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥ करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः ॥ वामपादे ॥ ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते ॥ शिरसि ॥ ॐ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥ पातु नः सर्वभीतिभ्यः कात्यायनि नमोस्तुते ॥ मुखे ॥ ॐ ज्वालाकरालमत्युग्रमशेषाऽसुरसूदनम् ॥ त्रिशूलं पातु नो भितेर्भद्रकालि नमोस्तुते ॥ दक्षभुजे ॥ ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य्य या जगत् ॥ सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥ वामभुजे ॥ ॐ असुरासृग्वसापङ्कचर्चितस्ते करोज्वलः ॥ शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥ हृदये ॥ सर्वानिष्टहरः सर्वाभीष्टदः सर्वरक्षाकरश्चैकादशः ॥ इत्येकादशमोन्यासः ॥११॥

अथ ध्यानम् ॥ ॐ अस्य श्रीदेवीमाहात्म्य सप्तशतिकाध्यान मन्त्रस्य मार्कण्डेय सुमेधो ब्रह्मविष्णुरुद्रा ऋषयः ॥ गायत्र्युष्णिगनुष्टुप्जगतीशक्वरीतिनानाविधानि छन्दांसि ॥ मधुकैटभ महिषासुर धूम्रलोचन चण्डमुण्ड रक्तबीज निशुम्भशुम्भ मर्दिनीत्यष्टमातृकासहित श्रीमहाकाली श्रीमहालक्ष्मी श्रीमहासरस्वती प्रधानदेवताः ॥

ऐंबीजं ॥ ह्रींशक्तिः ॥ क्लींकीलकं सप्तशतिका ध्यान स्तोत्रजपे विनियोगः ॥ बीजयत्रयेण षडङ्गन्यासः ॥ ॐ ऐं ह्रीं क्लीं नमः हृदयाय नमः ॥ ॐ ऐं ह्रीं क्लीं नमः शिरसे स्वाहा ॥ ॐ ऐं ह्रीं क्लीं नमः शिखायैवषट् ॥ ॐ ऐं ह्रीं क्लीं नमः कवचायहुं ॥ ॐ ऐं ह्रीं क्लीं नमो नेत्रत्रयाय वौषट् ॥ ॐ ऐं ह्रीं क्लीं नमोऽस्त्रायफट् ॥ महिषघ्नी महामाये चामुण्डेमुण्डमालिनि ॥ काम्यादि चिन्तितं देहि देहिमे ब्रह्मचारिणि ॥१॥ अष्टाभुजाङ्गीं महिषस्य मर्दिनीं सशङ्खचक्रां शरशूलधारिणीं ॥ त्वां दिव्ययोनिं सहजातवेदसीं दुर्गां सदाहं शरणं प्रपद्ये ॥२॥ ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लीलया ॥ कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥ वाराही घनघोरघुर्घुरमुखी चैन्द्री सुरैरर्चिता ॥ चामुण्डा गणनाथरुद्रसहिता रक्षन्तुमां मातरः ॥३॥ उद्धृता मधुकैटभौ महिषासुरश्च निहत्य तौ धूम्रलोचन चण्डमुण्डक रक्तबीज मुख्यांश्चतान् ॥ दुष्ट शुम्भ निशुम्भ मर्दिनि वन्दितेऽमरवन्दिते विष्णुपत्रयतुष्टिकारिणि भद्रकालि नमोस्तुते ॥४॥ लक्ष्मीप्रदानसमये नवविद्रुमाभा विद्याप्रदानसमये शरदिन्दुशुभ्रा ॥ विद्वेषवर्गनिधनेतितमालनीला देवीं त्रिलोकजननीं शरणं प्रपद्ये ॥५॥ महिषमस्तक नृत्यविनोदिनी स्फुटरणन्मणिनूपुरचारिणी ॥ सुजनरक्षणमोक्षविधायिनी जयतु शुम्भनिशुम्भविमर्दिनी ॥६॥ मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे हेलानिर्जितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ॥ निःशेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे शु-

म्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेंऽम्बिके ॥७॥ या देवी मधुकैटभप्रमथिनी यामाहिषोन्मूलिनी या धूम्रेक्षणचण्डमुण्डमथिनी या रक्तबीजाशिनी ॥ शक्तिः शुम्भनिशुम्भदैत्यमथिनी या सिद्धलक्ष्मीः परा ॥ सा देवी नवकोटिमूर्त्तिसहिता मां पाहि विश्वेश्वरी ॥८॥ शङ्खादिचापकरभिन्नकरां त्रिनेत्रां तिग्मेतरांशुकलया विलसत्किरीटाम् ॥ सिंहस्थितां ससुरसिद्धनतां च दुर्गां दुर्गानिभां दुरितवर्गहरां नमामि ॥९॥ सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामनीसन्निभाम् ॥ शङ्खंचक्रवराभयानिदधतीमिन्दोः कलां बिभ्रतीम ॥ ग्रैवेयाङ्गदचारुकुण्डलधरामाखण्डलाद्यैः स्तुताम् ॥ ध्याये विन्ध्यनिवासिनीं शशिमुखीं पार्श्वस्थपञ्चाननाम् ॥१०॥ कल्याणि कमनीये च मायेमाकाम्बिके शिवे ॥ सत्ये नित्ये सदानन्दे नारायणि नमोऽस्तु ते ॥११॥ चन्द्रहासं त्रिशूलं च शङ्खचक्रगदायुधान् ॥ धनुर्बाणं च मुसलं पिङ्गलं मुष्टिमेवच ॥१२॥ वज्रायुधं च कुन्तं च खट्वांगं च हलायुधम् ॥ द्राणं छुरिकामश्वगं च तोमरं पानपात्रकम् ॥१३॥ पट्टिशं दण्डं नागं च चक्रदण्डभुशुण्डिभृत् ॥ दर्पणंरुद्रवीणां च पाशाङ्कुशौ च पार्श्वयोः ॥१४॥ दशपादाम्बुजां देवीं दशमण्डलपूरिताम् ॥ दशाननां त्रिनेत्रां च समुन्नतपयोधराम् ॥१५॥ रक्तवस्त्रपरिधानां रक्तगन्धानुलेपनाम् ॥ एवं ध्यात्वा महाज्वालां महिषासुरमर्दिनीम् ॥१६॥ महासिंहसमासीनां सर्वालंकारभूषणाम् ॥ अष्टमातृकमध्यस्थामष्टभैरवपूजिताम् ॥ १७ ॥ चिन्तामणिनिभां दुर्गां सर्वशत्रुविनाशिनीम् ॥

सर्वदारिद्र्यनाशां चसर्वदुःख निवारिणीम् ॥१८॥ ब्रह्माण्डेष्वेकजिह्वान्तां महाव-क्त्र करालिनीम ॥ शुभायुतभुजां भीमां नानाशस्त्रास्त्रधारिणीम् ॥ १९ ॥ नीलवस्त्र धरां चण्डां भीषणामतिभैरवाम् ॥ सम्पूर्णयौवनां लक्ष्मीं कालिकां कमलाननाम् मधुकैटभसंहारां महिषासुरमर्दिनीम् ॥ चण्डमुण्डशिरश्छेदां सर्वदैत्यनिवारिणीम् ॥२१॥ रक्तबीजस्य संहारामसंख्यासुरभक्षिणीं ॥ शुम्भासुर वधोत्साहां ह्यनंता-युधभूषणाम् ॥२२॥ महाब्रह्माण्डमातङ्गीं सर्वाभरणभूषिताम् ॥ वैतालवाहनारूढां सिंहव्याघ्रादिवाहनाम् ॥२३॥ नररक्तप्रियां मायां मधुमांसोपहारिणीम् ॥ भक्तानन्द-करीं देवीं सर्वसिद्धिस्वरूपिणीम् ॥२४॥ इष्टदामीश्वरीं सिद्धिं सर्वशक्तिस्वरूपिणीम सर्वमन्त्रमयां देवीं सर्वसौभाग्यदायिनीम् ॥२५॥ अष्टादिदशपीठाढ्यां त्रिपुरामधि-देवताम् ॥ अष्टादशभुजां भीमामष्टैश्वर्यफलप्रदाम् ॥२६॥ वन्दे विश्वेश्वरीं देवीं सर्वसौभाग्यदायिनीम् ॥ एतत्सप्तशतीध्यानं सर्वसिद्धिकरं तथा ॥२७॥ स्मरेन्नि-त्यं प्रयत्नेन षण्मासात्प्राप्यते सुखं ॥ महाभयापहरणं शत्रुपक्षनिवारणम् ॥२८॥ अचलां श्रियमाप्नोति सर्वव्याधिहरं तथा ॥ अन्ते स्वर्गं च मोक्षं च सत्यं सत्यं न संशयः ॥२९॥ इति डामरतन्त्रे सप्तशतीध्यानं सम्पूर्णम् ॥

॥ अथ दलं पुनश्च ३ अंगं ॥

अथ दलम् ॥ ॐ नमश्चण्डिकायै ॥ अथातः सम्प्रवक्ष्यामि चण्डिकादलमुत्तमम् ॥ मन्त्रं विना तु जप्त्वा वै तत्सर्वं निष्फलं भवेत् ॥१॥ ॐ नमोभगवति जय जय चामुण्डे चण्डेश्वरि चण्डायुधे ॥ चण्डरूपधारिणि ताण्डवप्रिये ॥ कुण्डलीभूतदिङ्नागमण्डलीभूतगण्डस्थिते समस्तजगदण्डसंहारकारिणि परेऽनन्तानन्तरूपे शिवे नरशिरोमालालङ्कृतवक्षःस्थले महाकपालमालोज्ज्वलन्मणिमुकुटचूडावतंस चन्द्रखण्डे महाभीषणे देवि ॥ महामाये षोडशकला परिवृतोल्लसिते ॥ महादेवासुरसमरनिधृतरुधिरार्द्रीकृतलिम्पिततनुकमलोद्भासितकरे ॥ सम्पूर्णरुधिरशोभित महाकपोले ॥ सूर्यभासिनि दृढतरावक्रमनुभासिताधरशोभितमहाकपोले ॥ चंद्रभासिनि ॥ दृढतरावक्रमहानादसहितहेमकाञ्चीदामोज्ज्वलीकृतमहामण्डिते ॥ महाशम्भुरूपे महाव्याघ्रचर्माम्बरधरे ॥ महासर्पयज्ञोपवीतिनि ॥ महास्मशान भस्मोद्धूलितसर्वगात्रे कालि कङ्कालि महाकालि कालाग्निरुद्रकालि ॥ कालसङ्कर्षिणि ॥ कालरात्रि ॥ नमो दुष्टभक्षिणि ॥ नानाभूतप्रेतपिशाचगणसहस्रसङ्गिनि ॥ नानाव्याधिप्रशमनि ॥ सर्वदुष्टप्रमथिनि ॥ सर्वदारिद्र्यनाशिनि ॥ युगे युगे खादितमांसखण्डे ॥ गायत्रीविक्षिप्तकलाकलायमानकङ्कालधारिणि मधु मांस रुधिर सन्ततविला-

कर्मारंभः दलं पुनः ३ अंग

सिनि ॥ सकलसुरासुरगन्धर्व विद्याधर किन्नरकिम्पुरुषादिभिः स्तूयमाने ॥ सर्वम-
न्त्राधिभूताधिकारिणि ॥ सर्वशक्तिप्रधाने ॥ सकललोकपावनि ॥ सकलदुरितप्र-
क्षालिनि ॥ सकललोकजननि ॥ ब्राह्मि ॥ माहेश्वरि ॥ कौमारि ॥ वैष्णवि ॥
वाराहि ॥ नारसिंहीन्द्राणि ॥ चामुण्डे ॥ महालक्ष्मीस्वरूपे ॥ महाविद्ये ॥ योगिनि ॥
योगीश्वरि ॥ चण्डिके ॥ महामाये ॥ विश्वरूपिणि ॥ सर्वाभरणभूषिते ॥ अतल-
वितलसुतलमहातलपातालादिभुवनैकनाथे ॥ ॐ नमः पितामहाय ॥ ॐ नमो
नारायणाय ॐ नमः शिवाय ॥ इति सकललोकैकजायमाने ॥ ब्रह्मविष्णुमहेश्वरि ॥
दण्डकमण्डलुधारिणि शङ्खचक्रगदापद्मधारिणि सरस्वति पद्मालये ॥ सावित्रि ॥ सकल
जगत्स्वरूपिणि महाक्रूरे ॥ प्रसन्नरूपधारिणि ॥ सर्वमङ्गलाप्रदे ॥ महिषासुरम-
र्दिनि ॥ कात्यायनि ॥ दुर्गे ॥ निद्रारूपिणि ॥ शरचापशूलकपालकरवाल खड्ग-
डमरुकाङ्कुशगदापरशुतोमरभिन्दिपालभुशुण्डी मुसलमुद्गरपरिघायुधदोर्दण्डसहस्र-
चन्द्रार्कवह्निनयने ॥ इन्द्राग्नियमनैर्ऋतवरुणवायुकुबेरेशप्रधानशक्तिभूते ॥ सप्तद्वीप-
समुद्रापर्युपरिमहाभ्यासेश्वरि महास्नचराचरप्रपञ्चतनूदरे ॥ महाप्रधाने ॥ महाकला-
सपर्वतोद्यानवनक्षेत्रनदीतीरदेवतायायतनालंकृते ॥ मेदिनीनाथे वसिष्ठवामदेवादि
मुनिगणस्पृष्टचरणारविन्दे ॥ द्विचत्वारिंशद्वर्णमहिते पर्यायस्थाने ॥ वेदवेदाङ्गाने-
कशास्त्रभूते ॥ शब्दब्रह्ममये ॥ मातृकादेवि शिरस्संरक्षरक्ष ॥ मम शत्रून् हुङ्कारेण

नाशय नाशय ॥ भूतप्रेतपिशाचानुच्चाटयोच्चाटय वशीकुरुकुरु ॥ क्षोभयक्षोभय ॥ संक्रामय संक्रामय विदारयविदारय द्रावयद्रावय ॥ सकलचोरान्मूर्ध्नि स्फोटयस्फोटय सकल शत्रून् शीघ्रं मारयमारय हुंफट्स्वाहा ॥ इति रुद्रयामले तन्त्रे दलपाठः सम्पूर्णः ॥

॥ श्री चंडी हृदयं पुनश्च ३ अंगं ॥

ॐ अस्य श्री चण्डी हृदयमालामन्त्रस्य त्रिगुणात्मा ऋषिः ॥ विराट्छन्दः ॥ श्री महाचण्डीदेवता ॥ ऐंबीजम् ॥ ह्रींशक्तिः ॥ क्लींकीलकं ॥ जपे विनियोगः ॥ ततो हृदयादिन्यासः ॥ ॐ ऐंनमो हृदयायनमः ॥ ॐ ह्रीं नमः शिरसे स्वाहा ॥ ॐ क्लींनमः शिखायै वषट् ॥ ॐ चामुण्डायै नमः कवचाय हुं ॥ ॐ विच्चेनमः नेत्रत्रयाय वौषट् ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमोऽस्त्रायफट् ॥ ब्रह्मोवाच ॥ अथातः संप्रवक्ष्यामि विस्तरेण यथातथम् ॥ चण्डिकाहृदयं गुह्यं शृणुष्वैकाग्रमानसः ॥ ॐ ह्रांह्रींह्रूं ऐंक्लींश्रीं ॐ नमोभगवति जयजयज्वालामालिनि ॥ चामुण्डे चण्डिके ॥ त्रिदशमणिमुकुटकोटिनिघृष्टचरणारविन्दे ॥ गायत्रि सावित्रि सरस्वति महासन्ध्ये महावाणकृताभरणे ॥ भैरवरूपधारिणि ॥ प्रकटसुदंष्ट्रोग्रवदने ॥ घोरे घोरासने नयनोज्ज्वलज्वालसहस्रपरिवृते ॥ महाट्टहासधवलीकृतदिगन्तरे ॥ दिवाकरसहस्रपरिवृते ॥ कामरूपधारिणि ॥ महामणिद्योतित शशिप्रभाभासित सकलदिगन्तरे ॥ सर्वायुध

परिपूर्णे ॥ कपालहस्ते ॥ गजगामिन्यौत्तरिण्ये ॥ भूतवेतालपरिवृते प्रकम्पित
चराचरे ॥ मधुकैटभ महिषासुर धूम्रलोचन चण्डमुण्ड रक्तबीज निशुम्भशुम्भादि-
दैत्यनिष्कण्टके कालरात्रि महामाये ॥ शिवे नित्ये ॥ त्रिभुवनधराधरे ॥ वामे ज्येष्ठे
वरदे रौद्र्यम्बिके ॥ कालिकलविकारिणि ॥ बलप्रमथिनि सर्वभूतदमनि ॥ मनो-
न्मय्याधारिणि ॥ ब्राह्मि माहेश्वरि कौमारि वैष्णवि ॥ वाराहि नारसिंहीन्द्राणि ॥
चामुण्डे ॥ माहेन्द्रि शिवदूति महाकालीमहालक्ष्मीमहासरस्वतीतित्रिस्थिते ॥ नाद-
मध्ये स्थिते ॥ महाग्रविषोरगफणा मणिमुकुटरत्नज्वालावलिते महाहिहारभूषित-
पादबाहुकण्ठोत्तमांगे ॥ मालाकुले ॥ नवरत्ननिधिकोशे ॥ शब्दस्पर्शरूपरसगन्धा-
काशवाक्पाणिपादपायूपस्थ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राण मध्यस्थिते ॥ चक्षुष्मति ॥
महाविषोपविघ्ने ॥ महाज्वालानले ॥ महाभैरवस्तुते ॥ सर्वसिद्धिप्रदे ॥ निर्मले-
निष्कले नाभ्याधारादिसंस्थिते ॥ परंज्योतिःस्वरूपे ॥ सोमसूर्याग्निमण्डलपरिवृते
ऊर्ध्वविशुद्धान्तकप्रभे विनिगर्तब्रह्मविष्णुरुद्रदैवते ॥ परे अपरे ॥ प्रभाभासित
चराचरे ॥ पंचविंशति तत्त्वावबोधिनि महाशून्यागमे ॥ पतिवन्धुसंस्थिते ॥ अध
ऊर्ध्वसंस्थिते ॥ भुक्तिमुक्तिप्रदे ॥ निर्गुणे ॥ ऋग्यजुःसामाथर्वणि पठिते ॥ ए-
ह्येहि भगवति ॥ स्थूलसूक्ष्मपरे हुङ्कार निरूपिते ॥ परमकारुणिके ॥ महाज्वा-
लामणे महिषोपरिस्थिते गन्धर्वविद्याधरार्चिते ॥ भुजङ्गमहिमे ॥ जृम्भिणि ॥

क्षोभिणि ॥ वशीकरणि ॥ जृम्भे ॥ मोहे ॥ क्षोभे ॥ बीजपञ्चकमध्यस्थिते ॥ महायोगिनि ॥ महाज्वरक्षेत्रनायिके ॥ यक्षराक्षसमहाज्वरक्षेत्रविपोपविघ्ने ॥ गन्धर्वविद्याधराराधिते ॥ ओङ्कारश्रीङ्कारहस्ते आंक्रोमग्निपात्रे ॥ द्रांशोपयशोपय ॥ प्लुं-प्लावय प्लावय ॥ क्लींब्रींसुकुमारय सुकुमारय ॥ प्लुंशातय शातय ॥ सोमुन्माद-योन्मादय ग्लौंमोहय मोहय ॥ ह्रीमांह्रीमावेशयावेशय ॥ श्रीं प्रवेशयप्रवेशय ॥ स्त्रींकर्पयकर्पय ॥ हुंहुंहुं फट् अतीतानागतवर्तमानान्दिशंविदिशम् ॥ ऐंह्रींश्रींश्रावय श्रावय ॥ सर्वं प्रवेशयप्रवेशय ॥ त्रैलोक्यंवशवर्ति ॥ ऐङ्कांसवशीकुरुष्व ॥ ऐंह्रीं-स्त्रींद्रावयद्रावय ॥ सर्वप्रवेशयप्रवेशय ॥ ऐङ्कारचित्तांवशंकुरुकुरु ॥ ऐंह्रींश्रींहांहींहूंहैं-हौंहः ॥ ऐंह्रींश्रींब्रांब्रींस्त्रूंब्रैंब्रौंब्रः ॥ मम सर्वकार्य्याणि साधयसाधय हुंफट्स्वाहा ॥ एकविंशतिवारन्तु पठेदेवं जपेत्तु वा राजद्वारे स्मशाने च विदेशे शत्रुमण्डले ॥ १॥ भूताग्निरणमध्ये च सर्वकार्याणि साधयेत् ॥ चण्डिकाहृदयं गुह्यं त्रिसन्ध्ये कीर्तयेद् द्विजः ॥२॥ सर्वकामप्रदं नृणां भुक्ति मुक्ति च विन्दन्ति ॥ इतिरुद्रयामले सप्तशतीहृदयं सम्पूर्णम् ॥

श्री
सप्त०
दुर्गा
पाठः
कर्मारंभः

॥१९ण॥

॥१९ण॥

Scanned with OKEN Scanner

॥ अथ रुद्रचंडी पुनश्च तृतीयांगम् ३ ॥

ॐ क्लीं रविवारे यदा चंडीं पठेदागमसंमताम् ॥
नवावृत्तिफलं तस्य सर्वत्र विजयी भवेत् ॥ १ ॥
ॐ क्लीं सर्वसिद्धिप्रदा देवी शीघ्रं सिद्धिप्रदायिनी ॥
अत एव महेशानीं यो वै चंडीं समभ्यसेत् ॥ २ ॥
ॐ क्लीं संसिद्धश्च कृतार्थश्च राजराजाधिपो भवेत् ॥
आरोग्यं विजयः सौख्यं वस्त्ररत्नप्रवालकं ॥
श्रवणाद् रुद्रचंड्याश्च जायते नात्र संशयः ॥ ३ ॥

ॐ क्रीं धनं धान्यं प्रवालं च वस्त्रं रत्नं विभूषणम् ॥
पठनाच्छिवचंड्याश्च कुर्यात्सर्वं महेश्वरी ॥ ४ ॥

ॐ अस्य श्री रुद्ररूपिणी अघोरचंडी महामंत्रस्य रुद्ररूपी अघोर ऋषिः ॥ ॐ अनुष्टुप् छंदः ॥ ॐ ह्रांबीजं ॥ ॐ ह्रीं शक्तिः ॥ ॐ ह्रूं कीलकं शिवचंडी मंत्रांतरंगेन अभीष्टसिद्ध्यर्थं श्रीमहाचंडी चामुंडा महाचंडी जगदंबा अघोरचंडी प्रीत्यर्थं म य श य ज्ञा अघोर चंडीपारायणे विनियोगाय नमः ॥

सर्वांगे न्यासाः—ॐ ह्रां ॐ ह्रीं ॐ ह्रूं ॐ ह्रैं ॐ ह्रौं ॐ ह्रः ॥

ॐ ह्रां अंगुष्ठाभ्यां नमः ॥	ॐ ह्रां हृदयाय नमः
,, ह्रीं तर्जनीभ्यां स्वाहा ॥	,, ह्रीं शिरसे स्वाहा ॥
,, ह्रूं मध्यमाभ्यां वषट् ॥	,, ह्रूं शिखायै वषट् ॥
,, ह्रैं अनामिकाभ्यां हुं ॥	,, ह्रैं कवचाय हुं ॥
,, ह्रौं कनिष्ठिकाभ्यां वौषट् ॥	,, ह्रौं नेत्रत्रयाय वौषट् ॥
,, ह्रः करतलकरपृष्ठाभ्यां फट् ॥	,, ह्रः अस्त्राय फट् ॥

अथध्यानम् ॥

ॐ ह्रांह्रींह्रूं या देवी खड्गहस्ता सकलजनपदव्यापिनी विश्वदुर्गा
श्यामांगी शुक्लपाशा द्विजगणगणिता ब्रह्मदेहार्धवासा ॥

ज्ञानानां साधयंती यतिगिरिगमनज्ञानदिव्यप्रबोधा
सा देवी दिव्यमूर्तिः प्रदहतु दुरितं चंडमुंडप्रचंडा ॥ ह्रूंह्रींह्रां ॐ नमः ॥ १ ॥
ॐ ह्रांह्रींह्रूं घोरचंडी महाचंडी चंडमुंडविखण्डिनी ॥
चतुर्वक्त्रा महावीर्या महादेवविभूषिता ॥ ,, ,, ॥ २ ॥
,, रक्तदंता वरारोहा महिषासुरमर्दिनी ॥
चंडी चंडी महाचंडी निशुंभशुंभमर्दिनी ॥ ,, ,, ॥ ३ ॥
,, तारिणी जननी दुर्गा चंडिका चंडविक्रमा ॥
रुद्रचंडी शिवचंडी सदाशिवस्वरूपिणी ॥ ,, ,, ॥ ४ ॥
,, गुह्यकाली जगद्धात्री चंडी च यामलोद्भवा ॥
स्मशानवासिनी देवी घोरचंडी भयानका ॥ ,, ,, ॥ ५ ॥
,, शिवा घोरा रुद्रचंडी महेशगणभूषिता ॥
जान्हवी परमा कृष्णा महात्रिपुरसुंदरी ॥ ,, ,, ॥ ६ ॥
,, श्री विद्या परमा विद्या चंडिका वैरिमर्दिनी ॥
दुर्गा दुर्गशिवा घोरा चंडहस्ता प्रचंडिका ॥ ,, ,, ॥ ७ ॥
,, माहेशी बगला देवी भैरवी चंडविक्रमा ॥
प्रमथैर्भूषिता कृष्णा चामुंडा मुंडमर्दिनी ॥ ,, ,, ॥ ८ ॥

ॐ ह्रूं ह्रूं रणखंडा चंद्रघंटा रणे रामवरप्रदा
भार्गी भद्रकाली च शिवा घोरभयानका ॥ ह्रूं ह्रां ह्रां ॐ नमः ॥ ९ ॥
विष्णुप्रिया महामाया नंदगोपगृहोद्भवा ॥
,, मंगला जननी चंडी महाक्रुद्धा भयंकरी ॥ ,, ,, ॥१०॥
विमला भैरवी निद्रा जातिरूपा मनोहरा ॥
,, तृष्णा निद्रा क्षुधा माया शक्तिर्माया मनोहरा ॥ ,, ,, ॥११॥
तस्यै देव्यै नमस्तस्यै सर्वरूपेण संस्थिता ॥
,, नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥ ,, ,, ॥१२॥

अथ फलश्रुतिः ॥

नैव शोको नैव रोगो नैव दुःखं भयं तथा ॥
आरोग्यं मंगलं नित्यं करोति शुभमंगला ॥ १ ॥
महेशानि वरारोहे ब्रवीमि सत्यमुत्तमम् ॥
अभक्ताय न दातव्यं मम प्राणाधिकं शुभम् ॥ २ ॥
तव भक्ताय शांताय शिवविष्णुप्रियाय च ॥
दद्यात्कदाचिद्देवेशि सत्यं सत्यं महेश्वरि ॥ ३ ॥

अनंतफलमाप्नोति शिवचंडीप्रसादतः ॥
अश्वमेधवाजपेयराजसूयशतानि च ॥ ४ ॥
तुष्टाश्च पितरो देवास्तथा च सर्वदेवताः ॥
दुर्गेयं मृन्मयी ज्ञानं रुद्रयामलपुस्तकम् ॥ ५ ॥
मंत्रमक्षरसंज्ञानं करोत्यपि नराधमः ॥
अत एव महेशानि किं वक्ष्ये तव सन्निधौ ॥ ६ ॥
ॐ ह्रांह्रीं भवानी च भवानी च भवानी चोच्यते बुधैः ॥
भकारस्तु भकारस्तु भकारः केवलः शिवः ॥ ह्रूंह्रींह्रां ॐ नमः ॥ १ ॥
,, वाणी चैव जगद्धात्री भकारः प्रेतवद्देवी ॥
वरारोहे च विश्वेशी भकारः प्रेतवत्सदा ॥ ,, ,, ॥ २ ॥
,, चंडि चंडि महारावे चंडिका व्याधिनाशिनी ॥
चंडि चंडि घोरचंडि चंडमुंडविनाशिनी ॥ ,, ,, ॥ ३ ॥
,, महाचंडी शिवा घोरा महाभीमा भयानका ॥
कांचनी कमला विद्या महारोगविमर्दिनी ॥ ,, ,, ॥ ४ ॥
,, गुह्यचंडी घोरचंडी चंडी त्रैलोक्यदुर्लभा ॥
देवानां दुर्लभा चंडी रुद्रयामलसंमिता ॥ ,, ,, ॥ ५ ॥

ॐ ह्रांह्रींह्रूं अप्रकाश्या महादेवी प्रिया रावणमर्दिनी ॥
मत्स्यप्रिया मांसरता मत्स्यमांसबलिप्रिया ॥ ह्रूंह्रींह्रां ॐ नमः ॥ ६ ॥

,, मदमत्ता महानित्या भूतप्रमथसंगता ॥
महाभागा महारामा धान्यदा धनरत्नदा ॥ ,, ,, ॥ ७ ॥

,, वस्त्रदा मणिराज्यादिधनधान्यविवर्धिनी ॥
मुक्तिदा सर्वदा चंडि महाविपत्तिनाशिनी ॥ ,, ,, ॥ ८ ॥

॥ ॐ ह्रांह्रींह्रूं रुद्रचंडिकायै ह्रूंह्रींह्रां ॐ नमः ॥

ॐ लंबोदराधिकश्चंडी पठनाच्छ्रवणात्तु यः ॥
तत्त्वमस्यादिवाक्येन मुक्तिं प्राप्नोति दुर्लभाम् ॥ १ ॥

,, मंदे दिने महेशानी विशेषफलदायिनी ॥
सर्वदुःखाद्विमुच्येत भक्त्या चंडीं शृणोति यः ॥ २ ॥

,, ब्राह्मणो हितकारी च पठेन्नियतमानसः ॥
मंगलं मंगलं ज्ञेयं मंगलं जयमंगलम् ॥ ३ ॥

,, भवेद्धि पुत्रपौत्राद्यैः कन्यादासादिभिर्युतः ॥
तत्त्वज्ञानेन निधनकाले निर्वाणमाप्नुयात् ॥ ४ ॥

ॐ मणिदानोद्भवं पुण्यं तुला हिरण्यके तथा ॥
चंडीश्रवणमात्रेण सर्वदुःखाद्विमुच्यते ॥ ५ ॥

„ निर्वाणमेति देवेशि महास्वस्त्ययने हितः ॥
सर्वत्र विजयं याति मुच्यते ग्रहदोषतः ॥ ६ ॥

„ चंडीश्रवणमात्रेण राजराजाधिपो भवेत् ॥
इमां चंडीं जगद्धात्रीं ब्राह्मणस्तु सदा पठेत् ॥ ७ ॥

„ नान्यांस्तु पाठयेद्देवि पठन्ते ब्रह्महा भवेत् ॥
यः शृणोति नराणां च मुच्यते सर्वपातकैः ॥ ८ ॥

„ ब्रह्महत्या च गोहत्या स्त्रीवधोऽकपानकम् ॥
अन्यच्च पातकं दुर्गे सर्वं नष्टं प्रजायते ॥ ९ ॥

„ परदारकृतं पापं तत्क्षणाच्च विनश्यति ॥
जन्मजन्मान्तरात्पापाद् गुरुहत्यादिपातकात् ॥
मुच्यते मुच्यते देवि सर्वं पापात्प्रमुच्यते ॥१०॥

ॐ ह्रांह्रींह्रूं रुद्रध्येया रुद्ररूपा रुद्राणी रुद्रवल्लभा ॥
रुद्रशक्ती रुद्ररूपा रुद्रमुख्यसमन्विता ॥ ह्रूंह्रींह्रां ॐ नमः ॥ १ ॥

ॐ ह्रांह्रींह्रूं शिवचंडी महाचंडी शिवप्रेतगणान्विता ॥
भैरवी परमा विद्या महाविद्या च षोडशी ॥ ह्रैंह्रौंह्रः ॐ नमः ॥ २ ॥
,, सुंदरी परमा पूज्या महात्रिपुरसुंदरी ॥
गुह्यकाली महाकाली महाकालविमर्दिनी ॥ ,, ,, ॥ ३ ॥
,, कृष्णा तृष्णास्वरूपा सा जगन्मोहनकारिणी ॥
अतिमंत्रा महालज्जा सर्वमंगलदायिनी ॥ ,, ,, ॥ ४ ॥
,, घोरतंत्री भीमरूपा भीमादेवी मनोहरा ॥
मंगला बगला सिद्धिदायिनी सर्वदा शिवा ॥ ,, ,, ॥ ५ ॥
,, स्मृतिरूपा कीर्तिरूपा योगीन्द्रैरपि सेविता ॥
भयानका महादेवी भयदुःखविनाशिनी ॥ ,, ,, ॥ ६ ॥
,, चंडिका शक्तिहस्ता च कौमारी सर्वकामदा ॥
वाराही च वराहास्या इन्द्राणी शक्रपूजिता ॥ ,, ,, ॥ ७ ॥
,, माहेश्वरी महेशस्य महेशगणभूषिता ॥
चामुंडा नारसिंही च नृसिंहशत्रुमर्दिनी ॥ ,, ,, ॥ ८ ॥
,, सर्वशत्रुप्रशमनी सर्वारोग्यप्रदायिनी ॥
सत्यं सत्यं महादेवि सत्यं सत्यं वदाम्यहं ॥ ,, ,, ॥ ९ ॥

ॐ ह्रांह्रींह्रूं त्वं ब्राह्मी त्वं च रौद्री सहशिखिगमना त्वं च देवी कुमारी ॥
त्वं चक्री चक्रहस्ता घुरघुरितरवा त्वं वराहस्वरूपा ॥
रौद्री त्वं चर्ममुंडा सकलभुवि तले संस्थिते स्वर्गमार्गे ॥
पाताले शैलशृंगे हरिहरनमिते देवि चंडीश्वरि त्वं
चामुण्डे नमस्ते नमस्ते नमस्ते ॥ ॐ ह्रूंह्रींह्रां ॐ नमः ॥१०॥
,, रक्ष त्वं मुंडधारी गिरिगुहविवरे निर्झरे पर्वते वा
संग्रामे शत्रुमध्ये विषविषमविषे संकटे कुत्सिते वा ॥
व्याघ्रे चौरे च सर्पेप्युदधिभुवितले वह्निमध्ये च दुर्गे ॥
रक्षेत्सा दिव्यमूर्तिः प्रदहतु दुरितं चंडमुंडप्रचंडा ॥ ,, ,, ॥११॥

अथ फलश्रुतिः ॥

ॐ मनसा वचसा पापं यत्पापं ब्रह्महिंसने ॥
मिथ्यावादस्य यत्पापं तत्पापं नश्यति क्षणात् ॥ १ ॥
ॐ श्रवणं पठनं चैव यः करोति धरातले ॥
स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत् ॥ २ ॥
ॐ यः करिष्यत्यविज्ञाय रुद्रयामलचंडिकाम् ॥
पापैरेतैः समायुक्तो रौरवं नरकं व्रजेत् ॥ ३ ॥

ॐ शृणुदेवि महाभागे चंडीपाठं करोति यः ॥
गंगायां चैव यत्पुण्यं काश्यां विश्वेश्वराग्रतः ॥ ४ ॥

ॐ इमां हि चंडीं पठते मनुष्यः शृणोति भक्त्या परमां शिवस्य ॥
चंडीं धरण्यामतिपुण्ययुक्तां स वै न गच्छेत्परमंदिरं किल ॥ ५ ॥

ॐ जप्य मनोरथं दुर्गे तनोति धरणीतले ॥
रुद्रचंडीप्रसादेन किं न सिध्यति भूतले ॥ ६ ॥

ॐ आरोग्यं च जयं पुण्यं पूर्णसौख्यविवर्धनम् ॥
सर्वरोगा विनश्यंति पठनात्किल पार्वति ॥
सत्यं सत्यं जगद्धात्रि महामाये शिवे शिवे ॥ ७ ॥

॥ ॐ हुं फट् घोरचंडिकायै नमोनमः ॥
॥ ॐ ह्रीं हुं फट् घोरचंडिकायै फट् हुं ह्रीं ॐ ॥

॥ इति श्री रुद्रचंडी समाप्ता ॥ पुनश्च तृतीयांगंसमाप्तम् ३ ॥

Scanned with OKEN Scanner

॥ अथ श्री कंठादि मातृका न्यासः चतुर्थांगम् ४ ॥

ॐ श्री कंठादि मातृकान्यासमहामंत्रस्य ॐ अंबरीष ऋषिः ॥ ॐ अनुष्टुप् छंदः ॥ ॐ अर्धनारीश्वरसदाशिवो देवता ॥ ॐ गं बीजं ॥ ह्रीं शक्तिः ॥ श्रीं कीलकं ॥ मम सर्व प्रायश्चित्तक्षयार्थं मनोवांछितकामनासिद्ध्यर्थं अर्धनारीश्वरसदाशिव-देवताप्रीत्यर्थं श्री कंठमातृकान्यासे विनियोगः ॥

ॐ क्लीं सिंदूरकांचनसमोभयभागमर्धनारीश्वरं गिरिसुताहरभूषचिह्नम् ॥
पाशांकुशाक्षवलयेष्टदहस्तमीशं स्मृत्वार्धदेहरमणीश्वरमीशमीडे ॥
अर्धनारीश्वराय सांबसदाशिवाय नमोनमः ॥ १ ॥

ॐ क्लीं नीलप्रवालरुचिरं विलसत्त्रिनेत्रं पाशारुणोत्पलकपालकशूलहस्तम् ॥
अर्धाम्बिकेशमनिशं प्रविभक्तभूषं बालेन्दुबद्धमुकुटं प्रणमामि सांबम् ॥
अर्धनारीश्वराय सांबसदाशिवाय नमोनमः ॥ २ ॥

ॐ क्लीं आरक्तमिन्दुशकलाभरणं त्रिनेत्रं खट्वांगपाशसृणिशुभ्रकपालहस्तम् ॥
वेदाननं चिपिटिनासमनर्घ्यभूषं रक्तांगरागकुसुमांशुकमीशमीडे ॥
अर्धनारीश्वराय सांबसदाशिवाय नमोनमः ॥ ३ ॥

ॐ क्ष्म्ल्यूं अर्धनारीश्वराय सांबसदाशिवाय क्ष्म्ल्यूं ॐ नमः ॥

ॐ ऐं श्रीं अं श्रीं कंठेश्वराय पूर्णोदरीभ्यां नमो ललाटे ॥
,, आं अनंतेश्वराय विरजाक्षीभ्यां नमो मुखवृत्ते ॥
,, इं सूक्ष्मेश्वराय शाल्मलीभ्यां नमो दक्षनेत्रे ॥
,, ईं त्रिमूर्तीश्वराय लोलाक्षीभ्यां नमो वामनेत्रे ॥
,, उं अमरेश्वराय वर्तुलाक्षीभ्यां नमो दक्षकर्णे ॥
,, ऊं अर्घीश्वराय दीर्घघोणाभ्यां नमो वामकर्णे ॥
,, ऋं भारभूतीश्वराय दीर्घमुखीभ्यां नमो दक्षनासारंध्रे ॥
,, ॠं अतिथीश्वराय गोमुखीभ्यां नमो वामनासारंध्रे ॥
,, लृं स्थाण्वीश्वराय दीर्घजिह्वाभ्यां नमो दक्षगंडे ॥
,, ॡं हरीश्वराय कुण्डोदरीभ्यां नमो वामगंडे ॥
,, एं गिरीश्वराय ऊर्ध्वकेशीभ्यां नमः ऊर्ध्वोष्ठे ॥
,, ऐं भौतिकेश्वराय विकृतमुखीभ्यां नमः अधरोष्ठे ॥
,, ओं सद्योजातेश्वराय ज्वालामुखीभ्यां नमः ऊर्ध्वदंतपंक्तौ ॥
,, औं अनुग्रहेश्वराय उल्कामुखीभ्यां नमः अधोदंतपंक्तौ ॥
,, अं अक्रूरेश्वराय श्रीमुखीभ्यां नमो मस्तके ॥

ॐ ऐं ह्रीं श्रीं अः महाशनेश्वराय विद्यामुखीभ्यां नमो मुखे ॥
" कं क्रोधीश्वराय महाकालीभ्यां नमो दक्षकरमूले ॥
" खं चंडेश्वराय सर्वसिद्धिसरस्वतीभ्यां नमो दक्षकूर्परे ॥
" गं पंचांतकेश्वराय सर्वसिद्धिगौरीभ्यां नमो मणिबन्धे ॥
" घं शिवोत्तमेश्वराय त्रैलोक्यविद्याभ्यां नमो दक्षकरांगुलीमूले ॥
" ङं एकरुद्रेश्वराय मंत्रशक्तिभ्यां नमो दक्षकरांगुल्यग्रे ॥
" चं कूर्मेश्वराय आत्मशक्तिभ्यां नमो वामकरमूले ॥
" छं एकनेत्रेश्वराय भूतधात्रीभ्यां नमो वामकूर्परे ॥
" जं चतुराननेश्वराय लंबोदरीभ्यां नमो वाममणिबन्धे ॥
" झं अजेश्वराय द्राविणीभ्यां नमो वामकरांगुलीमूले ॥
" ञं सर्वेश्वराय नागरीभ्यां नमो वामकरांगुल्यग्रे ॥
" टं सोमेश्वराय खेचरीभ्यां नमो दक्षपादमूले ॥
" ठं लांगलीश्वराय मंजरीभ्यां नमो दक्षजानुनि ॥
" डं दारुकेश्वराय सर्वशक्तिस्वरूपिणीभ्यां नमो दक्षगुल्फे ॥
" ढं अर्धनारीश्वराय वारुणीभ्यां नमो दक्षपादांगुलीमूले ॥
" णं उमाकांतेश्वराय काकोदरीभ्यां नमो दक्षपादांगुल्यग्रे ॥

Scanned with OKEN Scanner

ॐ ऐं ह्रीं श्रीं तं आपादीश्वराय पूतनाभ्यां नमो वामपादमूले ॥
" थं दंडीश्वराय भद्रकालीभ्यां नमो वामजानौ ॥
" दं अत्रीश्वराय योगिनीभ्यां नमो वामगुल्फे ॥
" धं मीनेश्वराय शंखिनीभ्यां नमो वामपादांगुलिमूले ॥
" नं मेघेश्वराय गर्जनीभ्यां नमो वामपादांगुल्यग्रे ॥
" पं लोहितेश्वराय कालरात्रिभ्यां नमो दक्षपार्श्वे ॥
" फं शिखीश्वराय कुब्जिकाभ्यां नमो वामपार्श्वे ॥
" बं छगलंडेश्वराय कपर्दिनीभ्यां नमः पृष्ठे ॥
" भं वितंडेश्वराय द्विरंडेश्वराय प्रज्ञायै वज्रेश्वरीभ्यां नमो नाभौ ॥
" मं महाकालेश्वराय जयाभ्यां नमः उदरे ॥
" यं त्वगात्मकवालीश्वराय सुमुखीभ्यां नमो हृदये ॥
" रं असृगात्मकभुजंगेश्वराय रेवतीभ्यां नमो दक्षांसे ॥
" लं मांसात्मकपिनाकीश्वराय माधवीभ्यां नमः ककुदि ॥
" वं मेदात्मकखड्गीश्वराय वारुणीभ्यां नमो वामांसे ॥
" शं अस्थ्यात्मकबकेश्वराय वायवीभ्यां नमो हृदयादिदक्षकरे ॥
" षं मज्जात्मकश्वेतेश्वराय राक्षसविदारिणीभ्यां नमो हृदयादि वामकरे॥

ॐ ऐं ह्रीं श्रीं सं शुक्रात्मक भृग्वीश्वराय सहजानंदाभ्यां नमो हृदयादि दक्षपादे ॥
„ हं प्राणात्मने नकुलीश्वराय महालक्ष्मीभ्यां नमो हृदयादि वामपादे॥
„ ळं जीवेशात्मक शिवेश्वराय सर्वव्यापिनीभ्यां नमो हृदयादि उदरांतं॥
ॐ ऐं ह्रीं श्रीं ॐ हं सौं क्षं क्रोधात्मक संवर्तकेश्वराय महामायाभ्यां नमो हृदयादि मुखे॥
ॐ अं कं चं टं तं पं यं शं हं क्षं सर्वेश्वराय सर्वेश्वरीभ्यां नमः सर्वांगे ॥

ॐ क्लीं ह्रीं क्रीं कालिचामुंडे क्रीं काम्यादिचिंतितं देहि क्रीं चामुंडे आगच्छ आगच्छ भूतभविष्यवर्तमानकालज्ञानदूरदृष्टिदूरश्रवणं ब्रूहि ब्रूहि क्रों कालिचामुंडे हुं फट् स्वाहा ॥

॥ इति श्री कलादिमातृकान्यासः ॥

॥ अथ महातत्त्वन्यासः पंचमांगम् ५ ॥

ॐ अस्य श्री तत्त्वन्यास महामंत्रस्य ॐ सदाशिव ऋषिः ॥ ॐ गायत्री छंदः ॥ ॐ पराशक्तिर्देवता ॥ ॐ हं बीजं ॥ ॐ सौं शक्तिः ॥ ॐ हं महत्तत्त्वाय कीलकं ॥ श्री पराशक्तिप्रीत्यर्थे महत्तत्वन्यासे विनियोगः ॥

ॐ शंखचक्राब्जपरशु कपालाक्षरमालिकाः ॥
पुस्तकाननुकुंभौ च त्रिशूलं दधती करैः ॥
ॐ सितपीतसितश्वेतरक्तवर्णैस्त्रिलोचनैः ॥
पंचास्यसंयुतां चंद्रसकान्तिशारदां भजे ॥

ॐ मं नमः ॐ पराय जीवात्मने ॥
ॐ भं नमः पराय प्राणात्मने सर्वांगे विन्यसेत् ॥
ॐ बं नमः पराय बुद्ध्यात्मने ॥
ॐ फं नमः पराय अहंकारात्मने ॥
ॐ पं नमः पराय मनसात्मने ॥
एवं त्रिभिः हृदयं न्यसेत् ॥

ॐ नं नमः पराय शब्दात्मने नमः मूर्ध्नि ॥
ॐ धं नमः पराय स्पर्शात्मने नमः मुखे ॥
ॐ दं नमः पराय रूपात्मने नमः हृदये ॥
ॐ थं नमः पराय रसात्मने नमः उपस्थे ॥
ॐ तं नमः पराय गंधात्मने नमः पादयोः ॥
ॐ णं नमः पराय श्रोत्रात्मने नमः श्रोत्रयोः ॥

ॐ ढं नमः पराय त्वगात्मने नमस्त्वचि ॥
ॐ डं नमः ,, चक्षुरात्मने नमश्चक्षुषोः
ॐ ठं नमः ,, जिह्वात्मने नमः जिह्वायां ॥
ॐ टं नमः ,, घ्राणात्मने नमः घ्राणयोः ॥
ॐ ञं नमः ,, वागात्मने नमः वाचि ॥
ॐ झं नमः ,, पाण्यात्मने नमः पाण्योः ॥
ॐ जं नमः ,, पाय्वात्मने नमः पायौ ॥
ॐ छं नमः ,, पादात्मने नमः पादयोः ॥
ॐ चं नमः ,, उपस्थात्मने नमः उपस्थे ॥
ॐ ङं नमः ,, आकाशात्मने नमः मूर्ध्नि ॥
ॐ घं नमः ,, वाय्वात्मने नमः मुखे ॥
ॐ गं नमः ,, तेजसात्मने नमः हृदये ॥
ॐ खं नमः ,, सलिलात्मने नमः गुह्ये ॥
ॐ कं नमः ,, पृथिव्यात्मने नमः पादयोः जंघायाम् ॥
ॐ पं नमः ,, पुरुषात्मने नमः कंठे ॥
ॐ शं नमः ,, महाशक्त्यात्मने नमः हृदये ॥

ॐ हं नमः पराय चंद्रमंडलमध्यवर्तिनीमहादेव्यै सोममंडलात्मने नमः हृदये ॥
ॐ सं नमः ,, सूर्यमंडलमध्यवर्तिनी महादेवी सावित्र्यै सूर्यमंडलात्मने नमः हृदये ॥
ॐ रं नमः ,, अग्निस्वरूपाय जातवेदसे अग्निमंडलात्मने नमः हृदये ॥
ॐ पं नमः ,, परमेष्ठ्यात्मने वासुदेवाय नमः मूर्ध्नि ॥
ॐ यं नमः ,, पुरुषात्मने आद्यपुरुषाय आद्यशक्त्यै नमः मुखे ॥
ॐ वं नमः ,, विश्वात्मने सदाशिवाय नमः हृदये ॥
ॐ लं नमः ,, निवृत्यात्मने महाविष्णवे नमः गुह्ये ॥
ॐ क्षं नमः ,, सर्वात्मने हरिहराय नमः पादयोः ॥
ॐ क्षौं नमः ,, कोपात्मने सनारसिंहीनृसिंहाय नमः महातत्त्वाय सर्वांगे व्यापकं न्यसेत् ॥ इति ॥

॥ इति महातत्त्वन्यासः ॥

॥ अथ श्री कलामातृकान्यासः षष्ठांगम् ६ ॥

ॐ अस्य श्रीदेवी भगवती कलामातृका न्यासस्य ॐ प्रजापतिर्ऋषिः ॥ ॐ गायत्री छंदः ॥ ॐ कलारूपिणी मातृका देवता ॥ ॐ हसौं बीजानि॥

ॐ स्वराः शक्तयः ॥ सप्तशतीपाठादौ जपादौ मातृकान्यासे विनियोगः ॥

हस्तैः पद्मं रथांगं गुणमथ हरिणं पुस्तकं वर्णमालां
टंकं शूलं कपालं दरममृतलसद्धेमकुंभं वहन्तीम् ॥
मुक्ता विद्युत्पयोदस्फटिकनवजपाबंधुरैः पंचवक्त्रै-
स्त्र्यक्षैर्वक्षोजनम्रां शकलशशिनिभां शारदां तां नमामि ॥ १ ॥

ॐ	अं	आं	हृदयाय	नमः	अंगुष्ठाभ्यां नमः ॥
ॐ	इं	ईं	शिरसे	नमः	तर्जनीभ्यां स्वाहा ॥
ॐ	उं	ऊं	शिखायै	नमः	मध्यमाभ्यां वषट् ॥
ॐ	एं	ऐं	कवचाय	नमः	अनामिकाभ्यां हुं ॥
ॐ	ओं	औं	नेत्रत्रयाय	नमः	कनिष्ठिकाभ्यां वौषट् ॥
ॐ	अं	अः	अस्त्राय	नमः	करतलकरपृष्ठाभ्यां फट् ॥

ह्रौं	ॐ	अं	निवृत्यै	नमः	ललाटे ॥
,,	ॐ	आं	प्रतिष्ठायै	नमः	मुखवृत्ते ॥
,,	ॐ	इं	विद्यायै	नमः	दक्षनेत्रे ॥
,,	ॐ	ईं	शांत्यै	नमः	वामनेत्रे ॥
,,	ॐ	उं	धरायै	नमः	दक्षकर्णे ॥

ह्रीं ॐ उं दीपिकायै नमः वामकर्णे ॥
,, ॐ ऋं रेचिकायै नमः दक्षनासापुटे ॥
,, ॐ ॠं मोचिकायै नमः वामनासापुटे ॥
,, ॐ लृं परायै नमः दक्षकपोले ॥
,, ॐ ॡं सूक्ष्मायै नमः वामकपोले ॥
,, ॐ एं सूक्ष्मामृतायै नमः ऊर्ध्वोष्ठे ॥
,, ॐ ऐं ज्ञानामृतायै नमः अधरोष्ठे ॥
,, ॐ ओं आप्यायिन्यै नमः ऊर्ध्वदंतपंक्तौ ॥
,, ॐ औं व्यापिन्यै नमः अधोदंतपंक्तौ ॥
,, ॐ अं व्योमरूपायै नमः जिव्हायाम् ॥
,, ॐ अः अनंतायै नमः कंठे ॥
,, ॐ कं सृष्ट्यै नमः दक्षबाहुमूले ॥
,, ॐ खं ऋद्ध्यै नमः दक्षकूर्परे ॥
,, ॐ गं स्मृत्यै नमः दक्षमणिबन्धे ॥
,, ॐ घं मेधायै नमः दक्षहस्तांगुल्लीमूले ॥
,, ॐ ङं धारणायै नमः दक्षहस्तांगुल्यग्रे ॥

ह्रीं	ॐ	चं	लक्ष्म्यै	नमः	वामबाहुमूले ॥
,,	ॐ	छं	द्युत्यै	नमः	वामकूर्परे ॥
,,	ॐ	जं	स्थिरायै	नमः	वाममणिबन्धे ॥
,,	ॐ	झं	स्थित्यै	नमः	वामहस्तांगुलिमूले ॥
,,	ॐ	ञं	सिद्ध्यै	नमः	वामहस्तांगुल्यग्रे ॥
,,	ॐ	टं	जरायै	नमः	दक्षपादमूले ॥
,,	ॐ	ठं	पालिन्यै	नमः	दक्षजानुनि ॥
,,	ॐ	डं	क्षान्त्यै	नमः	दक्षगुल्फे ॥
,,	ॐ	ढं	ईश्वर्यै	नमः	दक्षपादांगुलिमूले ॥
,,	ॐ	णं	रत्यै	नमः	दक्षपादांगुल्यग्रे ॥
,,	ॐ	तं	कामिकायै	नमः	वामपादमूले ॥
,,	ॐ	थं	वरदायै	नमः	वामजानुनि ॥
,,	ॐ	दं	आह्लादिन्यै	नमः	वामगुल्फे ॥
,,	ॐ	धं	प्रीत्यै	नमः	वामपादांगुलिमूले ॥
,,	ॐ	नं	दीर्घायै	नमः	वामपादांगुल्यग्रे ॥
,,	ॐ	पं	तीक्ष्णायै	नमः	दक्षपार्श्वे ॥

ह्रीं ॐ फं रौद्र्यै नमः वामपार्श्वे ॥
,, ॐ बं भयायै नमः पृष्ठे ॥
,, ॐ भं निद्रायै नमः नाभौ ॥
,, ॐ मं तंद्रिकायै नमः जठरे ॥
,, ॐ यं क्षुधायै नमः हृदि ॥
,, ॐ रं क्रोधिन्यै नमः दक्षांसे ॥
,, ॐ लं क्रियायै नमः ककुदि ॥
,, ॐ वं उत्कायै नमः वामांसे ॥
,, ॐ शं मृत्युकायै नमः हृदयादिदक्षहस्तांतम् ॥
,, ॐ षं पीतायै नमः हृदयादिवामहस्तांतम् ॥
,, ॐ सं श्वेतायै नमः हृदयादिदक्षपादांतम् ॥
,, ॐ हं अरुणायै नमः हृदयादिवामपादांतम् ॥
,, ॐ क्षं असितायै नमः मूर्धादिपादांतम् ॥
,, ॐ ज्ञं अनंतायै नमः पादादिमूर्धांतम् ॥

॥ इति श्री कलामातृकान्यासः षष्ठः ६ ॥

॥ अथ सप्तशतीन्यासः सप्तमाङ्गम् ७ ॥

सप्तशतीन्यासैः सह चण्डीदुर्गास्तोत्रपाठः करणीयः तेन कृतेन सप्तमांगं संपूर्णं भवति ॥

अस्य श्री प्रथममध्यमोत्तमचरित्राणां ब्रह्मविष्णुरुद्रा ऋषयः ॥ गायत्र्युष्णिगनुष्टुभश्छंदांसि ॥ महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥

ॐ ह्रीं रक्तदंतिकादुर्गाभ्रामरीबीजाय नमः दक्षस्तने ॥

ॐ क्लीं नंदाशाकंभरीभीमाशक्तये नमः वामस्तने ॥

ॐ अग्निवायुसूर्यास्तत्त्वानि ॥ ॐ ऋग्यजुःसामवेदा ध्यानानि कीलकम् ॥ सकलकामनासिद्धये महाकालीमहालक्ष्मीमहासरस्वतीत्रिगुणात्मकमूर्तिदुर्गाम्बाप्रीत्यर्थं सप्तशतीन्यासे विनियोगः ॥

ॐ ह्रीं नमो हृदयाय नमः ॥	ॐ क्लां नमः कवचाय हुं ॥
" चं नमः शिरसे स्वाहा ॥	" यें नमः नेत्रत्रयाय वौषट् ॥
" डिं नमः शिखायै वषट् ॥	" हीं चंडिकायै ह्रीं ॐ नमः अस्त्राय फट् ॥

ॐ शंभुतेजोज्वलज्ज्वालामालिनि पावके ह्रां नंदायै नमः अंगुष्ठाभ्यां हृदयाय नमः ॥

ॐ शंभुतेजोज्वलज्ज्वालामालिनि पावके ह्रीं रक्तदंतिकायै नमः तर्जनीभ्यां शिरसे स्वाहा

ॐ शंभुतेजोज्वलज्ज्वालामालिनि पावके ह्रूं शाकंभर्यै नमः मध्यमाभ्यां शिखायै वषट् ॥

ॐ शंभुतेजोज्वलज्ज्वालामालिनि पावके ह्रैं दुर्गायै नमः अनामिकाभ्यां कवचाय हुं ॥
,, शंभुतेजोज्वलज्ज्वालामालिनि पावके ह्रौं भीमायै नमः कनिष्ठिकाभ्यां नेत्रत्रयाय वौषट्॥
,, शंभुतेजोज्वलज्ज्वालामालिनिपावके ह्रः भ्रामर्यै नमः करतलकरपृष्ठाभ्यां अस्त्राय फट्॥
ॐ ह्रीं खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥
शंखिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥ अंगुष्ठाभ्यां हृदयाय नमः
ॐ ह्रीं शूलेन पाहि नो देवी पाहि खड्गेन चाम्बिके ॥
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ तर्जनीभ्यां शिरसे स्वाहा ॥
ॐ ह्रीं प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ मध्यमाभ्यां शिखायै वषट् ॥
ॐ ह्रीं सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते
यानि चात्यन्तघोराणि तैरक्षास्मांस्तथा भुवम् ॥ अनामिकाभ्यां कवचाय हुम् ॥
ॐ ह्रीं खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥
करपल्लवसंगीनि तैरस्मान् रक्ष सर्वतः ॥ कनिष्ठिकाभ्यां नेत्रत्रयाय वौषट् ॥
ॐ ह्रीं सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ करतलकरपृष्ठाभ्यां अस्त्राय फट् ॥

स. दु. पाठः सप्त न्यासः ७ अंगं. ॥२२॥

ह्रीं ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥
शंखिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥ शिरसि ॥

ह्रीं ॐ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ मुखे ॥

ह्रीं ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ कंठे ॥

ह्रीं ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते
यानि चात्यन्तघोराणि तैरक्षास्मांस्तथा भुवम् ॥ बाह्वोः ॥

ह्रीं ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेम्बिके ॥
करपल्लवसंगीनि तैरस्मान् रक्ष सर्वतः ॥ हृदये ॥

क्लीं ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते ॥ उदरे ॥

क्लीं ॐ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥
पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तु ते ॥ नाभौ ॥

क्लीं ॐ ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥
त्रिशूलं पातु नो भीते भद्रकालि नमोऽस्तुते ॥ ऊर्वोः ॥

॥२२॥

क्लीं ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥
सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव ॥ जान्वोः ॥
क्लीं ॐ असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ॥
शुभाय खड्गो भवतु चंडिके त्वां नता वयम् ॥ पादयोः ॥

अथध्यानम्:—

ॐ धीकांतिकीर्तिशुभवृत्तिगुणादयस्ते विष्णोर्गुणास्तु परिहृत्य गताः क चाद्य ॥
बन्दीकृतो हरिरसौ ननु निद्रयात्र शक्त्या तवैव भगवत्यतिमानवत्याः ॥ १ ॥

ॐ त्रिकुटां त्रिपुरां परमां मायां श्रेष्ठां परां वैष्णवीं सन्निधाय हृदयकमल कर्णिकायां परां भगवतीं लक्ष्मीं मायां सदोदितां महावश्यकरीं मदनोन्मादकारिणीं धनुर्बाणधारिणीं वाग्विजृंभिणीं चंद्रमंडलमध्यवर्तिनीं चंद्रकलासदृशीं महानित्योपस्थितां पाशांकुशमनोज्ञपाणिपल्लवां समुद्यदर्कनिभां त्रिनेत्रां विचिंत्य देवीं महालक्ष्मीमयीं सर्वलक्षणसम्पन्नां हृदये चैतन्यरूपिणीं निरंजनां त्रिकुटाख्यां स्मितमुखीं सुंदरीं महामायां सर्वसुभगां महाकुंडलिनीं त्रिपीठमध्यवर्तिनीं अकथादिश्रीपीठे परां भैरवीं चित्कलां महात्रिपुरां देवीं ध्यायेत् ॥ २ ॥

ॐ नमो देवि विश्वेश्वरि प्राणनाथे महानंदरूपे सुरानंददे ते ॥
नमो दानवांतप्रदे मानवानामनेकार्थदे भक्तिगम्यस्वरूपे ॥ ३ ॥

॥ इति सप्तशतीन्यासः प्रथमं सप्तमांगं समाप्तं ॥ ७

॥ अथ श्री वनदुर्गागायत्रीकवचस्तोत्रम्
पुनश्च द्वितीयं सप्तमांगं ७ ॥

॥ अथ श्री वनदुर्गागायत्री ॥

ॐ ह्सौं ॐ भूर्भुवः स्वः ॐ ह्रीं तत्सवितुर् ह्रीं वरेण्यं ह्रीं भर्गो देवस्य क्लीं धीमहि क्लीं धियो यो नः क्लीं प्रचोदयादात्मिके ह्रीं प्रणवशिरसात्मिके हुंफट् स्वाहा ॐ ह्सौं ॐ नमः ॥

॥ अथ श्री वनदुर्गा कवच स्तोत्रं ॥

ॐ सहनाववतु ॐ सहनौ भुनक्तु ॐ सहवीर्यं करवावहै ॥

ॐ तेजस्विनावधीतमस्तु ॐ मा विद्विषावहै ॥ ॐ शांतिः शांतिः शांतिः ॥

ॐ अस्यश्री वनदुर्गा गायत्री महाविद्यामालामंत्रस्य ॐ किरातरूपधर ईश्वर ऋषिः ॥ ॐ अनुष्टुप् छंदः ॐ अंतर्यामी नारायणः किरातरूपधरेश्वरो वनदुर्गागायत्रीर्देवता ॥ ॐ स्वाहा शक्तिः ॥ ॐ हुं बीजं ॥ ॐ क्लीं कीलकं ॥ ॐ श्री वनदुर्गागायत्रीप्रीत्यर्थे म व श य ज्ञा वनदुर्गागायत्रीमहामंत्रपारायणे मम-धर्मार्थकाममोक्षार्थे जपे विनियोगः ॥

न्यासः—

ॐ हंसिनी ह्रां अंगुष्ठाभ्यां नमः ॥ ॐ हंसिनी ह्रां हृदयाय नमः ॥
ॐ शंखिनी ह्रीं तर्जनीभ्यां स्वाहा ॥ ॐ शंखिनी ह्रीं शिरसे स्वाहा ॥
ॐ चक्रिणी ह्रूं मध्यमाभ्यां वषट् ॥ ॐ चक्रिणी ह्रूं शिखायै वषट् ॥
ॐ गदिनी ह्रैं अनामिकाभ्यां हूं ॥ ॐ गदिनी ह्रैं कवचाय हूं ॥
ॐ शूलिनी ह्रौं कनिष्ठिकाभ्यां वौषट् ॥ ॐ शूलिनी ह्रौं नेत्रत्रयाय वौषट् ॥
ॐ चापिनी ह्रः करतलकरपृष्ठाभ्यां फट् ॥ ॐ चापिनी ह्रः अस्त्राय फट् ॥

ॐ भूः भुवः स्वः ॐ ह्रीं ॐ तत्सवितुर् ह्रीं वरेण्यं ॐ ह्रीं भर्गो देवस्य क्लीं धीमहि ॐ ह्रीं धियो यो नः क्लीं प्रचोदयादात्मिके ह्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॐ ह्रीं परोरजसेसावदों ॐ ह्रीं आपो ज्योतिरसोमृतं ब्रह्मभूर्भुवःस्वरोम् ॥ ॐ सत्यं ॐ ॥

अथध्यानं—

ॐ क्लीं ह्रीं क्लीं ॐ अरिशंखकृपाणखेटबाणान् सुधनुःपाशमथांबुजं दधाना ॥
भजतां महिषोत्तमांगसंस्था वनदुर्गा सदृशी श्रियेस्तु दुर्गा ॥
ॐ क्लीं ह्रीं क्लीं ॐ नमः ॥ १ ॥

अरिशंखगदाबाणं खेटकं परशुं तथा ॥
अम्बुजं पाशहस्ताभ्यां देवीं दुर्गामहं भजे ॥

ॐ क्लीं ह्रीं क्लीं ॐ हेमप्रख्यामिंदुखंडांतमौलिं शंखारिष्टाभीतिहस्तां त्रिनेत्रां ॥
हेमाब्जस्थां पीतवर्णां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि ॥
ॐ क्लीं ह्रीं क्लीं ॐ नमः ॥

ॐ सहनाववतु ओंसहनौ भुनक्तु ॐ सहवीर्यं करवावहै ॥
ॐ तेजस्विनावधीतमस्तु ॐ मा विद्विषावहै ॐ शांतिः शांतिः शांतिः ॥

ॐ क्लीं लं	पृथिव्यात्मकं	वनदुर्गादेवीगायत्र्यै	गंधं	कल्पयामि	॥
,, हं	आकाशात्मकं	,,	पुष्पं	,,	॥
,, यं	वाय्वात्मकं	,,	धूपं	,,	॥
,, रं	अग्न्यात्मकं	,,	दीपं	,,	॥
,, वं	अमृतात्मकं	,,	अमृतनैवेद्यं	,,	॥
,, सं	सोमात्मकं	,,	तांबूलं	,,	॥

ॐ ऐं ह्रीं श्रीं उत्तिष्ठ पुरुषि किं स्वपीशि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय शमय श्रीं ह्रीं ऐं स्वाहा ॥
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणवशिरसात्मिकें हूं फट् स्वाहा ॥ १ ॥

ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ॥ १ ॥

ॐ क्लीं ऐं ह्रीं श्रीं क्लीं ॐ हेतुकं पूर्वपीठे तु क्लीं आग्नेय्यां त्रिपुरांतकं ॥

क्लीं दक्षिणे चाग्निवेतालं क्लीं नैऋत्यां यमजिव्हकम् ॥

ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥ २ ॥

ॐ सत्यं ॐ तपः ओं जनः ओं महः ओं स्वः ओं भुवः ओं भूः (२)

ॐ भूः ॐ भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् (१)

ॐ क्लीं ऐं ह्रीं श्रीं क्लीं ॐ कालाख्यं वारुणे पीठे क्लीं वायव्यां तु करालिनम् ॥

क्लीं उत्तरे एकपादं तु क्लीं ईशान्यां भीमरूपिणम् ॥

ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥ ३ ॥

ॐ सत्यं ॐ तपः ओं जनः ओं महः ओं स्वः ओं भुवः ओं भूः (२)

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)

ॐ क्लीं ऐं ह्रीं श्रीं क्लीं ॐ आकाशे तु निरालंबं क्लीं पाताले वडवानलम् ॥

क्लीं यथाग्रामे तथारण्ये तथा क्षेत्रे क्लीं रक्ष मां वटुकस्तथा ॥
ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥ ४ ॥
ॐ सत्यं ओं तपः ओं जनः ओं महः ॐ स्वः ओं भुवः ओं भूः (२)

ॐ भूः ओं भुवः ॐ स्वः ओं महः ओं जनः ओं तपः ॐ सत्यम् (१)
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं ॐ सर्वमंगलमागल्ये ऐं ह्रीं शिवे सर्वार्थसाधिके ॥
श्रीं शरण्ये त्र्यंबके गौरी क्लीं नारायणि नमोऽस्तु ते ह्रीं ॐ
ऐं शरणागतदीनार्त ह्रीं परित्राणपरायणे ॥
श्रीं सर्वस्यार्तिहरे देवी क्लीं नारायणि नमोऽस्तु ते ह्रीं ॐ ॥ ५ ॥
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ओं जनः ओं महः ओं स्वः ओं भुवः ओं भूः (२)

ॐ भूः ॐ भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् (१)
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ओं जनः ओं महः ओं स्वः ओं भुवः ओं भूः (२)

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)

ॐ क्लीं ॐ ब्रह्माण्यै ॐ क्लीं ॐ नमः ॥
,, वारुणीखल्विन्यै ,, ,,
,, माहेश्वर्यै ,, ,,
,, कुलनासिन्यै ,, ,,
,, कुमारिण्यै ,, ,,
,, जयंतिपुरलाहिवाराह्यै ,, ,,
,, अष्टमहाकालिमाहेश्वर्यै ,, ,,
,, चित्रकूटइंद्राण्यै ,, ,,
,, त्रिपुरहरब्रह्मचारिण्यै ,, ,,
,, एकवृक्षशृपिण्यै महालक्ष्म्यै ,, ,,
,, त्रिपुरहरब्रह्मांडनायकायै ,, ,,

ॐ क्लीं ॐ क्षं क्षं त्रैलोक्यवशंकराणि हं क्षं बीजाक्षराणि ॐ क्षं हं क्षं क्षं क्लीं ॐ नमः ॥
ॐ क्लीं शांभवी मे शुभं कुरु कुरु ॐ क्लीं हूं फट् स्वाहा ॥
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं ॐ वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥ ॥५१॥

ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॥ १ ॥
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ क्लीं ह्रीं श्रीं सकलनरमुखभ्रमरी ॐ क्लीं ॐ नमः ॥
ॐ ह्रीं क्लीं ॐ सकलराजमुखभ्रमरी ॐ क्लीं ॐ नमः ॥
ॐ क्रों सों क्लीं ॐ सकलदेवतामुखभ्रमरी ॐ क्लीं ॐ नमः ॥
ॐ ह्रीं क्लीं क्लीं ॐ सकलकामिनीमुखभ्रमरी ,, ,,
ॐ क्लीं ई सों ॐ सकलदेशमुखभ्रमरी ,, ,,
ॐ क्लीं ॐ त्रैलोक्यचित्तभ्रमरी ,, ,,
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ओं जनः ओं महः ओं स्वः ओं भुवः ओं भूः (२)

ॐ भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् (१)
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ क्षां क्षीं क्षूं क्षैं क्षौं क्षः उग्रभैरवादिसर्वभूतप्रेतपिशाचादिचित्तभ्रमरी
ॐ क्लीं श्रीं ह्रीं ऐं क्लीं ॐ वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(८) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॥ १ ॥
ॐ क्रीं ऐं ह्रीं श्रीं क्रीं वनदुर्गां देवीं गायत्रीं प्रणवशिरसात्मिके हुं फट् स्वाहा ॥
ॐ क्रीं हुं धुं हुं क्रीं गजमंत्र क्रीं गजयंत्र क्रीं गजतंत्रभ्रमरी ॥ ॐ क्रीं हुं धुं हुं क्लीं सिद्धमंत्र. क्लीं सिद्धयंत्र क्रीं सिद्धतंत्रभ्रमरी ॥ ॐ क्रीं हुं धुं हुं क्रीं साध्यमंत्र क्रीं साध्ययंत्र क्रीं साध्यतंत्रभ्रमरी ॥ ॐ क्रीं सकलसुरासुरसर्वमंत्रभ्रमरी क्रीं सर्वयंत्र-भ्रमरी क्लीं सर्वतंत्रभ्रमरी, ॐ क्रीं श्रीं ह्रीं ऐं क्रीं वनदुर्गां देवीं गायत्रीं प्रणव-शिरसात्मिके हुं फट् स्वाहा ॥

ॐ सत्यं ॐ तपः ओं जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(९) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)
ॐ क्रीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणवशिरसात्मिके हुं फट् स्वाहा ॥
ॐ क्रीं सर्वसंक्षोभिणीं, क्रीं सर्वछेदिनीं, क्रीं सकलमनोन्मादिनीं
ॐ आं ह्रीं क्रीं परमकल्याणीं ॐ क्रीं महायोगिनीं ॥
ॐ क्रीं महाविद्यां प्रवक्ष्यामि क्रीं महादेवेन निर्मितां ॥
क्रीं चिंतितां किरातरूपेण क्लीं मानृणां हृदयनंदिनीं ॥
ॐ क्रीं श्रीं ह्रीं ऐं क्रीं वनदुर्गां देवीं गायत्रीं प्रणवशिरसात्मिके हुं फट् स्वाहा ॥

ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(१०) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणवशिरसात्मिकें हूं फट् स्वाहा ॥
ॐ क्लीं उत्तमा सर्वविद्यानां क्लीं सर्वभूतशंकरी ॥
ॐ क्लीं सर्वपापक्षयकरी क्लीं सर्वशत्रुनिवारिणी ॥ १ ॥
ॐ क्लीं कुलकरीं ॥ क्लीं गोत्रकरीं ॥ क्लीं धनकरीं ॥ क्लीं धान्यकरीं ॥ क्लीं बलकरीं ॥
क्लीं यशस्करीं ॥ क्लीं विद्याकरीं क्लीं उत्साहबलवर्धिनीं ॥ क्लीं सर्वभूतानां विजृंभिणीं ॥ क्लीं सर्वभूतानां स्तंभिनीं ॥ क्लीं सर्वभूतानां मोहिनीं ॥
क्लीं सर्वभूतानां द्राविणीं ॥ क्लीं सर्वभूतानां आकर्षिणीं ॥ क्लीं सर्वमंत्र-प्रभंजिनीं ॥ क्लीं सर्वविद्याप्रभेदिनीं ॥
ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गां देवीं गायत्रीं प्रणवशिरसात्मिकें हूं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(११) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गां देवीं गायत्रीं प्रणवशिरसात्मिकें हूं फट् स्वाहा ॥

Scanned with OKEN Scanner

ॐ एकाहिकज्वर द्व्याहिकज्वर त्र्याहिकज्वर चातुर्थिकज्वर अर्धमासिक षण्मासिक
सांवत्सरिक वातिक पैत्तिक श्लैष्मिक सान्निपातिकज्वर सततज्वर शीतज्वर
उष्णिकज्वर विषमज्वर तापज्वर क्लीं सर्वज्वर गंडमालाभूतादिरोगाणां त्रासिनीं ॥
क्लीं सर्पाणां त्रासिनीं ॥ क्लीं सर्वत्रासिनीं ॥ क्लीं शिरःशूल अस्थिशूल पक्षशूल
गुदशूल गुल्मशूल लिंगशूल योनिशूल पादशूल सर्वांगशूल विस्फोटकप्रभेदिनीं
ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(१२) ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् ॥ १ ॥
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ क्लीं आत्मरक्षा ॥ क्लीं परोक्षरक्षा ॥ क्लीं प्रत्यक्षरक्षा ॥ क्लीं अग्निरक्षा ॥
क्लीं अघोरक्षा ॥ क्लीं वायुरक्षा ॥ क्लीं उदकरक्षा ॥ क्लीं महान्धकारोल्का-
विद्युदनिलचोरशस्त्रास्त्रेभ्यो रक्ष मां रक्ष मां रक्ष मां ॥
ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(१३) ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यम् (१)
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गी देवीं गायत्रीं प्रणवशिरसात्मिके हुं फट् स्वाहा ॥
,, महादेवस्य तेजसा भयंकरीष्टदेवतां बंधयामि ॥
,, पथानुगतचोराद्रक्षते बंधकस्य क्लीं कंटकं बंधयामि ॥
,, महागणेन पंचशीर्षेण पाणिना, ॐ क्लीं महादेवस्य तेजसा क्लीं सर्वशूलान् कहलपिंगलेन बंधयामि ॥

क्लीं कंटमयूरस्द्रांगी

क्लीं अं आं क्लीं मातंगीं	क्लीं लृं लॄं क्लीं मातंगीं
,, इं ईं ,, मातंगीं	,, एं ऐं ,, मातंगी
,, उं ऊं ,, मातंगीं	,, ओं औं ,, मातंगीं
,, ऋं ॠं ,, मातंगीं	,, अं अः ,, मातंगीं
क्लीं स्वरस्वर ब्रह्मदंडं ॥	क्लीं हिलिहिलि यमदंडं ॥
,, विस्वरविस्वर रुद्रदंडं ॥	,, नित्यापद्मादिनीं
,, प्रज्वलप्रज्वल वायुदंडं ॥	,, हंसिनीं
,, प्रहरप्रहर इंद्रदंडं ॥	,, शंखिनीं
,, भक्षभक्ष निर्ऋतिदंडं ॥	,, चक्रिणीं

क्लीं गदिनीं क्लीं शूलिनीं क्लीं पाशादिधारिणीं
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा
ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(१४) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ क्लीं आयुर्विद्यां च सौभाग्यं धनं धान्यं तथैव च ॥
सदा शिवं पुत्रवृद्धिं देहि मे चंडिके शुभे ॥
ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(१५) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)
ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥
ॐ क्लीं शिरो रक्षतु ब्रह्माणी क्लीं मुखे माहेश्वरी तथा ॥
क्लीं कंठे रक्षतु वाराही क्लीं शची भुजौ तु रक्षतु ॥
क्लीं हृदि रक्षतु चामुंडा क्लीं कुक्षौ रक्षतु वारुणी ॥

क्लीं पादौ रक्षतु वैष्णवी क्लीं पृष्ठदेशे धनुर्धरी ॥
क्लीं यथाग्रामे तथा क्षेत्रे तथा रण्ये ॥ क्लीं वनदुर्गा देवी गायत्री रक्षस्व मां पदे पदे ॥
ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हुं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(१६) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)

ॐ क्लीं ब्राह्मी	क्लीं इंद्राणी	क्लीं नारसिंही
,, क्लीं माहेश्वरी	क्लीं चामुंडा	क्लीं महालक्ष्मी
,, क्लीं कौमारी	क्लीं सिद्धचामुंडेश्वरी	क्लीं सर्वदा
,, क्लीं वैष्णवी	क्लीं गणेश्वरी	क्लीं सर्वत्रस्थिता
,, क्लीं वाराही	क्लीं क्षेत्रपाली	क्लीं रक्षमां रक्षमां रक्षमां

ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिके हुं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

Scanned with OKEN Scanner

(१७) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम्' (१)
ॐ क्लीं गं ह्रीं श्रीं क्लीं वनदुर्गा' देवीं गायत्रीं प्रणवशिरसात्मिके हुं फट् स्वाहा ॥
ॐ क्लीं मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
क्लीं हेलानिर्मितधूम्रलोचनवधे हे चंडमुंडार्दिनि ॥
क्लीं निःशेषीकृतरक्तबीजदनुजे नित्ये निशुंभापहे
क्लीं शुंभध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेम्बिके ॥
ॐ क्लीं श्रीं ह्रीं गं क्लीं वनदुर्गा' देवीं गायत्रीं प्रणवशिरसात्मिके हुं फट् स्वाहा ॥
ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(१८) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)
ॐ क्लीं गं ह्रीं श्रीं क्लीं वनदुर्गा' देवीं गायत्रीं प्रणवशिरसात्मिके हुं फट् स्वाहा ॥
ॐ क्लीं छायायै स्वाहा ॥ ॐ क्लीं चतुरायै स्वाहा ॥ ॐ क्लीं झिलि स्वाहा ॥ ॐ क्लीं झिलिझिलि स्वाहा ॥ ॐ क्लीं हिलि स्वाहा ॥ ॐ क्लीं हिलिहिलि स्वाहा ॥ ॐ क्लीं पिलि स्वाहा ॥ ॐ क्लीं पिलिपिलि स्वाहा ॥ ॐ क्लीं हर स्वाहा ॥ ॐ क्लीं हरहर स्वाहा ॥ ॐ क्लीं गंधर्वाय स्वाहा ॥ ॐ क्लीं गंधर्वाधिपतये स्वाहा ॥ ॐ क्लीं यक्षाय स्वाहा ॥ ॐ क्लीं यक्षाधिपतये स्वाहा ॥ ॐ क्लीं रक्षसे स्वाहा ॥ ॐ क्लीं रक्षोधिपतये स्वाहा ॥ ॐ क्लीं भूः स्वाहा ॥ ॐ क्लीं भुवः स्वाहा ॥ ॐ क्लीं स्वः स्वाहा ॥

ॐ क्रीं महः स्वाहा ॥ ॐ क्रीं जनः स्वाहा ॥ ॐ क्रीं तपः स्वाहा ॥ ॐ क्रीं सत्यं स्वाहा ॥ ॐ क्रीं भूर्भुवः स्वः स्वाहा ॥ ॐ क्रीं भूतप्रेतपिशाचोल्कामुखी स्वाहा ॥ ॐ क्रीं रुद्रमुखी स्वाहा ॥ ॐ क्रीं रुद्रजटी स्वाहा ॥ ॐ क्रीं ब्रह्मविष्णुरुद्रतेजसे स्वाहा ॥

ॐ क्रीं श्रीं ह्रीं ऐं क्रीं वनदुर्गा देवी गायत्री प्रणवशिरसात्मिके हूं फट् स्वाहा ॥

ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः (२)

(१९) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)

ॐ क्रीं ऐं ह्रीं श्रीं क्रीं वनदुर्गा देवी गायत्री प्रणवशिरसात्मिके हूं फट् स्वाहा ॥

ॐ क्रीं श्रां श्रीं श्रूं क्रीं भैरवि भद्रे सर्वनृपाणां सर्वराजकार्यकर्तृसर्वजनानां भ्रामय भ्रामय कीलय कीलय ॐ क्रीं श्रूं श्रीं श्रां क्रीं श्रीं ह्रीं ऐं क्रीं भैरवि भद्रे भवानि वनदुर्गा देवी गायत्री प्रणवशिरसात्मिके हूं फट् स्वाहा ॥

ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥ (२)

(२०) ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् (१)

ॐ क्रीं ऐं ह्रीं श्रीं क्रीं वनदुर्गा देवी गायत्री प्रणवशिरसात्मिके हूं फट् स्वाहा ॥

ॐ क्रीं या इमा भूतप्रेत पिशाच राक्षस नवग्रह भूतवैतालशाकिनीडाकिन्यः

कुष्मांडः वासवः चत्वारो राजपुरुषाः राजकार्यकर्ता राजपुरुषः कलहपुरुषः क्लीं सर्वान् बंधयामि बंधयामि ॥

ॐ क्लीं श्रीं ह्रीं ऐं क्लीं वनदुर्गा देवीं गयत्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॥

ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐ भुवः ॐ भूः ॥ २ ॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॥ १ ॥

ॐ क्लीं ऐं ह्रीं श्रीं क्लीं वनदुर्गा देवीं गायत्रीं प्रणवशिरसात्मिकं हूं फट् स्वाहा ॥

ॐ सर्वदुष्टानां वा तेषां क्लीं सर्वदिशि बंधयामि ॥ क्लीं दुर्दिशोबंधयामि ॥

क्लीं हस्तौ बंधयामि ॥ क्लीं चक्षुषी बंधयामि ॥ क्लीं श्रोत्रे बंधयामि ॥ क्लीं जिव्हां बंधयामि ॥ क्लीं घ्राणं बंधयामि ॥ क्लीं बुद्धिं बंधयामि ॥ क्लीं गतिं बंधयामि ॥ क्लीं मतिं बंधयामि ॥ क्लीं अंतरिक्षं बंधयामि ॥ क्लीं आकाशं बंधयामि ॥ क्लीं पातालं बंधयामि क्लीं यममुखेन पंचयोजनविस्तीर्णं बंधयामि ॥ क्लीं रुद्रो बध्नातु ॥ क्लीं रुद्रमंडलं रुद्रं सपरिवारं देवताप्रत्यधिदेवतासहितं क्लीं रुद्रमंडलं बंधयामि ॥ क्लीं रुद्रमंडलं प्रत्यक्षं बंधय बंधय सपरिवारकं सर्वतो मां रक्ष रक्ष मम सर्वोपद्रवं नाशय नाशय ॐ ह्रां ह्रीं हूं श्रीं क्रां क्लीं रुद्रं आं ह्रीं क्रों हूं फट् स्वाहा ॥

ॐ ब्रह्मद्विषो जहि ॐ अब्रह्मद्विषो जहि ॥

ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

ॐ सत्यं ॐ तपः ॐ जनः ॐ महः ॐ स्वः ॐभुवः ॐ भूः ॥ २ ॥

॥ इति वनदुर्गाकवचस्तोत्रं ॥

॥ अथ मृतमंत्रसंजीवनी शुक्रविद्या नामकं अष्टमांगं ८ ॥

ॐ अस्य श्री मृतमंत्रसंजीवनीमहामंत्रस्य ॐ सदाशिव ऋषिः ॥ ॐ गायत्री छंदः ॥ ॐ पराशक्तिर्देवता ॥ ॐ हं बीजं ॥ ॐ सों शक्तिः ॥ ॐ हं कीलकं ॐ श्री पराशक्तिप्रीत्यर्थे सर्वमंत्रसंजीवनार्थं शीघ्रं उपनामंत्रसिद्ध्यर्थे जपे विनियोगः ॥ ॐ हंसां ॐ हंसीं ॐ हंसूं ॐ हंसैं ॐ हंसौं ॐ हंसः ॥ एवं षडंगन्यासः ॥

॥ अथ करन्यासः ॥	॥ अथ हृदयादिन्यासः ॥
ॐ हंसां अंगुष्ठाभ्यां नमः ॥	ॐ हंसां हृदयाय नमः ॥
ॐ हंसीं तर्जनीभ्यां स्वाहा ॥	ॐ हंसीं शिरसे स्वाहा ॥
ॐ हंसूं मध्यमाभ्यां वषट् ॥	ॐ हंसूं शिखायै वषट् ॥
ॐ हंसैं अनामिकाभ्यां हुं ॥	ॐ हंसैं कवचाय हुं ॥
ॐहंसौं कनिष्ठाकाभ्यां वौषट् ॥	ॐ हंसौं नेत्रत्रयाय वौषट् ॥
ॐ हंसः करतलकरपृष्ठाभ्यां फट् ॥	ॐ हंसः अस्त्राय फट् ॥

ॐ नमो भगवति मंत्रमातृके अक्षमालिके सर्वदा स्फुरसि सर्वहृदि वससि नमस्ते

परारूपे ॥ नमस्ते पश्यंतीरूपे ॥ नमस्ते मध्यमारूपे ॥ नमस्ते वैखरीरूपे ॥ सर्वतत्वात्मिके ॥ सर्वविद्यात्मिके ॥ सर्वशक्त्यात्मिके ॥ सर्वमंत्रशापविमोचनि सर्वमंत्रसंजीवनि सर्वदेवतात्मिके भगवति मंत्रमातृके अक्षमालिके नमस्ते नमस्ते नमस्ते ॥ इति ध्यात्वा ॥

ॐ ह्रीं श्रीं ॐ भूर्भुवः स्वः ॐ अं आं इं ईं ह्रीं ह्रैं ह्रीं जुं सः सर्वमंत्रान् संजीवय संजीवय स्वाहा ॥ ॐ ह्रीं जुं सः ॐ भूर्भुवः स्वः ॐ उं ऊं ऋं ॠं सर्वमंत्रयंत्राणां संजीवनं कुरु कुरु स्वाहा ॥

ॐ भूर्भुवः स्वः ॐ ऌं ॡं ॐ ह्रीं हंसः सोहं रं रं रं सर्वमंत्रान् संजीवय संजीवय कुरु कुरु स्वाहा ॥

ॐ भूर्भुवः स्वः ॐ एं ऐं ॐ ह्रीं रं रं रं सर्वमंत्राक्षराणां उत्कीलय उत्कीलय स्वाहा ॥

ॐ भूर्भुवः स्वः ॐ ओं औं अं अः ॐ ह्रीं ॐ ह्रीं ह्रीं सर्वमंत्रयंत्रतंत्रादीनां संजीवय संजीवय रं रं रं ठः ठः ठः सर्वमंत्रसंजीवनं कुरु कुरु स्वाहा ॥

ॐ अं कं चं टं तं पं यं शं हं क्षं ॐ ह्स्त्रां ह्स्त्रीं क्षों गं क्ष म ल व र क्रीं ड म ल व र क्रीं क्षां क्षीं क्षूं क्षें क्षौं क्षः सर्वमंत्रान्कीलय कीलय हूं फट् स्वाहा ॥

ॐ त्वमायानंतशक्तिस्त्वं प्रवाहो जायते त्वया ॥
सा स्मृता पूजिता ध्याता योगिनामपि सिद्धिदा ॥
ॐ त्वया बद्धा सर्वदेवा भ्रमंति निजकर्मणा ॥
सा तुष्टा सर्वमंत्राणां अमृता सिद्धिदायिनि ॥
ॐ मंत्रसंजीवनी विद्या वसिष्ठेन च साधिता ॥
सिद्धिदा सर्वमंत्राणां सदाशिवप्रसादतः ॥
जपादौ वा पाठादौ वा जपान्ते वा पाठान्ते ॥
सप्तवारं पठित्वा तु शीघ्रं सिद्धिं लभेन्नरः ॥

॥ इति मृतमंत्रसंजीवनीशुक्रविद्या ॥

॥ श्री कुंजिकास्तोत्रं नवमांगं ९ ॥

॥ श्री शिव उवाच ॥

शृणु देवि प्रवक्ष्यामि कुंजिकास्तोत्रमुत्तमम् ॥
येन मंत्रप्रभावेण चंडीपाठफलं भवेत् ॥ १ ॥
न वर्म नार्गलास्तोत्रं न कीलकं न रहस्यकं ॥
कुंजिकापाठमात्रेण दुर्गापाठफलं लभेत् ॥ २ ॥

न सूक्तं नापि ध्यानं च न न्यासा नापि चार्चनम् ॥
अस्ति गुह्यतरं देवि देवानामपि दुर्लभं ॥
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ॥ ३ ॥
मारणं मोहनं वश्यं शांतिकोच्चाटनादिकम् ॥
पाठमात्रेण संसिद्धिः कुंजिकास्तोत्रमुत्तमम् ॥ ४ ॥

॥ अथ ध्यानम् ॥

सिंहादुत्थाय कोपाद्द दद्ड दड दडं धावमाना भवानी
दैत्यानां दिव्यशस्त्रैस्ततड तड तडं त्रोटयन्ती शिरांसि ॥
तेषां रक्तं पिबन्ती घुघट घट घटं तापयन्ती पिशाचा
न्पश्चादट्टं हसन्ती खखड खड खडं शांभवी मां पुनातु ॥ ५ ॥

अथ मंत्रः

ॐ क्लौं ह्रीं क्लीं ग्लौं जुं सः ज्वल ज्वल ज्वल ज्वल ॐ ऐं ह्रीं क्लीं
चामुण्डायै विच्चे प्रज्वल प्रज्वल हं सं लं क्षं फट् स्वाहा ॥ ६ ॥

ॐ नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि
नमस्ते कैटभघ्न्यै च नमस्ते महिशाशनि ॥ ६ ॥
नमस्ते शुंभहन्त्री च निशुंभासुरघातिनि ॥
जाग्रहि श्री महादेवि जपसिद्धिं कुरुष्व मे ॥ ७ ॥

ओंकारी सृष्टिरूपिण्यै ह्रींकारी प्रतिपालिका ॥
क्लींकारी कालरूपिण्यै बीजरूपे नमोस्तु ते ॥ ८ ॥
चंडघातिनी चामुंडा यैकारी वरदायिनी ॥
विच्चे चाभयदा नित्यं नमस्ते मंत्ररूपिणी ॥ ९ ॥
ॐ धां धीं धूं धूर्जटेः पत्नी ॐ वां वीं वूं वागीश्वरी तथा ॥
ॐ क्रां क्रीं क्रूं कालिका देवी ॐ शां शीं शूं मे शुभं कुरु ॥ १० ॥
ॐ हुं हुं हुं हुं काररूपिण्यै ॐ जं जं जं भालनादिनी ॥
ॐ भ्रां भ्रीं भ्रूं भैरवी भद्रे भवानी ते नमोनमः ॥ ११ ॥
अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं विडुरावि मर्दय मर्दय हं क्षं वलय वलय जाग्र जाग्र त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा ॥ १२ ॥
ॐ प्रां प्रीं प्रूं पार्वती पूर्णा ॐ खां खीं खूं खेचरी तथा ॥
ॐ म्लां म्लीं म्लूं मानविस्तीर्णा कुंजिकायै नमोनमः ॥ १३ ॥
ॐ स्रां स्रीं स्रूं च सप्तशती सिद्धिं कुरु जपेन मे ॥
इदं तु कुंजिकास्तोत्रं मंत्रजागृतिहेतवे ॥ १४ ॥

अभक्तानां न दातव्यं गोपनीयं च पार्वति ॥
देवि यः कुंजिकाहीनां दुर्गां सप्तशतीं पठेत् ॥
न तस्य जायते सिद्धिररण्ये रुदितं यथा ॥ १५ ॥

॥ इति श्री कुंजिकास्तोत्रं नाम नवमांगं ९ ॥

॥ अथ श्री महाकालीसूक्तं दशमांगं १० ॥

॥ ॐ वाङ् मे मनसि प्रतिष्ठिता ॥

ॐ अस्य श्री महाकालीसूक्तस्य ॐ सदाशिव ऋषिः ॥ ॐ जगती छंदः ॥ ॐ श्री महाकाली देवता ॥ ॐ आं बीजं ॥ ॐ ह्रीं शक्तिः ॥ ॐ स्वाहा कीलक ॥ ॐ श्री महाकालीप्रीत्यर्थं महाकालीसूक्तपारायणे विनियोगः ॥

॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः षडंगन्यासः ॥

अथकरन्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यांनम । ॐ ह्रीं तर्जनीभ्यां स्वाहा । ॐ ह्रूं मध्यमाभ्यां वषट् । ॐ ह्रैं अनामिभ्यां हुं । ॐ ह्रौं कनिष्ठिकाभ्यां वौषट् ॐ ह्रः करतलकरपृष्ठाभ्यां फट् ॥

अथ हृदयादिन्यासः । ॐ ह्रां हृदयाय नमः ॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॐ ह्रूं शिखायै वषट् ॥ ॐ ह्रैं कवचाय हुं ॥ ॐ ह्रौं नेत्रत्रयाय वौषट् ॥ ॐ ह्रः अस्त्राय फट् ॥

॥ अध्यानं ॥

ॐ ह्रीं ॐ नमः ॐ ह्रीं ॐ

घोरां भीमपराक्रमां दशकरैः खगूडेपुशूलं गदां ॥
चक्रं पाशभुशुंडिके च परशुं चापं शिरो बिभ्रतीं ॥
वागीशां मधुकैटभप्रमथिनीं ब्रह्मार्तिहंत्रीं परां ॥
त्रिंशल्लोचनमंडितां दशमुखीं वंदे महाकालिकां ॥
ॐ ह्रीं ओं मः न ह्रीं ॐ ॥१॥

" सदाशिव उवाच " ॥२॥
" सुंदरी त्रिपुरा कामा कामिनी साधकप्रिया ॥
अमोघसत्यवचना विमोहा मोहरूपिणी ॥ " ॥३॥
" अमृतेशी च कल्याणी कारुण्या करुणालया ॥
कलातीता कोमलांतःकरणा विश्वनायिका " ॥४॥
" विघ्नकर्त्री विघ्नहर्त्री विघ्नेशी विघ्नयक्षिणी ॥
कामाख्या कामनिलया कामेशी भगमालिनी " ॥५॥
" त्रिखंडा योनिमुद्रा च धेनुमुद्रा च खेचरी ॥
पाशांकुशद्राविणी च मोहिनी मदभंजिनी " ॥६॥

ॐ ह्रीं ॐ नमः ॐ ह्रीं ॐ

" मदप्रिया दुराराध्या काला कालविनाशिनी ॥
काष्टा कुलेशी कल्याणी सुकल्या कल्यकारिणी
ॐ ह्रीं ओं मः न ह्रीं ॐ ॥७॥

" कोमलांगी विश्वमाता युगेशानी युगंधरा ॥
ब्रह्मविष्णुमहेशानमोहिनी स्तंभिनी परा " ॥८॥

" अमोघा सत्यसंकल्पा सत्यासत्यविनाशिनी ॥
सत्यग्रामा सत्यवहा सत्यवश्या जनप्रिया " ॥९॥

" शरीरवासिनी वासा निर्मदा वामदक्षिणा ॥
कपालकुंडला काली कालिका कालनाशिनी " ॥१०॥

" गानप्रिया च गीतांगी सुगीता धर्मशालिनी
विश्वयोनिर्विश्वमाता विश्ववंद्या क्रियामयी " ॥ ११ ॥

" तुष्टाव वाग्भिर्दिव्याभिमहाकालीं महेश्वरः ॥
वेदवाणीं सुतत्त्वाभिर्लोकानां हितकाम्यया " ॥ १२ ॥

" सदाशिव उवाच .... " ॥ १३ ॥

ॐ ह्रीं ॐ नमः ॐ ह्रीं ॐ

" शिवामनन्यां विविधप्रभावां कालीं कलामालिनीं विश्ववंद्याम् ॥
कपालखट्वांगधरां नृमुंडमालाविभीषां मृगचर्मशोभाम्
ॐ ह्रीं ओं मः न ह्रीं ॐ ॥१४॥

" सुशुष्कमांसां च शवासनस्थां विभीषणां भीषयंतीं सुरारीन् ॥
रक्तप्रियां मांसमदाविपूर्णां कालीं शरण्यां शरणं व्रजामि " ॥१५॥

" सुघोरबीजं च कपीश्वरश्च चिंतामणिः कुब्जिककामरूपे ॥
वियासु वियासु च कामराजं कामः कलामालिनी कालराजं " ॥१६॥

" वह्नेर्वधूर्मंत्रराजोयमीशे विश्वं पुनातीश्वरि देवि यंत्रे ॥
मंत्रेण चानेन सिध्यंति सर्वाः सुसिद्धयः सर्वजगन्निवासे " ॥१७॥

" पंचारयुग्मं च त्रिकोणयुग्मं पुनश्च पंचारयुगेन वद्धं ॥
कलाप्रकोष्टं किलभूगृहं च यंत्रेश्वरं ते च पदाब्जवासं " ॥१८॥

" संपूज्य यंत्रं तव विश्वनायिके निष्पापिनस्ते सहसा भवंति ॥
ये साधकास्तव मार्गानुसारिणः कुलानुवृत्त्या परमाः पवित्राः " ॥१९॥

" ते सिद्धिऋद्धिं च यशोनुगम्यां नृणां वशीकृत्य भवंति भूपाः ॥
समस्तमंत्रेण विधाय चांगं न्यासादिकं भक्तिसुभावयुक्ताः " ॥२०॥

॥७०॥

ॐ ह्रीं ॐ नमः ॐ ह्रीं ॐ

,, ते किंकरीकृत्य गृणंति देवानित्से जगत्येकविभूतियुक्ते ॥
न वदामि चान्यं न शृणोमि चान्यं न गृणामि चान्यं न विचिंतयामि
ॐ ह्रीं ॐ मः न ह्रीं ॐ ॥२१॥
,, न स्मरामि चान्यं न भजामि चान्यं न ध्यायामि चान्यं
न वितर्कयामि ॥
न गायामि चान्यं तव पादमंत्रात्त्वां विश्वयोनिं शरणं प्रपद्ये ,, ॥ २२ ॥
,, ऋषिरुवाच .... ॥ २३ ॥
,, इति वाक्यं समाकर्ण्य परमामृतसन्निभं ॥
प्रसन्नाभून्महाकाली व्रियतामिप्सितो वरः ,, ॥ २४ ॥
,, इत्युक्त्वा च विशालाक्षी शंभोरानंददायिनी ॥
प्रसन्ना परमाह्लादसंयुता शिवभाषणात् ,, ॥ २५ ॥
,, श्री देव्युवाच .... ॥ ,,
,, व्रियतां मनसाभीष्टो वरो जगति दुर्लभः ॥
दास्याम्यद्याभिदातव्यं तव स्तुत्या वशीकृता ,, ॥ २६ ॥
,, सदाशिव उवाच .... ,,

ॐ ह्रीं ॐ नमः ॐ ह्रीं ॐ

„ कुलाचारेण ते देवि मतिर्मास्तु कदाचन ॥
शिथिला देवदेवेशि सूक्तं च सफलं तव ॐ ह्रीं ओं मः न ह्रीं ॐ ॥२७॥

„ श्री देव्युवाच „

„ शृणुध्वं प्रीतिसंयुक्ता ब्रह्मविष्णुमहेश्वराः ॥
देवीसूक्तं परं ध्यायन् भविष्यति वरार्थदम् „ ॥२८॥

॥ ॐ ह्रीं हूं ह्रीं श्रीं क्लीं ऐं ह्रीं क्लीं स्वाहा ॥

विना त्रिसूक्तं च पठेद्यस्तु सप्तशतीं नरः ॥
मातृगामी स विज्ञेयो नरकावासतत्परः ॥
ममावज्ञापराधेन ब्रह्मघ्नानां गतिं व्रजेत् ॥

॥ इति श्री महाकाली सूक्तं दशमांगं संपूर्ण १० ॥

॥ अथ श्री महालक्ष्मीसूक्तं एकादशांगं ११ ॥

॥ ॐ आप्यायंतु ममांगानि ॥

ॐ अस्य श्री महालक्ष्मीसूक्तस्य ॐ विष्णुर्ऋषिः ॥ ॐ अनुष्टुप्छंदः ॥
ॐ महालक्ष्मी देवता ॥ ॐ ओं बीजं ॥ ॐ श्रीं महालक्ष्मी शक्तिः ॥ ॐ स्वाहा

कीलकं ॥ श्री महालक्ष्मीप्रीत्यर्थे महालक्ष्मीसूक्तपारायणे विनियोगः ॥
॥ ॐ श्रां श्रीं श्रूं श्रैं श्रौं श्रः ॥ षट्करन्यासाः हृदयादिन्यासाश्च
॥ ॐ श्रीं नमः ॐ श्रीं ॐ ॥

नित्यां स्वर्णसरोरुहप्रकटितां बालार्ककोटिप्रभां
श्वेतास्यस्तनमंडलारुणमयां मध्ये विचित्रप्रभाम् ॥
सत्सालाकमलेषुखड्गकुलिशं कौमोदकीं चक्रकं
शूलं वै परशुं च शंखममलं घंटां च पाशं क्रमात्
॥ ॐ श्रीं ॐ मः न श्रीं ॐ ॥ १ ॥

„ शक्तिं दंडकचर्मचापदशकं दोर्भिर्वहंतीं मुदा
सांद्रानंदमयीं कमंडलुधरां नीलोरुजंघाकुचां ॥
चित्रां माहिषमर्दिनीं गुणमयीं साम्राज्यलक्ष्मीप्रदां
मायाबीजमयीं परावरमहालक्ष्मीं भजे राजसीम् ॥ „ ॥ २ ॥
„ हिरण्यवर्णां० (इत्यादि श्रीसूक्त मंत्राः) „ ॥ ३ ॥
„ तां म आवह० „ ॥ ४ ॥
„ अश्वपूर्वां० „ ॥ ५ ॥
„ कांसोस्मितां० „ ॥ ६ ॥

स. दु. पाठः श्री म. ल. सूक्तं ११ अंगं. ॥७४॥

॥ ॐ श्रीं नमः ॐ श्रीं ॐ ॥ ॥ ॐ श्रीं ॐ मः न श्रीं ॐ ॥

,, चंद्रां प्रभासां० ,, ॥ ७ ॥
,, आदित्यवर्णे० ,, ॥ ८ ॥
,, उपैतु मां देवसखः० ,, ॥ ९ ॥
,, क्षुत्पिपासामलां ज्येष्टां० ,, ॥ १० ॥
,, गंधद्वारां० ,, ॥ ११ ॥
,, मनसः काममाकूतिं० ,, ॥ १२ ॥
,, कर्दमेन प्रजा भूता० ,, ॥ १३ ॥
,, अपःस्रजंतु० ,, ॥ १४ ॥
,, आर्द्रां यः करिणीं० ,, ॥ १५ ॥
,, आर्द्रां पुष्करिणीं० ,, ॥ १६ ॥
,, तां म आवह जातवेदो० ,, ॥ १७ ॥
,, यः शुचिः प्रयतो भूत्वा० ,, ॥ १८ ॥

अज्ञानसंभवमना कलितान्वयं हि
भिक्षुं कपालिनमनागसमद्वितीयम् ॥
पूर्वं करग्रहणमंगलतो भवत्याः
शंभुं क एव बुबुधे गिरिराजकन्ये ,, ॥ १९ ॥

॥७४॥

॥ ॐ श्रीं नमः ॐ श्रीं ॐ ॥

" चर्मांबरं च शवभस्मविलेपनं च भिक्षाटनं च नटनं च परेतभूमौ ॥
वेतालसंहतिपरिग्रहता च शंभोः
शोभां बिभर्ति गिरिजे तव साहचर्यात् ॐ श्रीं ॐ मः न श्रीं ॐ ॥२०॥

" नारायण उवाच " ॥२१॥

" परावरेशीं जगदादिभूतां परां वरेण्यां वरदां वरिष्ठाम् ॥
वागीश्वरीं वहुवाग्भिः प्रगीतां त्वां विश्वयोनिं शरणं प्रपद्ये " ॥२२॥

" श्रियं समस्तैरधिवासभूतां महासुलक्ष्मीं धरणीधरां च ॥
अनादिमादिं परमार्थरूपां त्वां विश्वयोनिं शरणं प्रपद्ये " ॥२३॥

" एकामनेकां विविधां सुकार्यां सुकारिणीं सदसद्रूपिणीं च ॥
कल्याणरूपां च शिवां शिवप्रदां त्वां विश्वयोनिं शरणं प्रपद्ये " ॥२४॥

" सर्वाश्रयां सर्वजगन्निवासां श्रीमन्महालक्ष्मीमनादिदेवीं ॥
शक्तिस्वरूपां च शिवस्वरूपां त्वां विश्वयोनिं शरणं प्रपद्ये " ॥२५॥

" कामाभिधानां ह्यधिवासभूतां ह्रीं रूपिणीं कपिबीजप्रभावां ॥
कर्णाष्टबीजां परमार्थसंज्ञां त्वां विश्वयोनिं शरणं प्रपद्ये " ॥२६॥

॥ ॐ श्रीं नमः ॐ श्रीं ॐ ॥ ॥ ॐ श्रीं ॐ मः न श्रीं ॐ ॥

„ वैश्वानरस्त्रीसहितेन देवीं श्रीमंत्रराजेन विराजमानाम् ॥
सर्वार्थदात्रीं परमां पवित्रां त्वां विश्व० „ ॥२७॥
„ त्रिकोणपंचारयुगप्रभावां षट्कोणमिश्रां द्विदशारयुक्ताम् ॥
अष्टारचक्रादिनिवासभूतां त्वां विश्वयोनिं० „ ॥२८॥
„ पुनर्दशारद्वितीयेन युक्तां पंचारकोणांकितभूगृहां च ॥
यंत्राधिवासामपि यंत्ररूपां त्वां विश्व० „ ॥२९॥
„ संभाविता सर्वदा न्यासगम्यां सर्वस्वरूपामपि सर्वसेव्याम् ॥
सर्वाक्षरन्यासवशां वरिष्टां त्वां विश्व० „ ॥३०॥
„ विधाय कुंडं विधिना स्थंडिलं वा सुगंधीहोमं सफलं प्रकुर्वते ॥
त्वत्तोपणाज्जायते भाग्यपात्रं तेषां सुदेवैरपि योगगम्यं „ ॥३१॥
„ ऋषिरुवाच „ ॥३२॥
„ इति स्तुत्वाऽवसाने स महालक्ष्मीं ददर्श सः ॥
चतुर्भुजां त्रिनयनां महिषासुरघातिनीम् ॥ „ ॥

॥ ॐ आप्यायंतु ममांगानि ॥

॥ इति श्री महालक्ष्मीसूक्तं एकादशांगं समाप्तं ११ ॥

॥ अथ श्री महासरस्वतीसूक्तं द्वादशांगं १२ ॥

ॐ ह्सौं ॐ भूर्भुवः स्वः ॐ ह्रीं तत्सवितुर्ह्रीं वरेण्यं ह्रीं भर्गो देवस्य क्लीं धीमहि क्लीं धियो यो नः क्लीं प्रचोदयादात्मिके ह्रीं प्रणवशिरसात्मिके हूं फट् स्वाहा ॐ ह्सौं ॐ नमः ॥

ॐ क्लां ॐ क्लीं ॐ क्लूं ॐ क्लैं ॐ क्लौं ॐ क्लः ॥ एभिर्बीजैः

षट् करन्यासाः षट् हृदयादिन्यासाश्च

ॐ वाङ्मे मनसि प्रतिष्ठिता ॥ मनो मे वाचि प्रतिष्ठितमावीरावीर्म एधि वेदस्य म आणिस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रात् संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु अवतु माम् अवतु वक्तारं अवतु वक्तारं ॐ शांतिः शांतिः शांतिः ॥

ॐ अस्य श्री महासरस्वतीसूक्तस्य ॐ ब्रह्मा ऋषिः ॥ ॐ त्रिष्टुप् छंदः ॥ ॐ महासरस्वती देवता ॥ ॐ ॐ बीजं ॥ ॐ क्लीं महासरस्वती शक्तिः ॥ ॐ क्लीं स्वाहा कीलकं ॥ ॐ श्रीं सप्तशतीदुर्गापाठादौ महासरस्वतीसूक्त-पारायणे विनियोगः ॥

॥ ॐ क्लीं नमः ॐ क्लीं ॐ ॥

,, गौरीदेहसमुद्भवां शशिधरां क्लीं सात्विकीं सत्प्रियां

॥ ॐ क्लीं ॐमः न क्लीं ॐ ॥

बाणं मूशलशूलचक्रवरदान शंखं च घंटां करैः ॥
„ बिभ्राणां हलकार्मुकं सुविलसत्सौंदर्यरूपां परां
पद्माभां हि निशुंभशुंभमथिनीं वंदे महाशारदाम् ॥ „ ॥ १ ॥

॥ ॐ क्लीं नमः ॐ क्लीं ॐ ॥

„ कारुण्यकोमलकटाक्षविराजमाने संसारतारिणि शिवे सकलाघहंत्रि ॥
त्वां देववंदितपदाममरादिभूतां वागीश्वरीमहमनंतगुणां श्रयामि „ ॥ २ ॥
„ ॐ कलातीतां कलामालां सारासारनिषेविनाम् ॥
अमोघां सहमोघां च व्रजामि शरणं गिराम् „ ॥ ३ ॥
„ धात्रीं विधात्रीं कल्याणीं धरां धारणसुक्षमाम् ॥
अवियोनिमनिघ्न्यां च वाचं त्वां शरणं व्रजे „ ॥ ४ ॥
„ अजां पुराणीममृतामद्वितीयां सनातनीम् ॥
वरां वरेण्यां वरदां वरश्रेष्ठां वरप्रियाम् „ ॥ ५ ॥
„ शुभां सरस्वतीं देवीं सच्चिदानंदरूपिणीम् ॥
शरणागतवात्सल्ये त्वामहं शरणं व्रजे „ ॥ ६ ॥
„ ऋषिरुवाच „ ॥ ७ ॥
„ भूयः शृणु महाभाग देवीमाहात्म्यमुत्तमम् ॥

॥ ॐ क्लीं नमः ॐ क्लीं ॐ ॥ ॥ ॐ क्लीं ॐ मः न क्लीं ॐ ॥

विना येन स्तवश्चायं निर्जीवो नृपनंदन ,, ॥ ८ ॥
,, दृष्ट्वा शुंभं विनिहतं दारुणं देवकंटकम ॥
आजग्मुः परमानंदाद्ब्रह्मविष्णुमहेश्वराः ,, ॥ ९ ॥
,, देव्याः स्तुतिं समाधातुं गतास्तल्लक्षसंयुताः ॥
आज्ञामादाय देवेश्याः कर्तुं दर्शनमादरात ,, ॥१०॥
,, बद्धांजलिपुटाः साक्षात्तुष्टुवुः क्रमशः शिवाम् ॥
लोकानां च हितार्थाय देवीसूक्तानि पार्थिव ,, ॥११॥
,, ब्रह्मोवाच ,, ॥१२॥
,, अजां पुराणीममरां सनातनीं चतुर्भुजां पुस्तकिकाक्षधारिणीम् ॥
वराभयाभ्यामनुशोभिहस्तां नमामि तां जाड्यजटाविनाशिनीम् ,, ॥१३॥
,, सरस्वतीं त्वामनुनौमि वाचो वरप्रदां हंसवराधिरूढाम ॥
मुक्तामणिद्योतितकंठहारां भाग्यैकलभ्यां परमां पवित्राम ,, ॥१४॥
,, श्रीकंठशक्तित्रयशोभमानां दशारतुर्येण कृतानुरूपाम् ॥ ,,
पंचारवासां धृतभूम्रहारां सरस्वतीं त्वां प्रणमामि देवीम ,, ॥१५॥
,, कलाद्वयमंत्रामधिकोटिवासां विहारयंत्रां विमलैकशोभाम ॥

॥ ॐ क्लीं नमः ॐ क्लीं ॐ ॥ ॥ ॐ क्लीं ॐ मः न क्लीं ॐ ॥

स्वच्छावदातां स्फटिकानुरूपां सरस्वतीं त्वां प्रणमामि मातः ,, ॥१६॥
,, वाकामकामैः परमैः पवित्रैः रमारमा ह्रीं वरदानदक्षैः ॥
बीजैरमीभिः कपिबीजयुक्तैः क्लीं युग्ममिश्रैरिति मंत्रराजः ,, ॥१७॥
,, एकेन चैकेन च युग्मकेन द्वाभ्यामथैकेन तथैव शेषैः ॥
करांगलिस्थैः परमोत्तमोयं निहंति पापानि च साधकानाम् ,, ॥१८॥
,, हठेन वै शृंखलया च श्रेण्या विधातृपत्न्या च तथैव वाचा ॥
श्रीकीर्तिब्राह्म्यादिभिः शोभया च न्यासैरमीभिः पतितोपि शंभुः ,, ॥१९॥
,, द्रव्येण हीमात्सकलार्थसिद्धिः सुकिंशुकैर्वागपि सिद्धिमृच्छेत् ॥
तैः साकमाज्येन रमानिवासः सुपायसेनापि च वेदसिद्धिः ,, ॥२०॥
,, न चाम्ब ते महिमानं वदामि सरस्वति प्रथिते लोकमध्ये ॥
जानंति किं बुद्बुदा भूमितोयं जडा वयं ब्रह्महरीशमुख्याः ,, ॥२१॥
,, त्वयैव वाचा वयं संवदामो जिघ्राम शक्त्या च तथैव जीवाः ॥
पश्याम हे त्वां हि मातर्महेशि स्पृशाम साक्षात्त्वयि संयुताः स्म ,, ॥२२॥
,, स्वादं विदामस्तव शक्तियोगाद् गृह्णीमहे तव शक्त्या मृडानि ॥
गच्छामहे तव शक्तेः प्रभावादानंदयुक्तास्तव संनिवेशात् ,, ॥२३॥

॥ ॐ क्लीं नमः ॐ क्लीं ॐ ॥

आत्मामनस्त्वं त्वमेवासि देहस्त्वमेव वै चेंद्रियपंचतत्वम ॥
त्वमेव वै विषयाः शब्दमुख्याः परावरेषां परमा त्वमेव ॥ ॐ क्लीं ॐ मः न क्लीं ॐ ॥२४॥
,, ॐ क्लीं रविश्च ते ॥ क्लीं चंद्रमाश्च ते ॥ क्लीं तारा‍श्च ते ॥ क्लीं भूमिश्च ते ॥
क्लीं जलंच ते ॥ क्लीं तेजश्च ते ॥ क्लीं वायुश्च ते ॥ क्लीं व्योमश्च ते ॥
क्लीं शब्दश्च ते ॥ क्लीं स्पर्शश्च ते ॥ क्लीं सोमश्च ते ॥ क्लीं रसश्च ते ॥
क्लीं गंधश्च ते ॥ क्लीं प्राणश्च ते ॥ क्लीं अपानश्च ते ॥ क्लीं व्यानश्च ते ॥
क्लीं उदानश्च ते ॥ क्लीं समानश्च ते ॥ क्लीं नागश्च ते ॥ क्लीं कूर्मश्च ते ॥
क्लीं कृकलश्च ते ॥ क्लीं देवदत्तश्च ते ॥ क्लीं धनंजयश्च ते ॥ क्लीं आत्मा च ते ॥
क्लीं अंतरात्मा च ते ॥ क्लीं परमात्मा च ते ॥ क्लीं भूतात्मा च ते ॥
क्लीं ज्ञानात्मा च ते ॥ क्लीं समचित्तं त्वय्येव विनिवेदयतां ॐ क्लीं मः न क्लीं ॐ ॥२५॥
,, यदा न चांडं भुवनानि जीवा नाहं न विष्णुर्न च पार्वतीशः ॥
न चेश्वरो नापि सदाशिवश्च त्वमेव चासीरिति वा भविष्या ,, ॥२६॥
,, आदिस्त्वमेवासि जगत्त्रयाणां स्वभाववीर्यादिकं च त्वमेव ॥
त्वमेव विश्वं परमात्मशक्तिर्नमामि ते पादपीठं सरस्वति ,, ॥२७॥
,, त्वं वेदवाणी निखिलाश्च वेदास्त्वं शब्दशक्तिश्च तथार्थशक्तिः ॥
त्वं ब्रह्मविद्यापि परावरेशी त्वां ब्रह्मशक्तिं शरणं प्रपद्ये ,, ॥२८॥

॥ ॐ क्लीं नमः ॐ क्लीं ॐ ॥

सूक्तं तवेदं सुभगं सरस्वती प्रातश्च मध्यान्हकाले च सायम् ॥
पठंति ये श्रद्धया युक्तचित्तास्ते भोगमोक्षौ सहसा लभंते
॥ ॐ क्लीं ॐ मः नक्लीं ॐ ॥२९॥

„ इदं पुराणं विरजं सुधामयं सुतत्त्वभूतं जगतां त्रयाणाम् ॥
ते प्राप्नुवंति प्रकटप्रभावास्त्वां सर्वयोनिं शरणं प्रपद्ये „ ॥३०॥

„ चतुर्मुखमुखांभोजवनहंसवधूर्मम ॥
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती „ ॥३१॥

„ नमस्ते शारदे देवी काश्मीरपुरवासिनी ॥
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे „ ॥३२॥

„ अक्षसूत्रांकुशधरा पाशपुस्तकधारिणी ॥
मुक्ताहारसमायुक्ता वाचि तिष्ठतु मे सदा „ ॥३३॥

„ कंबुकंठी सुताम्रोष्ठी सर्वाभरणभूषिता ॥
महासरस्वती देवी जिव्हाग्रे संनिवेश्यतां „ ॥३४॥

„ या श्रद्धा धारणा मेधा वाग्देवी विधिवत्सला ॥
भक्तजिव्हाग्रसदना शमादिगुणदायिनी „ ॥३५॥

॥ ॐ क्लीं नमः ॐ क्लीं ॐ ॥

नमामि यामिनीनाथलेखालंकृतकुंडला ॥
भवानी भवसंतापनिर्वापणसुधानदी ॐ क्लीं ॐ मः न क्लीं ॐ ॥३६॥
" यः कवित्वं निरातंकं भुक्तिमुक्ति च वांछति ॥
सेऽभ्यर्च्यैनां सर्वश्लोक्यां भक्त्या स्तौति सरस्वतीम् " ॥३७॥
" तस्यैवं स्तुवतो नित्यं समभ्यर्च्य सरस्वतीम् ॥
भक्तिश्रद्धाभियुक्तस्य षण्मासात्प्रत्ययो भवेत् " ॥३८॥

॥ ॐ वाङ् मे मनसि० ॥

॥ इति श्री महासरस्वतीसूक्तं द्वादशांगं संपूर्णम् १२ ॥

॥ अथ श्री दुर्गाया वैदिकं तांत्रिकं ध्यानं ॥

॥ नाम प्रथमं त्रयोदशांगं १३ ॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्व-रेण्यं भर्गो देवस्य धीमहि ॐ जातवेदसे सुनवाम सोममरातीं यतो निदहाति वेदः हां दुं दुर्गायै नमः ज्वल ज्वल शूलिनी दुष्टानग्रह ग्रह हूं फट् स्वाहा ॥

उत्तिष्ठ पुरुषि भयं मे समुपस्थितं यदि शक्यमशक्यं दुं दुर्गे भगवति शमय शमय स्वाहा सनः पर्षदतिदुर्गाणि विश्वानावेव सिंधुं दुरितात्यग्निः ॐ धियो यो नः प्रचोदयादात्मिके प्रणवशिरस्कात्मिके हूं फट् स्वाहा ॥ आपोज्योती रसोमृतं ब्रह्म भूर्भुवः स्वरोम् ॥

ॐ सर्वभूतारण्ये देवी क्षम्यतां परमेश्वरी ॥
अपराधशतं देवी क्षम्यतां परमेश्वरी ॥

ॐ क्लीं ह्रीं ऐं मधुकैटभमर्दिनि महामाये चामुंडे मुंडमालिनी ॥
मनःकाम्यादिचिंतितं देवि देहि मे ब्रह्मचारिणि ॥

ॐ क्लीं कालि चामुंडे क्लीं आगच्छ आगच्छ क्लीं भूतभविष्यवर्तमानकालज्ञान दूरदृष्टि दूरश्रवणं क्लीं ब्रूहि ब्रूहि क्लीं चामुंडे हूं फट् स्वाहा ॥

ॐ स्तोष्यामि प्रयता देवीं शरण्यां बह्वृचःप्रियाम् ॥
सहस्रसंमितां दुर्गा ॥ जातवेदसे सुनवाव सोम ॥१॥
ॐ शांत्यर्थं तद्द्विजातीनां ऋषयः सोमपाश्रिताः ॥
ऋग्वेदे त्वं समुत्पन्ना ॥ मरातियतो निदहाति वेदः ॥२॥
ॐ ये त्वां देवि प्रपद्यंति ब्राह्मणा हव्यवाहिनीम् ॥
अविद्या बहुविद्या वा ॥ सनः पर्षदतिदुर्गाणि विश्वा ॥३॥
ॐ येऽग्निवर्णां शुभां सौम्यां कीर्तयिष्यंति ये द्विजाः ॥
तांस्तारयति दुर्गाणि ॥ नावेव सिंधुं दुरितात्यग्निः ॥४॥

ॐ दुर्गेषु विषमे घोरे संग्रामे रिपुसंकटे ॥
अग्निचोरनिपातेषु दुष्टग्रहनिवारिणि ॥ दुष्टग्रहनिवर्ण्यों नमः ॥५॥
ॐ दुर्गेषु विषमेषु त्वं संग्रामेषु वनेषु च ॥
मोहयित्वा प्रपश्यंति तेषां मे अभयं कुरु ॥ तेषां मे अभयं कुर्वो नमः ॥६॥
ॐ केशिनी सर्वभूतानां पंचमीति च नाम च ॥
सा मां समा दिशां देवी सर्वतः परिरक्षतु ॥ सर्वतः परिरक्षत्वों नमः ॥७॥
ॐ तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टां ॥
दुर्गां देवीं शरणमहं प्रपद्ये सुतर सितरसे नमः सुतर सितरसे नमः ॥
दुर्गा दुर्गेषु स्थानेषु शन्नोदेवीरभीष्टये ॥८॥

॥ इति श्री दुर्गाया वैदिकं तांत्रिकं ध्यानं नाम प्रथमं त्रयोदशांगं समाप्तं ॥१-१३॥

॥ अथ श्री भगवती महिम्नः स्तोत्रं ॥

नाम द्वितीयं त्रयोदशांगं ॥ २-१३ ॥

ॐ त्वमंतस्त्वं पश्चात्त्वमसि पुरतस्त्वं च परत-
स्त्वमूर्ध्वं त्वं चाधस्त्वमसि खलु लोकान्तरचरी ॥
त्वमिन्द्रस्त्वं चंद्रस्त्वमसि निगमानामुपनिष
त्तवाहं दासोऽस्मि त्रिपुरहररामे कुरु कृपाम् ॥१॥

ॐ इयान्कालः मृष्टेः प्रभृति बहुकष्टेन गमितो
विनायत्त्वत्सेवां करुणरसकल्लोलिनि शिवे ॥
तदेतद्दौर्भाग्यं मम विषयतृष्णाख्यरिपुणा
हतः शुद्धानन्दं स्पृशिमि तव सिद्धेश्वरि पदम् ॥२॥
ॐ सुधाधारावृष्टेस्तव जननि दृष्टेर्विषयतां
वयं यामो दामोदरभगिनि भाग्येन फलितम् ॥
इदानीं भूतानां ध्रुवमुपरियाताः परमुदा
न वांछामो मोक्षं विपिनपथि कक्षंजरदिव ॥३॥
ॐ जपाद्यो नो सक्ता हरगृहिणि भक्ताः करुणया
भवत्याहो मत्या कतिकति न भावेन गमिताः ॥
चितानंदाकारं भवजलधिपारं निजपदं
न ते मातुर्गर्भे जननि तव गर्भे यदि गताः ॥४॥
ॐ चिदेवेदं सर्वं श्रुतिरिति भवत्याः स्तुतिकथा
प्रियं भात्यस्तीति त्रिविधमपि रूपं तव शिवे ॥
अणू दीर्घं ह्रस्वं महदजरमंतादिरहितं
त्वमेव ब्रह्मासि त्वदपरमुदारं न गिरिजे ॥५॥

॥८६॥

ॐ न मंत्रं तंत्रं वा किमपि खलु विद्मो गिरिसुते
क यामः किं कुर्मस्तव चरणसेवा न रचिता ॥
अये मातः प्रातःप्रभृति दिवसास्तावधि वयं
कुबुद्ध्याहंकार्ये शिव शिव नयामो निजवयः ॥६॥

ॐ महामाये काये मम भवति यादृक् खलु मनो
मनस्ते संख्याने नहि भवति तादृक् कथमुमे ॥
त्वमेवान्तर्मातर्निगमयसि बुद्धिं त्रिजगतां
न जाने श्रीज्ञानेरपि न विदितस्तेऽत्र महिमा ॥७॥

ॐ स्तवद्वंद्वं स्कंदद्विपमुखमुखे यत्स्नुतमुखं
कदाचिन्मे मातर्वितरतु मुखे स्तन्यकणिकाम् ॥
अनेनायं धन्यो जगदुपरि मान्योतिभवतां
कुपुत्रे सत्पुत्रे नहि भवति मातर्विषमता ॥८॥

ॐ निराकारामारादधि हृदयमासादितवता
मया मायातीता सितसकलकायापहतये ॥
अहं कोहं सोहं मतिरिति विमोहं हतवति
कृताहंतानंतामुपनयति संतानकवति ॥९॥

ॐ अमी देवाः सेवां विदधति यतो मंचकतया
शिवाप्यच्छच्छायारचितरुचिरप्रच्छदतया ॥
कृतार्थीकर्तुं मां परमशिववामांकनिलया
परब्रह्मस्फूर्तिस्तव जयति मूर्तिः सकरुणा ॥१०॥

ॐ समुद्धर्तुं भक्तान्प्रभवति विहर्तुं जगदिदं
गतिं वाचोर्बद्धां विनिमयति रूपं च नियमात् ॥
यदृच्छा यस्येच्छा न च भजनविच्छेदभयतो
नमस्ते भक्ताय ध्रुवभजनसक्ताय गिरिजे ॥११॥

ॐ उमा माया माता कमलनयना कृष्णभगिनी
भवानी दुर्गाम्बा मतिरमरलक्ष्मीति नरला ॥
महाविद्या देवी प्रकृतिरजजायेति जयतां
भवन्ति श्री विद्ये तव जननि नामानि निधयः ॥१२॥

ॐ दिशां पाला वाला हरहरिसरोजासनमुखा-
स्त्वया दुर्गे सर्वे कतिकति न भक्ता अधिकृताः ॥
स्वयं रक्ता भक्ताबहमधिकृतो नाधिमगमं
सुखे वा दुःखे वा मम समतया यांतु दिवसाः ॥१३॥

ॐ यदालापादापादितविविधविद्यापरिणतिं
करे कृत्वा मोक्षं व्यवहरति लोकं प्रभुतया ॥
प्रणादे वाशा ये प्रभवति दुरापे च पुरुष-
स्तदेतन्माहात्म्यं विरलजनसात्म्यं तव शिवे ॥१४॥
ॐ याभिः शंकरकालकृत्यदहनं ज्वालासमुत्सारणं
याभिः शुंभनिशुंभदर्पदलनं याभिर्जगन्मोहनम् ॥
याभिर्भैरवभीमरूपदलनं सद्यः कृतं मे त्वहो
दारिद्र्यं दलयंतु तास्तव दृशो दुर्गे दयामेदुराः ॥१५॥
ॐ नारायणीं नमस्यामि दुर्गे त्रिभुवनेश्वरि
त्वं हि सिद्धिर्धृतिर्मेधा श्रीर्विद्या सन्नतिर्मतिः ॥१६॥
संध्या रात्रिः प्रभा निद्रा कालरात्रिस्तथैव च ॥
आर्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी ॥१७॥
जननी सिद्धसेनानी उग्रचारी महातपाः ॥
जया च विजया चैव पुष्टिस्तुष्टिर्दया क्षमा ॥१८॥
ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ॥
बहुरूपा विरूपा च अनेकविधचारिणी ॥१९॥

विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी ॥
दुर्गां देवीं नमस्यामि दुर्गाम्बायै नमोस्तुते ॥२०॥

इति श्री भगवतीमहिम्नः स्तोत्रं नाम द्वितीयं त्रयोदशांगं समाप्तम् ॥२-१३॥

१५४

Scanned with OKEN Scanner

॥ अथ श्री सर्वोत्कीलनं ॥

अथ सर्वोत्कीलनं नाम प्रथमं चतुर्दशांगं ॥१–१४॥

श्री गणेशाय नमः ॥ ॐ अस्य श्री सर्वोत्कीलनमंत्रस्य मूलप्रकृतिर्ऋषिः ॥ अनुष्टुप् छन्दः ॥ ॐ ह्रां ह्रीं बीजं ॥ क्रों कीलकं ॥ निराकारा शक्तिः ॥ सर्वमंत्रशापविमोचनार्थे जपे विनियोगः ॥ अथ करन्यासाः

ॐ अं आं रूपाय देवाय अंगुष्ठाभ्यां नमः॥ ॐ इं ईं रूपाय कालाग्नये तर्जनीभ्यां स्वाहा ॥ ॐ उं ऊं परमदेवाय मध्यमाभ्यां वषट् ॥ ॐ ऋं ॠं रंजनकाय अनामिकाभ्यां हुं ॥ ॐ ऌं ॡं लयविधानाय कनिष्ठिकाभ्यां वौषट् ॥ ॐ एं ऐं ओं औं पुरुषरूपाय अं अः सर्वस्वरूपिणे करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादि न्यासाः ॥ ॐ अं आं रूपाय देवाय हृदयाय नमः ॥ ॐ इं ईं रूपाय कालाग्नये शिरसे स्वाहा ॥ ॐ उं ऊं परमदेवाय शिखायै वषट् ॥ ॐ ऋं ॠं रंजनकाय कवचाय हुं ॥ ॐ ऌं ॡं लयविधानाय नेत्रत्रयाय वौषट् ॥ ॐ एं ऐं ओं औं पुरुषरूपाय अं अः सर्वस्वरूपिणे अस्त्राय फट् ॥ ॐ भूर्भुवः स्वरोम् ॥

ॐ ह्रां श्रीं ह्रीं ऐं क्लीं भगवत्यै नमः स्वाहा ॥ ॐ कं खं गं घं ङं । चं छं जं झं ञं । टं ठं डं ढं णं । तं थं दं धं नं । पं फं बं भं मं । यं रं लं वं शं । षं सं हं ळं क्षं। हंसोहंसः स्वाहा ॥ अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः स्वाहा ॥

एकवारं त्रिवारं वा जपेन्मंत्रस्य सिद्धिदं ॥ अनेन सर्वमंत्रकीलितदोषात् सशापदोषाद् विमुक्तो भवति ॥ ॐ उत्कीलय उत्कीलय स्वाहा ॥ ॐ भ्रां भ्रां भ्रां भ्रां उत्कीलय उत्कीलय स्वाहा ॥ ॐ श्लां श्लां श्लां श्लां ॐ ज्ञां ॐ द्रां द्रः फट् स्वाहा २८ वारं जपेत् मंत्रस्य सिद्धिदं ॥

अथ उत्कीलनस्तोत्राय नमः

सर्वस्य मातरं वंदे त्वां मंत्रसिद्धिदायिनीम् ॥
या वर्णरूपिणी विद्या नामकर्मात्मिका परा ॥१॥
त्वया च सृज्यते सर्वं पाल्यते च त्वयैव हि ॥
सृष्टिस्थितिकरी सैषा सर्वप्रलयकारिणी ॥२॥
निरंजनस्य देवस्य नामकर्मविधायिनी ॥
वंधादेर्मुच्यते सर्वस्तथैव गिरिकन्यके ॥३॥
त्वया ह्यनंतशक्तीनां प्रवाहो जायते त्वया ॥
सा स्मृता पूजिता ध्याता योगिनामपि सिद्धिदा ॥४॥
त्वया बद्धा विरंच्याद्या भ्रमन्ति निजकर्मणि ॥
मृतसंजीवनी विद्या प्रसादाच्छुकसिद्धिदा ॥
ममोत्कीलनमंत्रेण सर्वकामफलप्रदा ॥५॥

एकवारं त्रिवारं वा जपेन्मंत्रस्य सिद्धिदं ॥ अनेन सर्वमंत्रकीलितदोपात् सशापदोपाद् विमुक्तो भवति ॥ ॐ उत्कीलय उत्कीलय स्वाहा ॥ ॐ भ्रां भ्रां भ्रां भ्रां उत्कीलय उत्कीलय स्वाहा ॥ ॐ श्रां श्रां श्रां श्रां ॐ ह्रां ॐ द्रां द्रः फट् स्वाहा २८ वारं जपेत् मंत्रस्य सिद्धिदं ॥

अथ उत्कीलनस्तोत्राय नमः

सर्वस्य मातरं वंदे त्वां मंत्रसिद्धिदायिनीम् ॥
या वर्णरूपिणी विद्या नामकर्मात्मिका परा ॥१॥
त्वया च सृज्यते सर्वं पाल्यते च त्वयैव हि ॥
सृष्टिस्थितिकरी सैषा सर्वप्रलयकारिणी ॥२॥
निरंजनस्य देवस्य नामकर्मविधायिनी ॥
बंधादेर्मुच्यते सर्वस्तथैव गिरिकन्यके ॥३॥
त्वया ह्यनंतशक्तीनां प्रवाहो जायते त्वया ॥
सा स्मृता पूजिता ध्याता योगिनामपि सिद्धिदा ॥४॥
त्वया बद्धा विरंच्याद्या भ्रमन्ति निजकर्मणि ॥
मृतसंजीवनी विद्या प्रसादाच्छुकसिद्धिदा ॥
ममोत्कीलनमंत्रेण सर्वकामफलप्रदा ॥५॥

ब्रह्मांडे संचरन्ती विविधसुरनृणां तर्पयन्ती प्रमोदैः
प्रीत्या संदीपयन्ती निजनिजविषयैः षट्पदैः प्रेरयन्ती ॥
वर्णान्देवान् जयन्ती दितिसुतदमनी सा ह्यहंकारकर्त्री
त्रैलोक्यं जीवयन्ती स्मररचिततनुर्नाशयेत्कर्मजालम् ॥६॥

इति श्री पंचरात्रसंहितायां ईश्वरपार्वतीसंवादे ब्रह्माणीवैष्णवीशैवी सारस्वतीशक्तिसर्वगणपतिमंत्रसंस्कारे सर्वमंत्रोत्कीलनं संपूर्णम् ॥

॥ अथ श्री देवीकवचं-वज्रकवचं ॥

नाम द्वितीयं चतुर्दशांगं ॥ २–१४ ॥

ॐ अस्य श्री देवीकवच वज्रकवचस्य ब्रह्मा ऋषिः अनुष्टुप् छंदः चामुंडाख्या महाकाली महालक्ष्मी महासरस्वती शैलपुत्र्यादि मातरो देवताः ॥ ह्रां सायुधा मातरो बीजं ॥ ह्रीं अंगन्यस्ता देव्यः शक्तयः ॥ ह्रूं कीलकं ॥ दिग्बंध देवतास्तत्त्वं ॥ मम सर्वांगरक्षार्थं श्री महालक्ष्मी प्रीत्यर्थं जपे विनियोगः

॥ अथ ऋष्यादि न्यासः ॥

ॐ ब्रह्मा ऋषये नमः शिरसि ॥ ॐ अनुष्टुप् छंदसे नमः मुखे ॥ ॐ ह्रीं श्रीं चामुंडा महाकाली शैलपुत्र्यादिमातृदेवताभ्यो नमः हृदये ॥ ॐ ह्रीं सायुधा

मातरो बीजाय नमः दक्षस्तने ॥ ॐ अंगन्यस्ता देव्यः शक्तये नमः वामस्तने ॥ ॐ ह्रूं कीलकाय नमः नाभौ ॥ ॐ दिग्बंध देवतास्तत्वाय नमः करयोः ॥ श्री चामुंडा चंडी काली कात्यायनी दुर्गा ललितांबाप्रसादाप्राप्तये सर्वांगसंरक्षणार्थे जपे विनियोगाय नमः सर्वांगे ॥

ह्रां अंगुष्ठाभ्यां नमः	ह्रां हृदयाय नमः
ह्रीं तर्जनीभ्यां स्वाहा	ह्रीं शिरसे स्वाहा
ह्रूं मध्यमाभ्यां वषट्	ह्रूं शिखायै वषट्
ह्रैं अनामिकाभ्यां हूं	ह्रैं कवचाय हूं
ह्रौं कनिष्ठिकाभ्यां वौषट्	ह्रौं नेत्रत्रयाय वौषट्
ह्रः अस्त्राय फट्	ह्रः अस्त्राय फट्

अथध्यानं ध्यानानंतरं मानसोपचारैः पूजयेत् ॥

सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता १
मातुलिंगं गदां खेटं पानपात्रं च बिभ्रती ॥ नागं लिंगं च योनिं च बिभ्रती नृप मूर्धनि ॥२॥
तप्तकांचनवर्णाभा तप्तकांचनभूषणा ॥ शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥३॥
ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ ॐ भूर्भुवः स्वः ॐ ह्रीं ॥
ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणां ॥ यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥१॥

ॐ ब्रह्मोवाच ॥

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकं ॥ देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥२॥
प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी ॥ तृतीयं चन्द्रघण्टेति कूष्मांडेति चतुर्थकम् ॥३॥
पंचमं स्कन्दमातेति षष्टं कात्यायनीति च ॥ सप्तमं कालरात्रिश्च महागौरीति चाष्टमं ॥४॥
नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ॥ उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥५॥
अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ॥ विषमे दुर्गमे चैव भयार्ताः शरणंगताः ॥६॥
न तेषां जायते किंचिदशुभं रणसंकटे ॥ नापदस्तस्य पश्यामि शोकदुःखक्षयंकरी ॥७॥
यैस्तु भक्त्या स्मृता नूनं तेषा मृद्धिः प्रजायते ॥ प्रेतसंस्था तु चामुंडा वाराही महिषासना ॥८॥
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ॥ माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥९॥
ब्राह्मी हंससमारूढा सर्वा आयास्तु मातरः ॥ लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया १०॥
श्वेतरूपधरा देवी ईश्वरी वृषवाहिनी ॥ इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ॥११॥
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥ श्वेतैश्च मौक्तिकैः सर्वा दिव्यहार प्रलंबिभिः १२
इंद्रनीलैर्महानीलैः पद्मरागैः सुशोभनैः ॥ दृश्यन्ते रथमारूढा देव्यः क्रोधसमन्विताः ॥१३॥
शंखं चक्रं गदां शक्तिं हलं च मुसलायुधं ॥ खेटकं तोमरं चैव परशुं पाशमेव च ॥१४॥
शरचर्मगदाचक्रं पट्टिशं मुद्गरं तथा ॥ कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमं ॥१५॥
दैत्यानां देहनाशाय भक्तानामभयाय च ॥ धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥१६॥

नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे ॥ महाबले महोत्साहे महाभयविनाशिनि ॥१७॥
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ॥ ऐं ह्रीं श्रीं रूपिणीं ध्याये महालक्ष्मीं स्मिताननां १८
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणभुशुंडी परिघायुधा १९
शूलेन पाहि नो देवि पाहि खड्गेन चांबिके ॥ घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च २०
प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥२१॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥ यानि चात्यर्थ घोराणि ते रक्षास्मांस्तथा भुवं२२
खड्गशूलगदादीनि यानि चास्त्राणि तेंबिके ॥ करपल्लवसंगीनि तैरस्मान् रक्ष सर्वतः ॥२३॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तुते ॥२४॥
एतत्ते वदनं सौम्यं लोचनत्रयभूषितं ॥ पातु नः सर्वभूतेभ्यः कात्त्यायनि नमोस्तुते ॥२५॥
ज्वालाकरालमत्युग्रमशेषासुरसूदनं ॥ त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तुते ॥२६॥
हिनस्ति दैत्यतेजांसि स्वनेना पूर्य या जगत् ॥ सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव २७
असुरासृग्वसापंक चर्चितस्ते करोज्ज्वलः ॥ शुभाय खड्गो भवतु चंडिके त्वां नता वयं ॥२८॥

ब्राह्मी ब्रह्मनमस्कृता धवलिता माहेश्वरी भस्मना ॥
कौमारी कुसुमायुधारिरचला चक्रायुधा वैष्णवी ॥
वाराही घनघोरघर्घरमुखी चैंद्री सुरारक्षिता ॥
चामुंडा गणनाथरुद्रसहिता रक्षंतु मां मातरः ॥२९॥

शंखं चक्रमयोधनुश्च दधतीं दक्षे गुणं तर्जनीं ॥
वामे शक्त्यभये शरान्कलयतीं बिभ्रुतत्रिशूलांबुजैः ॥
सन्नद्धैर्विविधायुधैः परिवृतां मन्त्रैः कुमारीजनैः ॥
ध्यायेदीप्सितदायिनीं त्रिनयनां सिंहाधिरूढां शिवां ॥३०॥

प्राच्यां रक्षतु माहेन्द्री आग्नेय्यामग्निदेवता ॥ दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी ॥३१॥
प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी ॥ उदीच्यां रक्ष कौबेरी ईशान्यां शूलधारिणी ॥३२॥
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥ एवं दशदिशो रक्षेच्चामुण्डा शववाहना ॥३३॥
जया मे अग्रतः स्थातु विजया स्थातु पृष्ठतः ॥ अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥३४॥
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥ मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी ॥३५॥
त्रिनेत्रा चक्षुषी रक्षेद्यमघण्टा च नासिके ॥ शंखिनी च भ्रुवोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥३६॥
कपोलौ कालिका रक्षेत्कर्णमूले तु शांकरी ॥ नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ॥३७॥
अधरे चामृतकला जिह्वायां च सरस्वती ॥ दन्तान् रक्षतु कौमारी कंठमध्ये तु चंडिका ॥३८॥
घंटिकायां चित्रघन्टा महामाया च तालुके ॥ कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमंगला ॥३९॥
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥ नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी ॥४०॥
खड्गधारिण्युभौ स्कंधौ बाहू मे वज्रधारिणी ॥ हस्तयोर्दण्डिनी रक्षेदम्बिका चांगुलीस्तथा ॥४१॥
नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेत्कुलेश्वरी ॥ स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी ॥४२॥
हृदये ललिता देवी उदरे सिंहवाहिनी ॥ नाभौ कमलिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ॥४३॥

पूतना कामिका मेढ्रं गुदे महिषमर्दिनी ॥ कट्यां भगवती रक्षेज्जानुनी विंध्यवासिनी ॥४४॥
भूतनाथा नितंबौ मे उरू महिषवाहिनी ॥ जङ्घे महाबला रक्षेज्जानुमध्ये विनायकी ॥४५॥
गुल्फयोर्नारसिंही च पादपृष्ठे घनद्युतिः ॥ पादांगुलीषु श्री रक्षेत्पादाधः स्थलवासिनी ॥४६॥
नखान्दंष्ट्राः कराली च केशांश्चैवोर्ध्वकेशिनी ॥ रोमकूपेषु कौमारी त्वचं वागीश्वरी तथा ॥४७॥
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ४८
पद्मावती पद्मकोशे कफे चूडामणि स्तथा ॥ ज्वालामुखी नखज्वाला अभेद्या सर्वसंधिषु ॥४९॥
शुक्रं ब्रह्माणी मे रक्षेच्छायां छत्रेश्वरी तथा ॥ अहङ्कारं मनो बुद्धिं रक्ष मे धर्मचारिणी ॥५०॥
प्राणापानौ तथा व्यानमुदानं च समानकं ॥ वज्रहस्ता च मे रक्षेत्प्राणान्कल्याणशोभना ५१
रसे रूपे च गंधे च शब्दे स्पर्शे च योगिनी ॥ सत्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥५२॥
आयुर्मे रक्ष वाराही धर्मं रक्षतु वैष्णवी ॥ चित्तं रक्षतु चंद्राणी यशः कीर्तिं बलं च मे ॥५३॥
धृतिं स्मृतिं च लक्ष्मीं च सदा रक्षतु वैष्णवी ॥ गोत्रमिन्द्राणी मे रक्षेत्पशून्मे रक्ष चंडिके ॥५४॥
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥ धनेश्वरी धनं रक्षेत्कौमारी कन्यकां तथा ॥५५॥
मार्गं क्षेमकरी रक्षेद्विजया सर्वतः स्थिता ॥ पातु मे सर्वगात्राणि दुर्गा दुर्गापहारिणी ॥५६॥
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ॥ तत्सर्वं रक्ष मे देवि दुर्गे दुर्गापहारिणी ॥५७॥
सर्वरक्षाकरं पुण्यं कवचं सर्वदा जपेत् ॥ इदं रहस्यं विप्रेन्द्र भक्त्या तव मयोदितं ॥५८॥
देव्यास्तु कवचेनैव रक्षितो वज्ररक्षितः ॥ पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ॥५९॥
तस्मात्सर्वप्रयत्नेन कवचीभव सर्वदा ॥ कवचेनावृतो नित्यं यत्रयत्राधिगच्छति ॥६०॥

तत्रतत्रार्थलाभश्च विजयः सार्वकामिकः॥ यं यं कामयते कामं तं तंप्राप्नोति निश्चितं ॥६१॥
परमैश्वर्यमतुलं प्राप्नोति विपुलं पुमान्॥ निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ॥६२॥
त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥इदं तु देव्याः कवचं देवानामपि दुर्लभं ॥६३॥
यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः॥दैवीकला भवेत्तस्य त्रैलोक्येष्वपराजितः ६४॥
जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥ नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ॥६५॥
स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषं ॥ अभिचाराणि घोराणि मन्त्रयन्त्राणि भूतले ॥६६॥
भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥सहजा कुलजा माला डाकिनी शाकिनी तथा ६७॥
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥ ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ॥६८॥
ब्रह्मराक्षसवेतालाः कुष्मांडा भैरवादयः॥ नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ६९॥
मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिः प्रजायते ॥यशसा वर्द्धते सोऽपि कीर्तिमान्भूतलेऽखिले ७०॥
तस्माज्जपेत्सदा भक्तया कवचं कामदं मुने ॥ जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥७१॥
निर्विघ्नेन भवेत्सिद्धिश्चण्डीजपसमुद्भवा ॥ यावद्भूमण्डलं धत्ते सशैलवनकाननम् ॥७२॥
तावत्तिष्ठति मेदिन्यां संततिः पुत्रपौत्रिकी॥देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभं ॥७३॥
तत्र गच्छेदभक्तोपि पुनश्चागमनं नहि ॥ प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥७४॥
लभते परमं स्थानं शिवेन समतां लभेत् ॥ ॥७५॥

॥ इति श्री वाराहपुराणे हरिहरब्रह्मविरचितं देव्याः कवचं वज्रकवचं २–१४ अंगं समाप्तम् ॥

१६४ ॥ अथ श्री अर्गलास्तोत्रं ॥

॥ नाम पंचदशांगं ॥ १५ ॥

ॐ अस्य श्री अर्गलास्तोत्र मंत्रस्य स्वर्णाकर्षण भैरव ऋषिः अनुष्टुप् छंदः श्री महाकाली देवता ॥ अं बीजं ॥ गं शक्तिः ॥ लं कीलकं मम रक्षणार्थे महाकालीप्रसादसिद्धयर्थे अर्गलास्तोत्र जपे विनियोगः ॥

अथ करन्यासः	अथ हृदयादि न्यासः
ॐ अं अंगुष्ठाभ्यां नमः ॥	ॐ अं हृदयाय नमः ॥
ॐ गं तर्जनीभ्यां स्वाहा ॥	ॐ गं शिरसे स्वाहा ॥
ॐ लं मध्यमाभ्यां वषट् ॥	ॐ लं शिखायै वषट् ॥
ॐ अं अनामिकाभ्यां हुं ॥	ॐ अं अवचाय हुं ॥
ॐ गं कनिष्ठिकाभ्यां वौषट् ॥	ॐ गं नेत्रत्रयाय वौषट् ॥
ॐ लं करतलकरपृष्ठाभ्यां फट् ॥	ॐ लं अस्त्राय फट् ॥

मानसोपचारैः गन्धादिपूजोपचारैः पूजयेत् अथध्यानं

रक्ताम्बरा रक्तवर्णा रक्तसर्वांङ्गभूषणा॥ रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥१॥

रक्ततीक्ष्णनखा रक्तरसना रक्तदंतिका॥ पतिं नारी यथा रक्ता देवी भक्तं भजेज्जनं ॥२॥

ॐ नमश्चण्डिकायै ॥ श्री नारद उवाच ॥

या कापि त्रिविधाख्याता सप्तधा सैव कीर्तिता ॥ तस्या भेदा अनंताश्च तन्माहात्म्यं शुभं वद

श्री ब्रह्मोवाच ॥ ॥१॥

या देवी स्तुयते नित्यं विविधैर्वेदपारगैः ॥ सा मे भवतु जिव्हाग्रे ब्रह्मरूपा सरस्वती ॥२॥

जयत्वं देवि चामुंडे जय भूतापहारिणि ॥ जय सर्वगते देवि कालरात्रि नमोस्तुते ॥३॥

जयन्ती मङ्गला कृष्णा भद्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते ४

मधुकैटभनिर्नाशविधात्रि वरदे नमः ॥ रूपंदेहि जयंदेहि यशोदेहि द्विषोजहि ॥५॥

महिषासुरनिर्नाशि भक्तानां सुखदे नमः ॥ रूपंदेहि० ॥६॥

रक्तबीजवधे देवि चण्डमुण्डविनाशिनि ॥ रूपंदेहि० ॥७॥

शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि ॥ रूपंदेहि० ॥८॥

वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि ॥ रूपंदेहि० ॥९॥

अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि ॥ रूपंदेहि० ॥१०॥

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ॥ रूपंदेहि० ॥११॥

स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ॥ रूपंदेहि० ॥१२॥

चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ॥ रूपंदेहि० ॥१३॥

देहि सौभाग्यमारोग्यं देहि मे परमं सुखं ॥ रूपंदेहि० ॥१४॥

विधेहि द्विशतां नाशं विधेहि बलमुच्चकैः ॥ रूपंदेहि० ॥१५॥
विधेहि देवि कल्याणं विधेहि परमां श्रियम् ॥ रूपंदेहि० ॥१६॥
सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके ॥ रूपंदेहि० ॥१७॥
विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ॥ रूपंदेहि० ॥१८॥
प्रचण्डदैत्यदर्पघ्ने चंडिके प्रणताय मे ॥ रूपंदेहि० ॥१९॥
चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥ रूपंदेहि० ॥२०॥
कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके ॥ रूपंदेहि० ॥२१॥
हिमाचलसुतानाथ संस्तुते परमेश्वरि ॥ रूपंदेहि० ॥२२॥
इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ॥ रूपंदेहि० ॥२३॥
देवि प्रचण्डदोर्दंडदैत्यदर्पविनाशिनि ॥ रूपंदेहि० ॥२४॥
देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ॥ रूपंदेहि जयंदेहि यशोदेहि द्विषोजहि ॥२५॥
पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं ॥ तारिणीं दुर्गसंसारसागरस्य कुलोद्भवां ॥२६॥
स्तौमि ध्यानपरो नित्यं वरदा शुभदा भव ॥ इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥२७॥
स तु सप्तशतीसंख्यां वरमाप्नोति सम्पदां ॥ ॥२८॥

॥ इति श्री मार्कण्डेयपुराणे अर्गलास्तोत्रं नाम पंचदशांगं ॥१५॥ समाप्तम् ॥

॥ अथ श्री कीलक स्तोत्रं ॥

॥ नाम षोडशांगं ॥ १६ ॥

ॐ अस्य श्री कीलक स्तोत्रमन्त्रस्य विशुद्धज्ञान ऋषिः अनुष्टुप् छंदः श्री महासरस्वती देवता क्लां बीजं ॥ क्लीं शक्तिः ॥ क्लौं कीलकं ॥ श्री महासरस्वती देवता प्रीत्यर्थे कीलकजपे विनियोगः ॥

अथ करन्यासः	अथ हृदयादि न्यासः
ॐ क्लां अंगुष्ठाभ्यां नमः ॥	ॐ क्लां हृदयाय नमः ॥
ॐ क्लीं तर्जनीभ्यां स्वाहा ॥	ॐ क्लीं शिरसे स्वाहा ॥
ॐ क्लूं मध्यमाभ्यां वषट् ॥	ॐ क्लूं शिखायै वषट् ॥
ॐ क्लैं अनामिकाभ्यां हुं ॥	ॐ क्लैं कवचाय हुं ॥
ॐ क्लौं कनिष्ठिकाभ्यां वौषट् ॥	ॐ क्लौं नेत्रत्रयाय वौषट् ॥
ॐ क्लः करतलकरपृष्ठाभ्यां फट् ॥	ॐ क्लः अस्त्राय फट् ॥

अथ ध्यान– शोणप्रभं सोमकलावतंसं पाणौ स्फुरत्पंचशरेशुचापं ॥
प्राणप्रियं नौमि पिनाकपाणिं कोणत्रयस्थं कुलदैवतं मे ॥१॥

उमागौरी सतीचण्डीकालिकामाचपार्वती ॥ शाकम्भरीं स्तुवन्ध्यान्जपन्संपूजयन्नमन् ॥२॥

अक्षय्यमश्नुते शीघ्रमन्नपानामृतादिकं ॥ भीमाऽपि नीलवर्णाभा दंष्ट्रादशनभासुरा ॥३॥

ॐ नमश्चण्डिकायै ॥ ऋषिरुवाच ॥

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ॥ श्रेयः प्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥१॥
सर्वमेतद्विजानीयान्मन्त्राणामपि कीलकं ॥ सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥२॥
सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ॥ एतेन स्तुवतां देवीस्तोत्रमात्रेण सिद्ध्यति ॥३॥
नमन्त्रो नौषधं तत्र नकिञ्चिदपि विद्यते ॥ विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकं ॥४॥
समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः ॥ कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभं ॥५॥
स्तोत्रं वै चण्डिकायास्तु तच्च गुह्यं चकार सः ॥ समाप्नोति सुपुण्येन तां यथावन्नियन्त्रणां ॥६॥
सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः ॥ कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥७॥
ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ॥ इत्थं रूपेण कीलेन महादेवेन कीलितं ॥८॥
यो निष्कीलां विधायैनां नित्यं जपति सस्फुटं ॥ स सिद्धः सगणः सोऽपि गन्धर्वो जायते वने ९
न चैवाप्यटतस्तस्य भयं क्वापि हि जायते ॥ नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१०॥
ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति ॥ ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥११॥
सौभाग्यादि च यत्किंचिद्दृश्यते ललनाजने ॥ तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभं ॥१२॥
शनैस्तु जप्यमानेऽस्मिन्स्तोत्रे सम्पत्तिरुच्चकैः ॥ भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३॥
ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः ॥ शत्रुहानिः परो मोक्षः स्तूयते सा किं जनैः ॥१४॥

॥ इति श्री स्वायंभुवागमे भगवत्याः कीलकस्तोत्रं षोडशांगं १६ समाप्तम् ॥

Scanned with OKEN Scanner

॥ अथ श्री सप्तशती दुर्गापाठारंभः ॥

॥ संकल्पः ॥

अथ श्री सप्तशती दुर्गाचंडीपाठारंभः ॥ तत्रादौ मूलेनाचाम्य, खान्यद्भिः संस्पृश्य, मूलेन शिखां बद्ध्वा, मूलेन प्राणानायम्य, गुरुगणपत्यादीन्नमस्कृत्य अद्याद्य संवत ....तमे........मासे........पक्षे........तिथौ........वासरे मम सकलदोषपरिहारार्थं मनःसंकल्पितकार्यसिद्ध्यर्थं रससिद्ध्यर्थं रससंस्कारसिद्ध्यर्थं रससिद्धानां प्राप्त्यर्थं सकलजनवशीकरणार्थं सकलशत्रूणां विनाशनार्थं मम आत्मनः श्रुतिस्मृतिपुराणोक्तपुण्यफलावाप्त्यर्थं आयुरारोग्यैश्वर्यादिवृद्ध्यर्थं धनकनकेप्सितकामनासिद्ध्यर्थं श्री परदेवताप्रीतये ममाभीष्टसिद्ध्यर्थं अथ सावर्णिः सूर्यतनय इत्यारभ्य सावर्णिर्भविता मनुरित्यंतं चरित्र त्रयात्मकं नवार्णव रात्रिसूक्त देवीसूक्त संपुटितं ब्रह्मकवचार्गला कीलकसहितं सरहस्यं श्री सप्तशती दुर्गाचंडीपाठं अमुकगोत्रः अमुकशर्माहं करिष्ये ॥ इति संकल्प्य ॥

॥ नवार्णवजपः ॥

नवार्णवं जपेत्तयथा ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे ॥

इति मूलमंत्रः ॥ अस्य श्री नवार्णवमंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ॥ गायत्र्युष्णिगनुष्टुभश्छंदांसि ॥ महाकाली महालक्ष्मी महासरस्वत्यो देवताः ॥ नंदाशाकंभरी-

भीमाः शक्तयः ॥ रक्तदंतिकादुर्गाभ्रामर्यो बीजानि ॥ अग्निवायुसूर्यास्तत्वानि ॥ ममाभीष्टसिद्ध्यर्थे श्री परदेवता प्रीत्यर्थे सप्तशत्यंगत्वेन नवार्णवमंत्रजपे विनियोगः॥

॥ अथ मूलमंत्रषडंगानि ॥ ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः शिरसि ॥ गायत्र्युष्णिगनुष्टुप्छंदोभ्यो नमः मुखे ॥ महाकाली महालक्ष्मी महासरस्वती देवताभ्यो नमः हृदि ॥ रक्तदंतिका दुर्गा भ्रामरी बीजेभ्यो नमः गुह्ये ॥ नंदाशाकंभरीभीमा शक्तिभ्यो नमः पादयोः ॥ अग्निवायुसूर्यतत्वेभ्यो नमः सर्वांगे॥ इति मूलमंत्रषडंगानि ॥

ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे इति मूलमंत्रेण करौ संशोध्य ॥

अथ मूलमंत्रषडंगन्यासः ॥

अथ करन्यासः ॥

ॐ ऐं अंगुष्ठाभ्यां नमः ॥
ॐ ह्रीं तर्जनीभ्यां स्वाहा ॥
ॐ क्लीं मध्यमाभ्यां वषट् ॥
ॐ चामुंडायै अनामिकाभ्यां हूं ॥
ॐ विच्चे कनिष्ठिकाभ्यां वौषट् ॥
ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे करतलकरपृष्ठाभ्यां फट् ॥

अथ हृदयादि न्यासः ॥

ॐ ऐं हृदयाय नमः ॥
ॐ ह्रीं शिरसे स्वाहा ॥
ॐ क्लीं शिखायै वषट् ॥
ॐ चामुंडायै कवचाय हूं ॥
ॐ विच्चे नेत्रत्रयाय वौषट् ॥
ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे अस्त्राय फट् ॥

॥१०६॥

॥ ततोऽक्षरन्यासाः ॥ ॐ ऐं नमः शिखायै ॥ ॐ ह्रीं नमः दक्षिणनेत्रे ॥
ॐ क्लीं नमः वामनेत्रे ॥ ॐ चां नमः दक्षिणकर्णे ॥ ॐ मुं नमः वामकर्णे ॥
ॐ डां नमः दक्षिणनासायां ॥ ॐ यैं नमः वामनासायां ॥ ॐ विं नमः मुखे ॥
ॐ चें नमः गुह्ये ॥ एवं विन्यस्य अष्टवारं व्यापकं कुर्यात् ॥

ॐ ऐं प्राच्यै नमः ॥ ॐ ऐं आग्नेय्यै नमः ॥ ॐ ह्रीं दक्षिणायै नमः ॥
ॐ ह्रीं नैर्ऋत्यै नमः ॥ ॐ क्लीं पश्चिमायै नमः ॥ ॐ क्लीं वायव्यै नमः ॥ ॐ
चामुंडायै उदीच्यै नमः ॥ ॐ विच्चे ईशान्यै नमः ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे
ऊर्ध्वायै नमः ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे अधरायै नमः ॥ ततो ध्यायेत् ॥

अथ ध्यानं—खड्गं चक्रगदेषुचापपरिघान् शूलं भुशुंडीं शिरः
शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषाभृतां ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौच्छयिते हरौ कमलजो हन्तुं मधुं कैटभं ॥१॥

अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुः कुंडिकां
दंडं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनं ॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थितां ॥२॥

घंटाशूलहलानि शंखमुशले चक्रं धनुः सायकान्
हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभां ॥
गौरी देहसमुद्भवां त्रिजगतामाधारभूतां महा–
पूर्वामत्र सरस्वतीमनुभजे शुंभादिदैत्यार्दिनीं ॥३॥

इति ध्यात्वा मानसोपचारैः संपूजयेत् तद्यथा–

लं पृथ्वी तत्त्वात्मकं गंधं समर्पयामि नमः
हं आकाश तत्त्वात्मकं पुष्पं समर्पयामि नमः
यं वायु तत्त्वात्मकं धूपमाघ्रापयामि नमः
रं अग्नि तत्त्वात्मकं दीपं दर्शयामि नमः
वं अमृत तत्त्वात्मकं दिव्यामृतं महानैवेद्यं निवेदयामि नमः ॥
शं शक्ति तत्त्वात्मकं तांबूलादि सर्वोपचार पूजां समर्पयामि नमः ॥

अथ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे इति नवार्णवं मूलमंत्रमष्टोत्तरशतं जपेत् ॥
ततो गुह्येति समर्पयेत् ॥

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥१॥

॥ अथ श्री शापोद्धारः ॥

अथ शापविमोचनं कुर्यात ॥

श्री गणेशाय नमः ॥ अथ शापमोचनम् ॥ ॐ अस्य श्री चण्डिका शापमोचन-मन्त्रस्य वशिष्ठनारद सामवेदाधिपतिर्ब्रह्मा ऋषिः ॥ गायत्री छन्दः ॥ सर्वैश्वर्य्यकारिणी श्रीदुर्गा देवता ॥ चरित्रत्रयं बीजं ॥ ह्रीं रूपिणी शक्तिः ॥ संकल्पितकार्यसिद्ध्यर्थे श्री महाकाली महालक्ष्मी महासरस्वती प्रीत्यर्थे श्री सप्तशती चण्डिकामंत्राणां शापोद्धारणार्थे शापोद्धारमंत्रजपे विनियोगः ॥

ॐ ह्रीं नमः रेतः स्वरूपायै मधुकैटभमर्दिन्यै ब्रह्मशापविमुक्ता भव ॥१॥

ॐ श्रीं नमः शक्तिरूपिण्यै महिषासुरसैन्यनाशिन्यै ब्रह्मशापविमुक्ता भव ॥२॥

ॐ रं नमः रक्तरूपिण्यै महिषासुरमर्दिन्यै ब्रह्मशापविमुक्ता भव ॥३॥

ॐ क्षुं नमः क्षुधारूपिण्यै देववन्दितायै ब्रह्मशापविमुक्ता भव ॥४॥

ॐ छां नमः छायारूपिण्यै दूतसंवादिन्यै ब्रह्मशापविमुक्ता भव ॥५॥

ॐ श्रीं नमः शक्तिरूपिण्यै धूम्रलोचनघातिन्यै ब्रह्मशापविमुक्ता भव ॥६॥

ॐ तृं नमः तृष्णारूपिण्यै चण्डमुण्डवधकारिण्यै ब्रह्मशापविमुक्ता भव ॥७॥

ॐ क्षां नमः क्षांतिरूपिण्यै रक्तबीजवधकारिण्यै ब्रह्मशापविमुक्ता भव ॥८॥

ॐ जां नमः जातिरूपिण्यै निशुम्भवधकारिण्यै ब्रह्मशापविमुक्ता भव ॥९॥
ॐ लं नमः लज्जारूपिण्यै शुम्भवधकारिण्यै ब्रह्मशापविमुक्ता भव ॥१०॥
ॐ शां नमः शांतिरूपिण्यै देवस्तुत्यायै ब्रह्मशापविमुक्ता भव ॥११॥
ॐ श्रं नमः श्रद्धारूपिण्यै सकलफलदात्र्यै ब्रह्मशापविमुक्ता भव ॥१२॥
ॐ कां नमः कान्तिरूपिण्यै देवस्तुत्यायै राजवरदात्र्यै ब्रह्मशापविमुक्ता भव ॥१३॥
ॐ मां नमः मातृरूपिण्यै भक्तत्राणकारिण्यै ब्रह्मशापविमुक्ता भव ॥१४॥
ॐ ह्रीं श्रीं ह्रं नमः दुर्गायै सर्वैश्वर्य्यकारिण्यै ब्रह्मशापविमुक्ता भव ॥१५॥
ॐ क्लीं ह्रीं ॐ नमः शिवायै अभेदकवचरूपिण्यै ब्रह्मशापविमुक्ता भव ॥१६॥
ॐ काल्यै काली ह्रीं फट् स्वाहा नमः ऋग्वेदरूपिण्यै ब्रह्मशापविमुक्ता भव ॥१७॥
एवंमन्त्रंनजानाति चण्डीपाठंकरोतियः ॥ आत्मानंचैव दातारं क्षयं कुर्यान्नसंशयः ॥१८॥
इत्येवंहि महामन्त्रान्पठित्वा परमेश्वरि ॥ चण्डीपाठं दिवारात्रौ कुर्य्यादेव न संशयः ॥१९॥

इति श्री रुद्रयामलतन्त्रे चण्डिका शापमोचनं सम्पूर्णम् ॥

॥ अथ शापविमोचनमंत्रः ॥

ॐ श्रीं ह्रीं क्लीं क्रां क्रीं चंडिकादेव्यै शापानुग्रहं कुरुकुरु स्वाहा ॥
आदावन्ते सप्तवारं पठेत् ॥ इति शापविमोचनं सम्पूर्णम् ॥

॥ अथ श्री सर्वमंत्रोत्कीलनं ॥

अथ सर्वमन्त्रोत्कीलनविधिः ॥ मूलं नवार्णवं वा ॥ तद्यथा ॥

ॐ ह्रीं ख्रौं क्ष्म्रीं क्ष म ल व र पीडं उ म ल व र क्रीं ॐ क्षां क्षीं क्षूं क्षें क्षौं क्षः उत्कीलय उत्कीलय स्वाहा ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥ ॐ ह्रीं ख्रौं क्ष्म्रीं क्ष म ल व र पीडं उ म ल व र क्रीं ॐ क्षां क्षीं क्षूं क्षें क्षौं क्षः उत्कीलय उत्कीलय स्वाहा ॥ जयन्ती मङ्गलाकाली भद्रकाली कपालिनी॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते १ ॐ ख्रौं ह्रीं ख्रोः ऐं क्ष म ल व र क्रीं उ म ल व र क्रीं ॐ ख्रौं उत्कीलय उत्कीलय स्वाहा ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै स्वाहा ॥ इति कीलनम् ॥

विशुद्धज्ञानदेहाय त्रिवेदी दिव्यचक्षुषे ॥ श्रेयः प्राप्तिनिमित्ताय नमः सोमार्द्धधारिते ॥१॥

त्रैलोक्यं वशीकुरुकुरु क्ष म ल व र क्रीं ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥ इति प्रथमं श्लोकं समापयेत् ॥ इत्यर्गलामोक्षः ॥ ॐ श्रीं क्लीं ह्रीं सप्तशती चण्डिके उत्कीलनं कुरुकुरु स्वाहा ॥ आदावन्ते चैकविंशतिवारं पठेत् ततः ॥२॥

॥ ॐ ह्स्रां ह्स्रीं क्षौं ऐं क्ष म ल व र क्रीं उ म ल व र क्रीं ॐ क्षां क्षीं क्षूं क्षें क्षौं क्षः उत्कीलय उत्कीलय स्वाहा ॥ इति एकविंशतिवारं जपेत् ॥

इमं मंत्रमेकविंशतिवारं पठित्वा देव्यथर्वशीर्षं पठित्वा च वैदिकं तांत्रिकं रात्रिसूक्तं पठेत् ॥

॥ इति श्री सर्वमंत्रोत्कीलनं ॥

॥ अथ श्री देव्या दुर्गाया अथर्वशीर्षं ॥

अथ श्री देव्यथर्वशीर्षम् ॥ ॐ सर्वे वै देवा देवीमुपतस्थुः कासि त्वं । महादेवीति साब्रवीदहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् शून्यं चाशून्यं च । अहमानंदानानंदौ । अहं विज्ञानाज्ञाने । अहं ब्रह्माब्रह्मणी । वै ब्रह्मणी वेदितव्ये इति चाथर्वणी श्रुतिः । अहं पंचभूतानि । अहं पंचतन्मात्राणि । अहमखिलं जगत् । वेदाहमवेदाहं । विद्याहमविद्याहं । अजाहमनजाहं । अधश्चोर्ध्वं च तिर्यक्चाहं । अहꣳरुद्रेभिर्वसुभिश्चरामि । अहमादित्यैरुत विश्वेदेवैः । अहं मित्रावरुणावुभा बिभर्मि । अहमिंद्राग्नी । अहमश्विना उभौ । अहꣳसोमं त्वष्टारं पूषणं भगं दधामि । अहं विष्णुमुरुक्रमं । ब्रह्माणमुतप्रजापतिं दधामि । अहं दधामि द्रविणꣳहविष्मते सुप्राव्ये यजमानाय सुन्वते । अहꣳराष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानां । अहꣳसुवे पितरमस्य मूर्धन्यमयोनिरप्स्वंतःसमुद्रे । य एवं वेद स दैवीꣳसंपदमाप्नोति । ते देवा अब्रुवन् ।

नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म तां ॥१॥
तामग्निवर्णां तपसा ज्वलंतीं वैरोचनीं कर्मफलेषु जुष्टां ॥
दुर्गां देवीं शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै ते नमः ॥२॥

॥११२॥

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदंति ॥
सा नोमंद्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु ॥३॥
कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कंदमातरं ॥
सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवां ॥४॥
महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि । तन्नो देवी प्रचोदयात् ॥५॥
अदितिर्ह्यजनिष्ट दक्ष यादुहिता तव। तां देवा अन्वजायंत भद्रअमृतबंधवः ॥६॥
कामेयोनिः कमला वज्रपाणिर्गुहाहंसा मातलिश्वाभ्रमिन्द्रः ॥
पुनर्गुहासकलामायया चापृथक्क्लेशाविश्वमातादिविद्याः ॥७॥
एषात्मशक्तिः । एषाविश्वमोहिनी पाशांकुशधनुर्बाणधरा ॥
एषा श्रीमहाविद्या । यएवंवेद सशोकं तरति ॥८॥

नमस्ते भगवति मातरस्मान्पाहि सर्वतः। सैषा वैष्णव्यष्टौ वसवः सैवैका दश रुद्राः॥ सैषा द्वादशादित्याः सैषा विश्वेदेवाः सोमपा असोमपाश्च सैषा यातुधाना असुरा रक्षांसि पिशाचयक्षसिद्धाः सैषा सत्वरजस्तमांसि सैषा ब्रह्मविष्णुरुद्ररूपिणी सैषा प्रजापतीन्द्रमनवः सैषा ग्रहनक्षत्र ज्योतिष्कलाकाष्टादिविश्वरूपिणी तामहं प्रणौमि नित्यं॥९॥
पापापहारिणी देवी भुक्तिमुक्तिप्रदायिनी॥ अनंतां विजयां शुद्धां शरण्यां सर्वेशां शिवां॥१०॥
वियदाकारसंयुक्तं वीतिहोत्रसमन्वितं॥ अर्धेदुलसितं देव्या बीजं सर्वार्थसाधकं ॥११॥

एवमेकाक्षरं मन्त्रं यतयः शुद्धचेतसः ॥ ध्यायंति परमानंदमया ज्ञानांबुराशयः ॥१२॥
वाङ्मया ब्रह्मभूस्तस्मात्षष्ठवक्त्रसमन्वितं ॥ सूर्योवामश्रोत्रबिंदुसंयुक्ताष्टतृतीयकं ॥१३॥
नारायणेन संमिश्रो वायुश्चाधरयुक्तयः ॥ विच्चे नवार्णकोणस्य महानानंददायकः ॥१४॥
हृत्पुंडरीकमध्यस्थां प्रातः सूर्यसमप्रभां ॥ पाशांकुशधरां सौम्यां वरदाभयहस्तकां ॥१५॥
त्रिनेत्रां रक्तवसनां भक्तकामदुहं भजे ॥ भजामि त्वां महादेवि महाभयविनाशिनि ॥
महादारिद्र्यशमनि महाकारुण्यरूपिणि ॥१६॥

यस्याः स्वरूपं ब्रह्मादयो न जानंति तस्मादुच्यते अज्ञेया ॥ यस्या अंतो न लभ्यते तस्मादुच्यते अनंता ॥ यस्या लक्षं नोपलक्ष्यते तस्मादुच्यते अलक्षा ॥ यस्या जननं नोपलक्ष्यते तस्मादुच्यते अजा ॥ एकैव सर्वत्र वर्तते तस्मादुच्यत एका ॥ एकैव विश्वरूपिणी तस्मादुच्यतेऽनेका ॥ अतएवोच्यतेऽज्ञेयानंतलक्ष्यजैकानेका ॥१७॥

मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी ॥
ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी ॥
यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता ॥१८॥

तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीं ॥ नमामि भवभीतोऽहं संसारार्णवतारिणीं ॥१९॥
इदमथर्वशीर्षं योऽधीते। स पंचाथर्वशीर्षफलमाप्नोति। इदमथर्वशीर्षं ज्ञात्वा योऽर्चां स्थापयति शतलक्षं प्रजप्त्वापि नार्चाशुद्धिं च विंदति ॥ शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ॥२०॥

दशवारं पठेद्यस्तु सद्यः पापैः प्रमुच्यते ॥ महादुर्गाणि तरति महादेव्याः प्रसादतः ॥२१॥
सायमधीयानो दिवसकृतं पापं नाशयति ॥ प्रातरधीयानो रात्रिकृतं पापं नाशयति ॥
सायंप्रातः प्रयुंजानो अपापो भवति ॥ निशीथे तुरीयसंध्यायां जप्त्वा वाक्सिद्धिर्भवति ॥२२॥
नूतनायां प्रतिमायां जप्त्वा देवतासांनिध्यं भवति ॥ भौमाश्विन्यां महादेवी-
संनिधौ जप्त्वा महामृत्युं तरति स महामृत्युं तरति य एवं वेद । इत्युपनिषत् ॥२३॥

॥ इति श्री देव्यथर्वशीर्ष ॥

॥ अथ श्री वैदिकं रात्रिसूक्तं ॥

अस्य श्रीरात्रिसूक्तस्य कुशिक ऋषिः रात्रिर्देवता ॥ गायत्री छन्दः ॥ श्रीजगदम्बा प्रीत्यर्थे सप्तशतीपाठादौ रात्रिसूक्ते जपे विनियोगः ॥

कृणुष्वपाजःप्रसितिन्नपृथ्वींय्याहिराजेवामवाँ२ऽइभेन ॥
तृष्वीमनुप्रसितिन्द्रूणानोस्तासिविद्धयरक्षसस्तपिष्ठैः ॥१॥
तवभ्रमासऽआशुयापतन्त्यनुस्पृशधृपताशोशुचानः ॥
तपूᳪष्यग्नेजुह्वापतङ्गानसन्दितोविसृजविष्वगुल्काः ॥२॥
प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोऽअस्याऽअदब्धः ॥
योनोदूरेऽअघशᳪसोयोऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥३॥

उदग्ने तिष्ठप्रत्यातनुष्वन्यमित्रौं२ऽओषतात्तिग्महेते ॥
योनोऽअरातिꣳसमिधानचक्रेनीचातन्धक्ष्यतसन्नशुष्कम् ॥४॥
ऊर्द्ध्वोभवप्रतिविद्ध्याद्ध्यस्म्मदाविष्कृणुष्वदैव्यान्यग्ने ॥
अवस्थिरातनुहियातुजूनाञ्जामिमजामिम्प्रमृणीहिशत्रून्
अग्नेष्ट्वातेजसासादयामि ॥५॥
रक्षोहणंव्वलगहनंव्वैष्णवीमिदमहन्तंव्वलगमुत्किरामियम्मे
निष्ट्योयममात्योनिचखानेदमहन्तंव्वलगमुत्किरामियम्मे
समानोयमसमानोनिचखानेदमहन्तंव्वलगमुत्किरामियम्मे
सबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तंव्वलगमुत्किरामियम्मे
सजातोयमसजातानिचखानोत्कृत्याङ्किरामि ॥६॥
रक्षोहाविश्वचर्षणिरभियोनिमयोहते ॥ द्रुद्रोणेसधस्थमासदत् ॥७॥
रक्षोहणोव्वोव्वलगहनःप्प्रोक्षामिवैष्णवान्रक्षोहणोवोव्वलगहनो
वनयामिवैष्णवान्रक्षोहणोवोव्वलगहनोवस्तृणामिव्वैष्णवान्र-
क्षोहणोवांव्वलगहनाऽउपदधामिव्वैष्णवीरक्षोहणौवांव्वलगहनौ
पर्य्यूहामिव्वैष्णवीव्वैष्णवमसिव्वैष्णवास्स्थ ॥८॥
रक्षसाम्भागोसिनिरस्तꣳरक्षऽइदमहꣳरक्षोभितिष्ठामीदमहꣳ
रक्षोवबाधऽइदमहꣳरक्षोधमन्तमोनयामि ॥

घृतेनद्यावापृथिवीप्प्रोर्णुवाथांव्वायोव्वेस्तोकानामग्नि-
राज्ज्यस्यव्वेतुस्वाहास्वाहाकृतेऽऊर्द्ध्वनभसम्मारुतङ्गच्छतं ॥९॥
स्वराडसिसपत्नहासत्रराडस्यभिमातिहा जनराडसिरक्षोहासर्व्वराडस्य
मित्रहा ॥१०॥

॥ इति श्री शुक्लयजुर्वेदीयं रात्रिसूक्तं ॥

वाजसनेयीशुक्लयजुर्वेदसंहितान्तर्गतमिदं वैदिकं श्री रात्रि सूक्तं ॥

इदं वैदिकं रात्रिसूक्तं जुनागढ निवासिना स्वर्गतेन गोराभाई पाठक संज्ञकेन वेदपुरुषेण वडनगरा नागर ज्ञाति भूषणेनोक्तं गुरुपरंपराप्राप्तं ॥

॥ तदुद्धरणं अध्यायः कण्डिका मंत्रः ॥

१ कृणुष्व ॥ अ. १३ कं. ९ मं. १ ॥
२ त व ब्भ्रमास ॥ अ. १३ कं. १० मं. १ ॥
३ प्रतिस्प्पशो ॥ अ. १३ कं. ११ मं. १ ॥
४ उदग्ने ॥ अ. १३ कं. १२ मं. १ ॥
५ ऊर्द्ध्वो ॥ अ. १३ कं. १३ मं २ ॥
६ रक्षोहणंव्वलगहनं ॥ अ. ५ कं. २३ मं. ५ ॥
७ रक्षोहाव्विश्वचर्षणि ॥ अ. २६ कं. २६ मं. १ ॥
८ रक्षोहणोव्वोवलगहनः ॥ अ. ५ कं. २५ मं. ७ ॥
९ रक्षसाम्भागोसि ॥ अ. ६ कं. १६ मं. ७ ॥
१० स्वराडसि ॥ अ. ५ कं. २४ मं. ४ ॥

Scanned with OKEN Scanner

॥ अथ श्री तन्त्रोक्तं रात्रिसूक्तं ॥

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीं ॥ निद्राभगवतीं विष्णोरतुलां तेजसः प्रभुः ॥१॥
ब्रह्मोवाच ॥ त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ सुधा त्वमक्षरे नित्ये त्रिधा
मात्रात्मिकास्थिता ॥२॥
अर्धमात्रास्थिता नित्यायानुच्चार्या विशेषतः ॥ त्वमेवसन्ध्या सावित्री त्वं देवि जननीपरा ॥३॥
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥ त्वयैतत्पाल्यते देवित्वमत्स्यन्ते च सर्वदा ॥४॥
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥५॥
महाविद्या महामाया महामेधा महास्मृतिः ॥ महामोहा च भवती महादेवी महासुरी ॥६॥
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥७॥
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च ८
खड्गिनी शूलिनी घोरागदिनी चक्रिणी तथा ॥ शङ्खिनी चापिनी बाणा भुशुण्डीपरिघायुधा ९
सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥१०॥
यच्चकिञ्चित्क्वचिद्वस्तु सदसद्वाऽखिलात्मिके ॥ तस्य सर्वस्य याशक्तिः सात्वं किंस्तूयसे तदा ११
ययात्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ सोऽपिनिद्रावशंनीतः कस्त्वां स्तोतुमिहेश्वरः १२
विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् १३॥

॥११८॥

सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥१४॥
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघुः ॥ बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥१५॥

॥ अथ श्री सप्तशती दुर्गापाठारंभः ॥

अस्य श्री सप्तशतीस्तवनमाला मंत्रस्य चरित्रत्रयात्मकस्य मार्कंडेय सुमेधा ब्रह्मविष्णुमहेश्वरा ऋषयः ॥ गायत्र्युष्णिगनुष्टुभश्छंदांसि ॥ महाकाली महालक्ष्मी महासरस्वत्यो देवताः ॥ नंदाशाकंभरीभीमाः शक्तयः ॥ रक्तदंतिकादुर्गाभ्रामर्यो बीजानि ॥ अग्निवायुसूर्यास्तत्वानि ॥ ऋग्यजुः सामवेदाः स्वरूपाणि ॥ ममाभीष्टसिद्धये श्री परदेवता प्रीत्यर्थं सामाथर्वात्मक सप्तशती चरित्रत्रयजपे विनियोगः ॥

॥ अथ सप्तशती न्यासाः ॥

॥ अथ पंचाक्षरन्यासः ॥

ॐ ह्रीं नमः हृदयाय नमः ॥ ॐ क्लीं नमः कवचाय हुं ॥
ॐ चं नमः शिरसे स्वाहा ॥ ॐ यें नमः नेत्रत्रयाय वौषट् ॥
ॐ डिं नमः शिखायै वषट् ॥ ॐ ह्रीं नश्चण्डिकायै अस्त्राय फट् ॥

ॐ शंभुतेजो ज्वलज्ज्वालामालिनी पावके ह्रां नंदायै नमः अंगुष्ठाभ्यां नमः
" " " " ह्रीं रक्तदंतिकायै नमस्तर्जनीभ्यां स्वाहा ॥

ॐ शंभुतेजो ज्वलज्ज्वालामालिनी पावके ह्रूं शाकंभर्यै नमः मध्यमाभ्यां वषट् ॥
" " " ह्रैं दुर्गायै नमः अनामिकाभ्यां हूं ॥
" " " ह्रौं भीमायै नमः कनिष्ठिकाभ्यां वौषट् ॥
" " " ह्रः भ्रामर्यै नमः करतलकरपृष्ठाभ्यां फट् ॥
" " " ह्रां नंदायै नमः हृदयाय नमः ॥
" " " ह्रीं रक्तदंतिकायै नमः शिरसे स्वाहा ॥
" " " ह्रूं शाकंभर्यै नमः शिखायै वषट् ॥
" " " ह्रैं दुर्गायै नमः कवचाय हूं ॥
" " " ह्रौं भीमायै नमः नेत्रत्रयाय वौषट् ॥
" " " ह्रः भ्रामर्यै नमः अस्त्राय फट् ॥

अथ श्री दशश्लोकी न्यासः ॥

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥
इति अंगुष्ठाभ्यां हृदयाय नमः ॥१॥
शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥
इति तर्जनीभ्यां शिरसे स्वाहा ॥२॥
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरी ॥
इति मध्यमाभ्यां शिखायै वषट् ॥३॥

॥१२०॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥ यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवं ॥

इति अनामिकाभ्यां कवचाय हुं ॥४॥

खड्गशूलगदादीनि यानि चास्त्राणि तेम्बिके ॥ करपल्लवसंगीनि तेरस्मान् रक्ष सर्वतः ॥

इति कनिष्ठकाभ्यां नेत्रत्रयाय वौषट् ॥५॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तुते ॥

इति करतलकरपृष्ठाभ्यां अस्त्राय फट् ॥६॥

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणभुशुंडी परिघायुधा ॥

इति श्लोकान्ते महाकालीं कृष्णावर्णां पादादि नाभ्यन्तं न्यसामि ॥७॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घंटा स्वनेन नः पाहि चापज्यानिःस्वनेन च ॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरी ॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंतिते ॥ यानि चात्यर्थघोराणि ते रक्षास्मांस्तथा भुवं ॥

खड्गशूलगदादीनि यानि चास्त्राणि तेम्बिके ॥ करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥

इति श्लोकचतुष्केन महालक्ष्मीं रक्तवर्णां नाभ्यादिकंठपर्यन्तं न्यसामि ॥८॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तुते ॥

एतत्ते वदनं सौम्यं लोचनत्रयभूषितं ॥ पातु नः सर्वभीतिभ्यः कात्यायनि नमोस्तुते ॥

ज्वालाकरालमत्युग्रमशेषासुरसूदनं ॥ त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तुते ॥

हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥ सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव ॥
असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ॥ शुभाय खड्गो भवतु चण्डिके त्वां नता वयं ॥
इति पंचश्लोकस्यन्ते महासरस्वतीं शुभ्रवर्णाकंठादि शिरःपर्यन्तं न्यसामि ॥९॥

॥ इति दशश्लोकी न्यासः ॥

अथ ध्यानं मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलालंवितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ॥
निःशेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे
शुंभध्वंसिनि नाशयाशु दुरितं दुर्गे नमस्तेम्बिके ॥१॥
विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेवितां ॥
हस्तैश्चक्रधरालिखेटविशिखांश्चापं गुणं तर्जनीं
विभ्राणामनलात्मिकां शशिधरां दुर्गा त्रिनेत्रां भजे ॥२॥

एवं सच्चिदानंदरूपिणीं त्रिगुणात्मिकां तुरीयां भगवतीं दुर्गा ध्यात्वा मानसोपचारैः संपूज्य ततः नवार्णवमंत्रस्याष्टोत्तरशतं जप्त्वा कृताञ्जलिः गुरुदेवतात्मैक्यं विभाव्य स्तवस्यार्थानुसंधानपूर्वकं नातीशीघ्रं नातिमंदं मध्यमस्वरेण श्री दुर्गासप्तशतीं पठेत् ।

॥१२२॥

॥ अथ श्री सप्तशती दुर्गापाठारंभः ॥

ॐ अस्य श्री प्रथमचरितस्य ब्रह्मा ऋषिः । गायत्री छंदः । महाकाली देवता । नंदा शक्तिः । रक्तदंतिका बीजं । अग्निस्तत्वं । ऋग्वेदः स्वरूपं । श्री महाकाली प्रीत्यर्थे प्रथम चरित्रजपे विनियोगः ॥

खड्गं चक्रगदेषुचापपरिघाञ्शूलं भुशुंडीं शिरः
शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृतां ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभं ॥१॥

इति ध्यात्वा मानसोपचारैः संपूज्य श्री दुर्गा सप्तशतीं पठेत् ॥
नमश्चण्डिकायै ॥

तपस्यंतं महात्मानं मार्कंडेयं महामुनिं ॥ व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥१॥
महर्षे कथयोत्पत्तिं चंडिकायाः सुविस्तरां ॥ यया सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरं ॥२॥

श्रीं गणेशाय नमः श्री शारदाम्बायै नमः ॥ प्रथम चरितस्य मंत्रः ॥

ॐ श्रीं क्लीं ह्रीं ह्रीं फट् स्वाहा ॥

श्री परदेवतायै नमः ॥ नमश्चण्डिकायै ॥ ॐ मार्कंडेय उवाच ॥ ॥१॥

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥ निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥२॥

महामायानुभावेन यथामन्वंतराधिपः ॥ स बभुव महाभागः सावर्णिस्तनयो रवेः ॥३॥
स्वारोचिषेन्तरे पूर्वं चैत्रवंशसमुद्भवः ॥ सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ॥४॥
तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् ॥ बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ५
तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः ॥ न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥६॥
ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ॥ आक्रांतः स महाभागस्तैस्तदा प्रबलारिभिः ॥७॥
अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ॥ कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥८॥
ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ॥ एकाकी हयमारुह्य जगाम गहनं वनं ॥९॥
स तत्राश्रममद्राक्षीद् द्विजवर्यस्य मेधसः ॥ प्रशांतश्वापदाकीर्णं मुनिशिष्योपशोभितं ॥१०॥
तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः ॥ इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ॥११॥
सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टमानसः ॥ मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥१२॥
मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥ न जाने स प्रधानो मे शूरहस्ती सदामदः ॥१३॥
मम वैरिवशं यातः कान्भोगानुपलप्स्यते ॥ ये ममानुगता नित्यं प्रसादधनभोजनैः ॥१४॥
अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृतां ॥ असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययं ॥१५॥
संचितः सोऽति दुःखेन क्षयं कोशो गमिष्यति ॥ एतच्चान्यच्च सततं चिन्तयामास पार्थिवः १६॥
इति चिंतापरो राजा वृक्षमूले स्थितो यदा ॥ तदाऽऽजगाम वैश्यस्तु कश्चिदार्तिपरस्तथा १७॥
तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ॥ स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ॥१८॥

॥१२४॥

Scanned with OKEN Scanner

सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ॥
इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितं ॥१९॥
उपविश्य स्थिरो भूत्वा तमुवाच विशोत्तमः ॥
वैश्य उवाच ॥ मित्राहं वैश्यजातीयः समाधिर्नाम विश्रुतः ॥२०॥
धनवान् धर्मनिपुणः सत्यवागनसूचकः ॥
पुत्रदारैर्निरस्तश्च धनलुब्धैरसाधुभिः ॥२१॥
विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनं ॥
स्वजनेन च संत्यक्तः प्राप्तोस्मि वनमाशु वै ॥२२॥
वनमभ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः ॥
सोहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकां ॥२३॥
प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ॥
किंनु तेषां गृहे क्षेममक्षेमं किंनु सांप्रतं ॥२४॥
कोसि त्वं भाग्यवान् भासि कथयस्व प्रियाधुना ॥
राजोवाच ॥ सुरथो नाम राजाहं दस्युभिः पीडितोऽभवं ॥२५॥
प्राप्तोसि गतराज्योत्र मंत्रिभिः परिवंचितः ॥
कुटुंबं मे निरालंबं मया हीनं सुदुःखितं ॥२६॥

Scanned with OKEN Scanner

भविष्यति च चिन्तार्त व्याधिशोकोपतापितं ॥
कथं ते किन्नु सद्वृत्ता दुर्वृत्ताः किन्नु मे सुताः ॥ ॥२७॥
यैर्निरस्तो भवांल्लुब्धैः पुत्रदारादिभिर्धनैः ॥
तेषु किं भवतः स्नेहमनुबध्नाति मानसं ॥२८॥
यैर्निरस्तोऽसि पुत्राद्यैरसद्वृत्तैः सुबालिशैः ॥
तान्दृष्ट्वा किं सुखं तेषु भविष्यति महामते ॥२९॥
हितकारी वरः शत्रुर्दुःखदाः सुहृदः कुतः ॥
तस्मात्स्थिरं मनः कृत्वा विहरस्व मया सह ॥३०॥
वैश्य उवाच ॥ एवमेतद्यथा प्राह भवानस्मद्गतं वचः ॥
मनो मे न स्थिरं राजन् भवत्यत्र सुदुःखितं ॥३१॥
चिंतयात्र कुटुंबस्य दुस्त्यजस्य दुरात्मभिः ॥
किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥३२॥
यैः संत्यज्य पितुस्नेहं धनलुब्धैर्निराकृतः ॥
पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ॥३३॥
किमेतन्नाभिजानामि जानन्नपि महामते ॥
यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ॥३४॥

तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ॥
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरं ॥३५॥
राजोवाच ॥ ममापि राज्यजं दुःखं दुनोति किल मानसं ॥
पृच्छावाच्य मुनिं शांतं शोकनाशनमौषधं ॥३६॥
मार्कंडेय उवाच ॥ ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥
समाधिर्नाम वैश्योसौ स च पार्थिवसत्तमः ॥३७॥
इति कृत्वा मतिं तौ तु राजा वैश्यश्च जग्मतुः ॥
मुनिं तौ विनयोपेतौ पृष्टुं शोकस्य कारणं ॥३८॥
कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदं ॥
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥३९॥
गत्वा तं प्रणिपत्याह राजा ऋषिमनुत्तमं ॥
आसीनं सम्यगासीनः शांतं शान्तिमुपागतः ॥
तमुवाच परं ज्ञानं शोकमोहविनाशनं ॥४०॥
राजोवाच ॥ भगवंस्त्वामहं पृष्टुमिच्छाम्येकं वदस्व तत् ॥
दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥४१॥
ममत्वं मम राज्यस्य राज्यांगेष्वखिलेष्वपि ॥
जानतोपि यथाज्ञस्य किमेतन्मुनिसत्तम ॥४२॥

अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥
स्वजनैरपि संत्यक्तस्तेषु हार्दी तथाप्यति ॥४३॥
एवमेष तथाहं च द्वावप्यत्यंतदुःखितौ ॥
दृष्टदोषेपि विषये ममत्वाकृष्टमानसौ ॥४४॥
मोहो नैवापसरति किं तत्कारणमद्भुतं ॥
स्वामिंस्त्वमसि सर्वज्ञः सर्वसंशयनाशकृत् ॥४५॥
ऋषिरुवाच ॥ शृणु राजन्प्रवक्ष्यामि कारणं बंधमोक्षयोः ॥
महामायेति विख्याता सर्वेषां प्राणिनामिह ॥४६॥
ब्रह्मा विष्णुस्तथेशानस्तुराषाड् वरुणोऽनिलः ॥
सर्वे देवा मनुष्याश्च गंधर्वोरगराक्षसाः ॥४७॥
वृक्षाश्च विविधा वल्लयः पशवो मृगपक्षिणः ॥
मायाधीनाश्च ते सर्वे भाजनं बंधमोक्षयोः ॥४८॥
तया सृष्टमिदं सर्वं जगत्स्थावरजंगमं ॥
तद्वशे वर्तते नूनं मोहजालेन यंत्रितं ॥४९॥
त्वं कियान्मानुषेष्वेकः क्षत्रियो रजसाविलः ॥
ज्ञानिनामपि चेतांसि मोहयत्यनिशं हि सा ॥५०॥

Scanned with OKEN Scanner

ब्रह्मेशवासुदेवाद्या ज्ञाने सत्यप्यशेषतः ॥
तेपि रागवशाल्लोके भ्रमन्ति परिमोहिताः ॥५१॥

राजोवाच ॥
तत् किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥
ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥५२॥

ऋषिरुवाच ॥
ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे ॥
विषयाश्च महाभाग यान्ति चैवं पृथक् पृथक् ॥५३॥
दिवान्धाः प्राणिनः केचिद्रात्रावंधास्तथापरे ॥
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥५४॥
ज्ञानिनो मनुजाः सत्यं किन्तु ते नहि केवलं ॥
यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ॥५५॥
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणां ॥
मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ॥५६॥
ज्ञानेपि सति पश्यैतान्पतगाञ्छावचंचुषु ॥
कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा ॥५७॥
मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति ॥
लोभात्प्रत्युपकाराय नन्वेतान् किं न पश्यसि ॥५८॥

तथापि ममतावर्ते मोहगर्ते निपातिताः ॥
महामायाप्रभावेण संसारस्थितिकारिणा ॥५९॥
तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥
महामाया हरेश्चैषा तया संमोह्यते जगत् ॥६०॥
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥६१॥
तया विसृज्यते विश्वं जगदेतच्चराचरं ॥
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥६२॥
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥
संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी ॥६३॥
राजोवाच ॥ भगवन् का हि सा देवी महामायेति यां भवान् ॥
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ॥६४॥
यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥
तत् सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदांवर ॥६५॥
ऋषिरुवाच ॥ नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततं ॥
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥६६॥

Scanned with OKEN Scanner

देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥६७॥
योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥
आस्तीर्य शेषमभजत्कल्यान्ते भगवान्प्रभुः ॥६८॥
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥६९॥
सनाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनं ॥७०॥
तुष्टाव बोधनार्थं तं शुभैः संबोधनैर्हरिं ॥
नारायणं जगन्नाथं निस्पंदं योगनिद्रया ॥७१॥
ब्रह्मोवाच ॥ दिनानाथ हरे विष्णो वामनोत्तिष्ठ माधव ॥
भक्तार्तिहृद्धृषीकेश सर्वावास जगत्पते ॥७२॥
अंतर्यामिन्नमेयात्मन् वासुदेव जगत्पते ॥
दुष्टारिनाशनैकाग्रचित्त चक्रगदाधर ॥७३॥
सर्वज्ञ सर्वलोकेश सर्वशक्तिसमन्वित ॥
उत्तिष्ठोत्तिष्ठ देवेश दुःखनाशन पाहि मां ॥७४॥

विश्वंभर विशालाक्ष पुण्यश्रवणकीर्तन ॥
जगद्योने निराकार सर्गस्थित्यंतकारक ॥७५॥
इमौ दैत्यौ महाराज हंतुकामौ मदोद्धतौ ॥
न जानास्यखिलाधार कथं मां संकटे गतं ॥७६॥
उपेक्षसेतिदुःखार्तं यदि मां शरणागतं ॥
पालक त्वं महाविष्णो निराधारं भवेत्ततः ॥७७॥
एवं स्तुतोपि भगवान्न बुबोध यदा हरिः ॥
योगनिद्रासमाक्रान्तस्तदा ब्रह्मा ह्यचिंतयत् ॥७८॥
नूनं शक्तिसमाक्रान्तो विष्णुर्निद्रावशं गतः ॥
जजागार न धर्मात्मा किं करोम्यद्य दुःखितः ॥७९॥
हन्तुकामावुभौ प्राप्तौ दानवौ मदगर्वितौ ॥
किं करोमि क्व गच्छामि नास्ति मे शरणं क्वचित् ॥८०॥
इति संचिंत्य मनसा निश्चयं प्रतिपद्य च ॥
विचार्य मनसाप्येवं शक्तिर्मे रक्षणे क्षमा ॥८१॥
यया ह्यचेतनो विष्णुः कृतोस्ति स्पंदवर्जितः ॥
इति कृत्वा मतिं ब्रह्मा पद्मनालस्थितस्तदा ॥८२॥

॥१३॥

ब्रह्मोवाच ॥

तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः ॥
विबोधनार्थाय हरेर्हरिनेत्रकृतालयां ॥८३॥
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीं ॥
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभोः ॥८४॥
त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ॥८५॥
अर्धमात्रा स्थिता नित्या यानुच्चार्या विशेषतः ॥
त्वमेव संध्या सावित्री त्वं देवी जननी परा ॥८६॥
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥८७॥
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥८८॥
महाविद्या महामाया महामेधा महास्मृतिः ॥
महामोहा च भवती महादेवी महेश्वरी ॥८९॥
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥९०॥

॥१२३॥

त्वं श्री स्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेवच ॥९१॥
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥
शङ्खिनी चापिनी बाणभुशुण्डिपरिघायुधा ॥९२॥
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ॥
परापराणां परमा त्वमेव परमेश्वरी ॥९३॥
यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ॥९४॥
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥९५॥
विष्णुः शरीरग्रहणमहमीशान एव च ॥
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥९६॥
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥९७॥
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघुः ॥
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥९८॥

देवि त्वमस्य जगतः किल कारणं हि ज्ञातं मया सकलवेदवचोभिरंब ॥
यद्विष्णुरप्यखिललोकविवेककर्ता निद्रावशं च गमितः पुरुषोत्तमोद्य ॥९९॥
को वेद ते जननि मोहविलासलीलां मूढोस्म्यहं हरिरयं विवशश्च शेते ॥
ईदृक्तया सकलभूतमनोनिवासे विद्वत्तमा विबुधकोटिषु निर्गुणायाः ॥१००॥
सांख्या वदन्ति पुरुषं प्रकृतिं च यां तां चैतन्यभावरहितां जगतश्च कर्त्री ॥
किं तादृशासि कथमत्र जगन्निवासश्चैतन्यताविरहितो विहितस्त्वयाद्य ॥१०१॥
नाद्यं तनोषि सगुणा विविधप्रकारं नो वेत्ति कोपि तव कृत्यविधानयोगं ॥
ध्यायंति यां मुनिगणा नियतं त्रिकालं संध्येति नाम परिकल्प्य गुणा भवानि ॥१०२॥
बुद्धिर्हि बोधकरणा जगतां सदा त्वं श्रीश्चासि देवि सततं सुखदा सुराणां ॥
कीर्तिस्तथा मतिधृती किल कान्तिरेव श्रद्धा रतिश्च सकलेषु जनेषु मातः ॥१०३॥
नातः परं किल वितर्कशतैः प्रमाणं प्राप्तं मया यदिह दुःखगतिं गतेन ॥
त्वं चात्र सर्वजगतां जननीति सत्यं निद्रालुतां वितरता हरिणात्र दृष्टं ॥१०४॥
त्वं देवि वेदविदुषामपि दुर्विभाव्या वेदोपि नूनमखिलार्थतया न वेद ॥
यस्मात्त्वदुद्भवमसौ श्रुतिराप्नुवाना प्रत्यक्षमेव सकलं तव कार्यमेतत् ॥१०५॥
कस्ते चरित्रमखिलं भुवि वेद धीमान्नाहं हरिर्न च भवो न सुरास्तथान्ये ॥
ज्ञातुं क्षमाश्च मुनयो न ममात्मजाश्च दुर्वाच्य एव महिमा तव सर्वलोके ॥१०६॥

॥१३५॥

यज्ञेषु देवि यदि नाम न ते वदन्ति स्वाहेति वेदविदुषो हवने कृतेपि ॥
न प्राप्नुवन्ति सततं मखभागधेयं देवास्त्वमेव विबुधेष्वपि वृत्तिदासि ॥१०७॥
त्राता वयं भगवति प्रथमं त्वया वै देवारिसंभवभयादधुना तथैव ॥
भीतोस्मि देवि वरदे शरणं गतोस्मि घोरं निरीक्ष्य मधुना सह कैटभं च ॥१०८॥
नो वेत्ति विष्णुरधुना मम दुःखमेतज्जाने त्वयात्मविवशीकृतदेहयष्टिः ॥
मुंचादिदेवमथवा जहि दानवेन्द्रौ यद्रोचते तव कुरुष्व महानुभावे ॥१०९॥
जानन्ति ये न तव देवि परं प्रभावं ध्यायन्ति ते हरिहरावपि मन्दचित्ताः ॥
ज्ञातं मयाद्य जननि प्रकटं प्रमाणं यद्विष्णुरप्यतितरां विवशोथ शेते ॥११०॥
सिन्धूद्भवापि न हरिं प्रतिबोधितुं वै शक्ता पतिं तव वशानुगमाद्य शक्त्या ॥
मन्ये त्वया भगवति प्रसभं रमापि प्रस्वापिता न बुबुधे विवशीकृतेव ॥१११॥
धन्यास्त एव भुवि भक्तिपरास्तवांघ्रौ त्यक्त्वान्यदेवभजनं त्वयि लीनभावाः ॥
कुर्वंति देवि भजनं सकलं निकामं ज्ञात्वा समस्तजननीं किल कामधेनुं ॥११२॥
धी कान्तिकीर्तिशुभवृत्तिगुणादयस्ते विष्णोर्गुणास्तु परिहृत्य गताः क्व चाद्य ॥
बन्दीकृतो हरिरसौ ननु निद्रयात्र शक्त्या तवैव भगवत्यतिमानवत्या ॥११३॥
त्वं शक्तिरेव जगतामखिलप्रभावा त्वन्निर्मितं च सकलं खलु भावमात्रं ॥
त्वं क्रीडसे निजविनिर्मितमोहजाले नाट्ये यथा विहरते स्वकृते नटो वै ॥११४॥

॥१३६॥

विष्णुस्त्वया प्रकटितः प्रथमं युगादौ दत्ता च शक्तिरमला खलु पालनाय ॥
त्रातं च सर्वमखिलं विवशीकृतोऽद्य यद्याचते तव तथाव करोपि नूनं ॥११५॥
सृष्ट्वात्र मां भगवति प्रविनाशितुं चेन्नेच्छास्ति ते कुरु दयां परिहृत्य मौनं ॥
कस्मादिमौ प्रकटितौ किल कालरूपौ यद्वा भवानि हसितुं नु किमिच्छसे मां ॥११६॥
ज्ञातं मया तव विचेष्टितमद्भुतं वै कृत्वाखिलं जगदिदं रमसे स्वतंत्रा ॥
लीनं करोपि सकलं किल मां तथैव हन्तुं त्वमिच्छसि भवानि किमत्र चित्रं ॥११७॥
कामं कुरुष्व वधमद्य ममैव मातर्दुःखं न मे मरणजं जगदंबिकेऽत्र ॥
कर्ता त्वमेव विहितः प्रथमं स चायं दैत्याहतोऽथ मृत इत्ययशो गरिष्ठं ॥११८॥
उत्तिष्ठ देवि कुरु रूपमिवाद्भुतं त्वं मां वा त्विमौ जहि यथेच्छसि बाललीले ॥
नोचेत्प्रबोधय हरिं निहनेदिमौ यस्त्वत्साध्यमेतदखिलं किल कार्यजातं ॥११९॥
ऋषिरुवाच ॥ एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ॥१२०॥
निःसृत्य हरिदेहात्तु संस्थिता पार्श्वतस्तदा ॥
त्यक्त्वांगानि च सर्वाणि विष्णोरतुलतेजसः ॥१२१॥
निर्गता योगनिद्रा सा नाशाय च तयोस्तदा ॥
विस्पंदितशरीरोऽसौ यदा जातो जनार्दनः ॥१२२॥

॥१३७॥

धाता परमिकां प्राप्तो मुदं दृष्ट्वा हरिं ततः ॥
यदा विनिर्गता निद्रा देहात्तस्य जगद्गुरोः ॥१२३॥
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥
निर्गत्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥१२४॥
उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥
तदापश्यत्स्थितं तत्र भयत्रस्तं प्रजापतिं ॥१२५॥
उवाच च महातेजा मेघगंभीरया गिरा ॥
विष्णुरुवाच ॥ किमागतोऽसि भगवंस्तपस्त्यक्त्वात्र पद्मज ॥१२६॥
कस्माच्चिंतातुरोऽसि त्वं भयाकुलितमानसः ॥
ब्रह्मोवाच ॥ त्वत्कर्णमलजौ देव दैत्यौ च मधुकैटभौ ॥१२७॥
हन्तुं मां समुपायातौ घोररूपौ महाबलौ ॥
विष्णुरुवाच ॥ तिष्ठाद्य निर्भयो जातस्तौ हनिष्याम्यहं किल ॥१२८॥
युद्धायाऽऽजग्मतुर्मूढौ मत्समीपं गतायुषौ ॥
एकार्णवे हि शयनात्ततः सद्दृशे च तौ ॥१२९॥
मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥
क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ॥१३०॥

॥१३८॥

समुत्थाय ततस्ताभ्यां युयुधे भगवान्हरिः ॥
पंच वर्ष सहस्राणि बाहुप्रहरणो विभुः ॥१३१॥
न श्रांतौ दानवौ घोरौ श्रान्तोहं चैतदद्भुतं ॥
हरिणा चिंतितं तत्र कारणं मरणे तयोः ॥१३२॥
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥
उक्तवंतौ वरोस्मत्तो व्रीयतामिति केशवं ॥१३३॥
प्रार्थय त्वं हृषीकेश मनोभिलषितं वरं ॥
तुष्टौ स्वस्तव युद्धेन वासुदेवाद्भुतेन च ॥१३४॥
तयोस्तद्वचनं श्रुत्वा प्रत्युवाच जनार्दनः ॥
विष्णुरुवाच ॥ भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥१३५॥
किमन्येन वरेणात्र एतावद्धि वृतं मया ॥
ऋषिरुवाच ॥ वंचिताभ्यामिति तदा सर्वमापोमयं जगत् ॥१३६॥
विलोक्य ताभ्यां गदितो भगवान्कमलेक्षणः ॥
तच्छ्रुत्वा वचनं विष्णोस्तौ दैत्यौ चातिविस्मितौ ॥१३७॥
वंचिताविति मन्वानौ तस्थतुः शोकसंयुतौ ॥
विचार्य मनसा तौ तु दानवौ विष्णुमूचतुः ॥१३८॥

॥१३९॥

प्रेक्ष्य सर्वं जलमयं भूमिस्थलविवर्जितं ॥
निर्जले विपुले देशे हनस्व मधुसूदन ॥१३९॥
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥
वध्यावावां तु भवतः सत्यवाग्भव माधव ॥१४०॥
स्मृत्वा चक्रं तदा विष्णुस्तावुवाच हसन्हरिः ॥
हन्म्यद्य वां महाभागौ निर्जले विपुले स्थले ॥१४१॥
इत्युक्त्वा देवदेवेश ऊरू कृत्वातिविस्तरौ ॥
दर्शयामास तौ तत्र निर्जलं च जलोपरि ॥१४२॥
भगवान् द्विगुणं चक्रे जघनं विस्मितौ तदा ॥
शीर्षे संदधतां तत्र जघने परमाद्भुते ॥१४३॥
रथांगेन तदा भिन्ने विष्णुना प्रभविष्णुना ॥
तथेत्युक्त्वा भगवता शंखचक्रगदाभृता ॥
कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ॥१४४॥
गतप्राणौ तदा जातौ दानवौ मधुकैटभौ ॥
सागरः सकलो व्याप्तस्तदा वै मेदसा तयोः ॥१४५॥

॥१४०॥

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयं ॥
प्रभावस्या देव्यास्तु भूयः शृणु वदाम्यहं ॥१४६॥

॥ श्री सप्तशती दुर्गापाठे देवीभगवतीमाहात्म्ये मधुकैटभवधो नाम प्रथमोऽध्यायः ॥१॥

॥ अथ श्री मध्यम चरितं ॥

॥ अथ श्री द्वितीयोध्यायः ॥२॥

ॐ अस्य श्री मध्यम चरितस्य विष्णुर्ऋषिः । अनुष्टुप् छंदः । महालक्ष्मी-देवता । शाकंभरी शक्तिः । ह्रीं दुर्गा बीजं । यं वायुस्तत्वं । यजुर्वेदः स्वरूपं । श्री महालक्ष्मीप्रीत्यर्थे विपुलधनप्राप्तये श्रीमध्यमचरितजपे विनियोगः ।

ॐ ह्रीं नमश्चण्डिकायै अंगुष्ठाभ्यां हृदयाय नमः ॥
,, ,, ,, तर्जनीभ्यां शिरसे स्वाहा ॥
,, ,, ,, मध्यमाभ्यां शिखायै वषट् ॥
,, ,, ,, अनामिकाभ्यां कवचाय हूं ॥
,, ,, ,, कनिष्ठिकाभ्यां नेत्रत्रयाय वौषट् ॥
,, ,, ,, करतलकरपृष्ठाभ्यां अस्त्राय फट् ॥

॥१८१॥

अथ ध्यानं ॥

ॐ ह्रीं अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुः कुण्डिकां
दंडं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनं ॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थितां ॥१॥

इति ध्यात्वा मानसोपचारैः संपूज्य मध्यम चरितं पठेत् ॥

ॐ ह्रीं ऋषिरुवाच ॥

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ॥
महिषे सुराणामधिपे देवानां च पुरंदरे ॥१॥
तत्रासुरैर्महावीर्यै देवसैन्यं पराजितं ॥
जित्वा च सकलान्देवानिन्द्रोऽभून्महिषासुरः ॥२॥
ततः पराजिता देवाः पद्मयोनिं प्रजापतिं ॥
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥३॥

देवा ऊचुः ॥ देवदेव जगन्नाथ सृष्टिस्थित्यंतकारक ॥
दयासिंधो महाराज त्राहि नः शरणागतान् ॥४॥
महिषेण महाराज पीडिताः पापकर्मणा ॥
असाध्येनातिदुष्टेन वरदृप्तेन पापिना ॥५॥

यज्ञभागानसौ भुंक्ते ब्राह्मणैः प्रतिपादितान् ॥
अमरा गिरिदुर्गेषु भ्रमंति च भयातुराः ॥६॥
यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितं ॥
त्रिदशाः कथयामासुर्देवाभिभवविस्तरं ॥७॥
सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च ॥
अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठति ॥८॥
स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ॥
विचरंति यथा मर्त्या महिषेण दुरात्मना ॥९॥
एतद्वः कथितं सर्वममरारिविचेष्टितं ॥
शरणं च प्रपन्नाः स्मो वधस्तस्य विचिन्त्यतां ॥१०॥
ऋषिरुवाच ॥ श्रुत्वा तद्वचनं विष्णुस्तानुवाच हसन्निव ॥
युद्धं कृतं पुरास्माभिस्तथापि न मृतो ह्यसौ ॥११॥
अथ सर्वसुराणां वै तेजोभी रूपसंपदा ॥
उत्पन्ना चेद्वरारोहा सा हन्यात्तं रणे बलात् ॥१२॥
हयारिं वरदर्पं च मायाशतविशारदं ॥
हन्तुं योग्या भवेन्नारी शक्त्यंशैर्निर्मिता हि नः ॥१३॥

॥१४३॥

प्रार्थयन्तु च तेजोंशान् स्त्रियोस्माकं तथा पुनः ॥
उत्पन्नैस्तैश्च तेजोंशैस्तेजोराशिर्भवेद्यथा ॥१४॥
आयुधानि वयं दद्मः सर्वे रुद्रपुरोगमाः ॥
तस्यै सर्वाणि दिव्यानि त्रिशूलादीनि यानि च ॥१५॥
सर्वायुधधरा नारी सर्वतेजःसमन्विता ॥
हनिष्यति दुरात्मानं तं पापं मदगर्वितं ॥१६॥
इत्थं निशम्य देवानां वचांसि मधुसूदनः ॥
चकार कोपं शंभुश्च भ्रुकुटीकुटिलाननौ ॥१७॥
ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ॥
निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ॥१८॥
अन्येषां चैव देवानां शक्रादीनां शरीरतः ॥
निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥१९॥
अतीव तेजसः कूटं ज्वलंतमिव पर्वतं ॥
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरं ॥२०॥
रक्तवर्णं शुभाकारं पद्मरागमणिप्रभं ॥
किञ्चिच्छीतं तथा चोष्णं मरीचिजालमण्डितं ॥२१॥

निःसृतं हरिणा दृष्टं हरेण च महात्मना ॥
विस्मितौ तौ महाराज बभूवतुरुरुक्रमौ ॥२२॥
शंकरस्य शरीरात्तु निःसृतं महदद्भुतं ॥
रौप्यवर्णमभूत्तीव्रं दुर्दर्शं दारुणं महत् ॥२३॥
भयंकरं च दैत्यानां देवानां विस्मयप्रदं ॥
घोररूपं गिरिप्रख्यं तमोगुणमिवापरं ॥२४॥
ततो विष्णुशरीरात्तु तेजोराशिमिवापरं ॥
नीलं सत्त्वगुणोपेतं प्रादुरास महाद्युति ॥२५॥
ततश्चेन्द्रशरीरात्तु चित्ररूपं दुरासदं ॥
आविरासीत्सुसंवृत्तं तेजः सर्वगुणात्मकं ॥२६॥
कुबेरयमवह्नीनां शरीरेभ्यः समंततः ॥
निश्चक्राम महत्तेजो वरुणस्य तथैव च ॥२७॥
अन्येषां चैव देवानां शरीरेभ्योतिभास्वरं ॥
निर्गतं तन्महातेजोराशिरासीन्महोज्ज्वलः ॥२८॥
तं दृष्ट्वा विस्मिताः सर्वे देवा विष्णुपुरोगमाः ॥
तेजोराशिं महादिव्यं हिमाचलमिवापरं ॥२९॥

॥१४५॥

पश्यतां तत्र देवानां तेजःपुंजसमुद्भवा ॥
बभूवातिवरा नारी सुंदरी विस्मयप्रदा ॥३०॥
अतुलं तत्र तत्तेजः सर्वदेवशरीरजं ॥
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥३१॥
त्रिगुणा सा महालक्ष्मीः सर्वदेवशरीरजा ॥
अष्टादशभुजा रम्या त्रिवर्णा विश्वमोहिनी ॥३२॥
श्वेतानना कृष्णनेत्रा संरक्ताधरपल्लवा ॥
ताम्रपाणितला कांता दिव्यभूषणभूषिता ॥३३॥
अष्टादशभुजा देवी सहस्रभुजमण्डिता ॥
यदभूच्छांभवं तेजस्तेनाजायत तन्मुखं ॥३४॥
याम्येन चाभवन्केशा बाहवो विष्णुतेजसा ॥
सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत् ॥३५॥
वारुणेन च जंघोरू नितंबस्तेजसा भुवः ॥
ब्रह्मणस्तेजसा पादौ तदंगुल्योऽर्कतेजसा ॥३६॥
वसूनां च करांगुल्यः कौबेरेण च नासिका ॥
तस्यास्तु दंताः संभूताः प्राजापत्येन तेजसा ॥३७॥

॥१२६॥

नयनत्रितयं जज्ञे तथा पावकतेजसा ॥
भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य ॥३८॥
अन्येषां चैव देवानां संभवस्तेजसां शिवा ॥
ततः समस्तदेवानां तेजोराशिसमुद्भवां ॥३९॥
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥
स्वायुधेभ्यः समुत्पाद्य तेजोयुक्तानि सत्वराः ॥४०॥
ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधानि च ॥
ऊचुर्जयजयेत्युच्चैर्जयन्तीति जयैषिणः ॥४१॥
शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ॥
चक्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः ॥४२॥
शंखं च वरुणः शक्तिं ददौ तस्यै हुताशनः ॥
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥४३॥
वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः ॥
ददौ तस्यै सहस्राक्षो घंटामैरावताद्गजात् ॥४४॥
कालदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ ॥
प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंडलुं ॥४५॥

॥१४७॥

समस्तरोमकूपेषु निजरश्मीन्दिवाकरः ॥
कालश्च दत्तवांन् खड्गं तस्याश्चर्म च निर्मलं ॥४६॥
क्षीरोदश्चामलं हारमजरे च तथाम्बरे ॥
चूडामणिं तथा दिव्यं कुंडले कटकानि च ॥४७॥
अर्धचन्द्रं तथा शुभ्रं केयूरान्सर्वबाहुषु ॥
नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमं ॥४८॥
अंगुलीयकरत्नानि समस्तास्वंगुलीषु च ॥
विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलं ॥४९॥
अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनं ॥
अम्लानपंकजां मालां शिरस्युरसि चापरां ॥५०॥
अददज्जलधिस्तस्यै पंकजं चातिशोभनं ॥
हिमवान्वाहनं सिंहं रत्नानि विविधानि च ॥५१॥
ददावशून्यं सुरया पानपात्रं धनाधिपः ॥
शेषश्च सर्वनागेशो महामणिविभूषितं ॥५२॥
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमां ॥
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥५३॥

॥१४८॥

Scanned with OKEN Scanner

सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥५३॥
अमायतातिमहता प्रतिशब्दो महानभूत् ॥
चुक्षुभुः सकला लोकाः समुद्राश्च चकंपिरे ॥५४॥
चचाल वसुधा चेलुः सकलाश्च महीधराः ॥
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीं ॥५५॥
सायुधां भूषणैर्युक्तां दृष्ट्वा ते विस्मयं गताः ॥
तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ॥५६॥
नमः शिवायै कल्याण्यै शांत्यै पुष्ट्यै नमोनमः ॥
भगवत्यै नमो देव्यै रुद्राण्यै सततं नमः ॥५७॥
कालरात्र्यै तथाम्बायै इन्द्राण्यै ते नमोनमः ॥
सिद्ध्यै बुद्ध्यै शुद्ध्यै तथा वैष्णव्यै ते नमोनमः ॥५८॥
पृथिव्यां या स्थिता पृथ्व्या न ज्ञाता पृथिवीति च ॥
अन्तःस्थिता प्रेरयति वन्दे तामीश्वरीं परां ॥५९॥
कल्याणं कुरु भो मातस्त्राहि नः शत्रुतापितान् ॥
जहि पापं हयारिं त्वं तेजसा स्वेन मोहितं ॥६०॥

Scanned with OKEN Scanner

खलं मायाविनं घोरं स्त्रीवध्यं वरदर्पितं ॥
दुःखदं सर्वदेवानां नानारूपधरं शठं ॥६१॥
त्वमेका सर्वदेवानां शरणं भक्तवत्सले ॥
पीडितान्दानवेनाद्य त्राहि देवि नमोस्तु ते ॥६२॥
ऋषिरुवाच ॥ एवं स्तुता तदा देवी सुरैः सर्वसुखप्रदा ॥
तानुवाच महादेवी स्मितपूर्वं शुभं वचः ॥६३॥
देव्युवाच ॥ भयं त्यजन्तु गीर्वाणा महिषान्मंदचेतसः ॥
हनिष्यामि रणेऽद्यैव वरदर्स विमोहितं ॥६४॥
इति कृत्वा स्मितं देवी साट्टहासं चकारह ॥
उच्चैःशब्दं महाघोरं दानवानां भयप्रदं ॥६५॥
चकंपे वसुधा तत्र श्रुत्वा तच्छब्दमद्भुतं ॥
चेलुश्च पर्वताः सर्वे चुक्षोभाब्धिश्च वीर्यवान् ॥६६॥
मेरुश्चचाल शब्देन दिशः सर्वप्रपूरिताः ॥
भयं जग्मुस्तदा श्रुत्वा दानवास्तं स्वनं महत् ॥६७॥
जयपाहीति देवास्तामूचुः परमहर्षिताः
महिषोपि स्वनं श्रुत्वा चुकोप मदगर्वितः ॥६८॥

किमेतदिति तान्दैत्यान्पप्रच्छ स्वनशंकितः ॥
गच्छंतु त्वरिता दूता ज्ञातुं शब्दसमुद्भवं ॥६९॥
कुतः केनायमत्युग्रः शब्दः कर्णव्यथाकरः ॥
देवो वा दानवो वापि यो भवेत्स्वनकारकः ॥७०॥
गृहीत्वा तं दुरात्मानं मत्समीपं नयंत्विह ॥
अहं गत्वा हनिष्यामि तं पापं वितथश्रमं ॥७१॥
इत्युक्तास्तेन ते दूता देवीं सर्वांगसुंदरीं ॥
अष्टादशभुजां दिव्यां सर्वाभरणभूषितां ॥७२॥
सर्वलक्षणसंपन्नां वरायुधधरां शुभां ॥
दधतीं चषकं हस्ते पिबंतीं च मुहुर्मुहुः ॥७३॥
संवीक्ष्य भयभीतास्ते जग्मुस्त्रस्ता सुशंकिताः ॥
सकाशे महिषस्याशु तमूचुः स्वनकारणं ॥७४॥
दूता ऊचुः ॥ देवी दैत्येश्वर प्रौढा दृश्यते काचिदंगना ॥
सर्वांगभूषणा नारी सर्वरत्नोपशोभिता ॥ ॥७५॥
न मानुषी नासुरी सा दिव्यरूपा मनोहरा ॥
सिंहारूढाऽऽयुधधरा चाष्टादशकरा वरा ॥७६॥

सा नादं कुरुते नारी लक्ष्यते मदगर्विता
सुरापानरता कामं जानीमो न समर्तृका ॥७७॥
अंतरिक्षस्थिता देवास्तां स्तुवंति मुदान्विताः ॥
किमर्थमागता चात्र किं चिकीर्षति सुंदरी ॥७८॥
द्रष्टुं नैव समर्थाः स्मस्तत्तेजःपरिधर्षिताः ॥
महिष उवाच ॥ गच्छ वीर मयादिष्टो मंत्रिश्रेष्ठ बलान्वित ॥७९॥
सामादिभिरुपायैस्त्वं समानय शुभाननां ॥
ऋषिरुवाच ॥ महिषस्य वचः श्रुत्वा पेशलं मंत्रिसत्तमः ॥८०॥
जगाम तरसा कामं गजाश्वरथसंयुतः ॥
गत्वा दूरतरं स्थित्वा तामुवाच मनस्विनीं ॥८१॥
मंत्री उवाच ॥ कासि त्वं मधुरालापे किमत्रागमनं कृतं ॥
पृच्छति त्वां महाभागे मन्मुखेन मम प्रभुः ॥८२॥
स जेता सर्वदेवानामवध्यस्तु नरैः किल ॥
द्रष्टुमिच्छति राजा मे महिषो नाम पार्थिवः ॥८३॥
वशंगतोऽसौ तवात्यर्थं रूपसंश्रवणात्तव ॥
करभोरु वदाऽऽशु त्वं संविधेयं मया यथा ॥८४॥

ऋषिरुवाच ॥ इति तस्य वचः श्रुत्वा प्रहस्य प्रमदोत्तमा ॥
तमुवाच महाराज मेघगंभीरया गिरा ॥८५॥
देव्युवाच ॥ मंत्रिवर्य सुराणां वै जननीं विद्धि मां किल ॥
महालक्ष्मीमिति ख्यातां सर्वदैत्यनिषूदिनीं ॥८६॥
प्रार्थिताहं सुरैः सर्वैर्महिषस्य वधाय च ॥
तस्मादिहागतास्म्यद्य तद्वधार्थं कृताश्रमा ॥८७॥
गच्छ पातालमधुना जीवितेच्छा यदस्ति ते ॥
नोचेत्कृतागसं दुष्टं हनिष्यामि रणांगणे ॥८८॥
मघवा स्वर्गमाप्नोतु देवाः संतु हविर्भुजः ॥
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥८९॥
ऋषिरुवाच ॥ इति देव्या वचः श्रुत्वा चिन्तयामास दानवः ॥
यथाऽभिहितं देव्या यथारुचि करोतु सः ॥९०॥
इति संचिंत्य मेधावी जगाम नृपसंनिधौ ॥
प्रणम्य तमुवाचेदं कृतांजलिरमात्यजः ॥९१॥
मंत्री उवाच ॥ राजन्देवी वरारोहा सिंहस्योपरिसंस्थिता ॥
अष्टादशभुजा रम्या वराऽऽयुधधरा परा ॥९२॥

Scanned with OKEN Scanner

सा मयोक्ता महाराज महिषं भज भामिनी ॥
महिषी भव राज्ञस्त्वं त्रैलोक्याधिपतेः प्रिया ॥९३॥
इति मद्वचनं श्रुत्वा सा स्मयावेशमोहिता ॥
मामुवाच विशालाक्षी स्मितपूर्वमिदं वचः ॥९४॥
करिष्येऽहं मृधे युद्धं हनिष्ये त्वां सुराप्रियं ॥
गच्छ वा दुष्ट पातालं जीवितेच्छा यदस्ति ते ॥९५॥

महिष उवाच ॥ गच्छ ताम्र महाभाग युद्धाय कृतनिश्चयः ॥
तामानय वरारोहां जित्वा धर्मेण मानिनीं ॥९६॥

ऋषिरुवाच ॥ इति तद्भाषितं श्रुत्वा ताम्रः कालवशंगतः ॥
निर्गतः सैन्यसंयुक्तः प्रणम्य महिषं नृपं ॥९७॥
स गत्वा तां समालोक्य देवीं सिंहोपरिस्थितां ॥
स्तूयमानां सुरैः सर्वैः सर्वायुधविभूषितां ॥९८॥
तामुवाच विनीतः सन्वाक्यं मधुरया गिरा ॥
देवि दैत्येश्वरः शृंगी त्वद्रूपगुणमोहितः ॥९९॥
स्पृहां करोति महिषस्त्वत्पाणिग्रहणाय वै ॥
भुंक्ष्व राज्यसुखं पूर्णं वर्षाणामयुतायुतं ॥१००॥

देव्युवाच ॥ गच्छ ताम्र पतिं ब्रूहि मुमुर्षुं मंदचेतसं ॥
महिषं चातिकामार्तं मूढं ज्ञानविवर्जितं ॥१०१॥
नाहं पतिंवरा नारी वर्तते मे पतिः प्रभुः ॥
सर्वकर्ता सर्वसाक्षी ह्यकर्ता निःस्पृहः स्थिरः ॥१०२॥
निर्गुणो निर्ममोऽनन्तो निरालंबो निराश्रयः ॥
सर्वज्ञः सर्वगः साक्षी पूर्णः पूर्णाशयः शिवः ॥१०३॥
सर्वावासः क्षमः शांतः सर्वदृक् सर्वभावनः ॥
तं त्यक्त्वा महिषं मंदं कथं सेवितुमुत्सहे ॥१०४॥
जीवितेच्छास्ति चेत्पाप गच्छ पातालमाशु वै ॥
समरेनेदानवैर्युक्तस्त्वन्यथा हन्मि संगरे ॥१०५॥
ऋषिरुवाच ॥ इत्युक्त्वा सा तदा देवी जगर्ज भृशमद्भुतं ॥
कल्पांतसदृशं नादं चक्रे दैत्यभयावहं ॥१०६॥
ताम्रः श्रुत्वा च तं शब्दं भयत्रस्तमनास्तदा ॥
पलायनं ततः कृत्वा जगाम महिषांतिकं ॥१०७॥
अयोध्यायां च ये दैत्यास्तेपि चिंतामवाप्नुवन् ॥
ताम्रं समागतं दृष्ट्वा हयारिरपि मोहितः ॥१०८॥

॥१५५॥

दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥
सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ॥१०९॥
आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥
अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥११०॥
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥
पादाक्रान्त्यानतभुवं किरीटोल्लिखिताम्बरां ॥१११॥
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन तां ॥
दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थितां ॥११२॥
ततः प्रववृते युद्धं तया देव्या सुरद्विषां ॥
शस्त्रास्त्रैर्बहुधामुक्तैरादीपितदिगन्तरं ॥११३॥
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥
युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ॥११४॥
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥
अयुध्यतायुतानां च सहस्रेण महाहनुः ॥११५॥
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥११६॥

Scanned with OKEN Scanner

गजवाजिसहस्त्रौघैरनेकैः परिवारितः ॥
वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥११७॥
बिडालाख्यो महादैत्यो पञ्चाशद्भिरथायुतैः ॥
युयुधे संयुगे तत्र रथानां परिवारितः ॥११८॥
वृतः कालो रथानां च रणे पंचाशतायुतैः ॥
युयुधे संयुगे तत्र तावद्भिः परिवारितः ॥११९॥
अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥
युयुधुः संयुगे देव्या सह तत्र महासुराः ॥१२०॥
कोटिकोटिसहस्त्रैस्तु रथानां दन्तिनां तथा ॥
हयानां च वृतो युद्धे तत्राभून्महिषासुरः ॥१२१॥
तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥
युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ॥१२२॥
केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥
देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ॥१२३॥
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥
लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥१२४॥

Scanned with OKEN Scanner

अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥
मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥१२५॥
सोऽपि क्रुद्धो धुतसटो देव्यावाहनकेशरी ॥
चचारासुरसैन्येषु वनेष्विव हुताशनः ॥१२६॥
निःश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥
त एव सद्यः संभूता गणाः शतसहस्रशः ॥१२७॥
युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ॥
नाशयन्तोऽसुरगणान्देवीशक्त्युपबृंहिताः ॥१२८॥
अवादयन्त पटहान्गणाः शङ्खांस्तथापरे ॥
मृदङ्गाश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ॥१२९॥
ततो देवी त्रिशूलेन गदया शक्तिऋष्टिभिः ॥
खड्गादिभिश्च शतशो निजघान महासुरान् ॥१३०॥
पातयामास चैवान्यान्घण्टास्वनविमोहितान् ॥
असुरान्भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ॥१३१॥
केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥
विपोथिता निपातेन गदया भुवि शेरते ॥१३२॥

॥१५८॥

वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥
केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ॥१३३॥
निरन्तराः शरौघेण कृताः केचिद्रणाजिरे ॥
सेनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ॥१३४॥
केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथा परे ॥
शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥१३५॥
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥
एकबाह्वक्षिचरणाः केचिद् देव्या द्विधाकृताः ॥१३६॥
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥
कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ॥१३७॥
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥
कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ॥१३८॥
तिष्ठतिष्ठेति भाषन्तो देवीमन्ये महासुराः ॥
तिष्ठतिष्ठेति चैवोक्त्वान्ये दैत्या युयुधुर्मृधे ॥१३९॥
रुधिरौघविलुप्तांगा संग्रामे लोमहर्षणे ॥
पातितै रथनागाश्वैरसुरैश्च वसुन्धरा ॥१४०॥

अगम्या साभवत्तत्र यत्राभूत्स महारणः ॥
शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः ॥१४१॥
मध्ये चासुरसैन्यस्य वारणासुरवाजिनां ॥
क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ॥१४२॥
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयं ॥
स च सिंहो महानादमुत्सृजन्धुतकेसरः ॥१४३॥
शरीरेभ्योऽमरारीणामसूनीव विचिन्वति ॥
देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ॥
यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥१४४॥

॥ श्री सप्तशती दुर्गापाठे देवीभगवतीमाहात्म्ये महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ॥२॥

॥ आदितो मंत्राः २९० ॥

ऋषिरुवाच ॥ निहन्यमानं तत्सैन्यमवलोक्य महासुरः ॥
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकां ॥१॥
स देवीं शरवर्षेण ववर्ष समरेऽसुरः ॥
यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ॥२॥

तस्य छित्त्वा ततो देवी लीलयैव शरोत्करान् ॥
जघान तुरगान्बाणैर्यन्तारं चैव वाजिनां ॥३॥
चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितं ॥
विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥४॥
स छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥
अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥५॥
सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ॥
आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥६॥
तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ॥
ततो जग्राह शूलं स कोपादरुणलोचनः ॥७॥
चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ॥
जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥८॥
दृष्ट्वा तदापतच्छूलं देवीशूलममुञ्चत ॥
तच्छूलं शतधा तेन नीतं स च महासुरः ॥९॥
हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ॥
आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥१०॥

॥१६१॥

Scanned with OKEN Scanner

सोपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतं ॥
हुङ्काराभिहतां भूमौ पातयामास निष्प्रभां ॥११॥
भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥
चिक्षेप चामरः शूलं बाणैस्तदपि साऽच्छिनत् ॥१२॥
ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः ॥
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥१३॥
युध्यमानौ ततस्तौ तु तस्मान्नागान्महींगतौ ॥
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥१४॥
ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा ॥
करप्रहारेण शिरश्चामरस्य पृथक्कृतं ॥१५॥
उदग्रश्चरणे देव्या शिलावृक्षादिभिर्हतः ॥
दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥१६॥
देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतं ॥
बाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकं ॥१७॥
उग्रास्यमुग्रवीर्यं च तथैव च महाहनुं ॥
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥१८॥

Scanned with OKEN Scanner

विडालस्यासिना कायात्पातयामास वै शिरः ॥
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयं ॥१९॥
हाहाकारो महानासीत्सैन्ये तस्य दुरात्मनः ॥
चुकुशू रुरुदुश्चैव त्राहि त्राहीति भाषणैः ॥२०॥
अन्ये ये सैनिका राजन्सिंहेन भक्षिताश्च ते ॥
तच्छ्रुत्वा वचनं तेषां महिषो दुर्मनास्तदा ॥२१॥
तेषां तद्वचनं श्रुत्वा क्रोधयुक्तो नराधिपः ॥
दारुकं प्राह तरसा रथमानय मेद्भुतं ॥२२॥
सहस्रखरसंयुक्तं पताकाध्वजभूषितं ॥
आयुधैः संयुतं शुभ्रं सुचक्रं चारुकूवरं ॥२३॥
आनीतं तं रथं ज्ञात्वा दानवेन्द्रो महाबलः ॥
सर्वायुधसमायुक्तो वरास्तरणसंयुतः ॥२४॥
मानुषं देहमास्थाय संग्रामे गंतुमुद्यतः ॥
त्यक्त्वा तन्माहिषं रूपं बभूव पुरुषः शुभः ॥२५॥
दिव्याम्बरधरः कांतः पुष्पबाण इवापरः ॥
तमायांतं समालोक्य दैत्यानामधिपं तदा ॥२६॥

बहुभिः संवृतं वीरैर्देवी शंखमवादयत् ॥
समीपमेत्य देव्यास्तु तामुवाच हसन्निव ॥२७॥
देवि संसारचक्रेऽस्मिन्वर्तमाने जनः किल ॥
नरो वाथ तथा नारी सुखं वांछति सर्वथा ॥२८॥
नारीपुरुषयोः कांते समानवयसोः सदा ॥
संयोगो यः समाख्यातः स एवात्युत्तमः स्मृतः ॥२९॥
तं चेत्करोषि संयोगं वीरेण च मया सह ॥
अत्युत्तमसुखस्यैव प्राप्तिः स्यात्ते न संशयः ॥३०॥
इन्द्रादयः सुराः सर्वे संग्रामे विजिता मया ॥
रत्नानि यानि दिव्यानि भवनेऽस्मिन्ममाधुना ॥३१॥
भुंक्ष्व त्वं तानि सर्वाणि यथेष्टं देहि वा यथा ॥
पट्टराज्ञी भवाय त्वं दासोऽस्मि तव सुंदरि ॥३२॥
ऋषिरुवाच ॥ इतिब्रुवाणं तं दैत्यं देवी भगवती हि सा ॥
प्रहस्य सस्मितं वाक्यमुवाच वरवर्णिनी ॥३३॥
देव्युवाच ॥ नाहं पुरुषमिच्छामि परमं पुरुषं विना ॥
तस्य चेच्छास्म्यहं दैत्य सृजामि सकलं जगत् ॥३४॥

Scanned with OKEN Scanner

स मां पश्यति विश्वात्मा तस्याहं प्रकृतिः शिवा ॥

मूर्खस्त्वमसि मंदात्मन्यत्स्त्रीसंगं चिकीर्षसि ॥३५॥

नरस्य बंधनार्थाय शृंखला स्त्री प्रकीर्तिता ॥

नारीसंगे महद्दुःखं जानन्कि त्वं विमुह्यसि ॥३६॥

त्यज वैरं सुरैः सार्धं यथेष्टं विचरावनौ ॥

पाताले गच्छ वा कामं जीवितेच्छा यदस्ति ते ॥३७॥

अथवा कुरु संग्रामं बलवत्यस्मि सांप्रतं ॥

प्रेषिताहं सुरैः सर्वैस्तव नाशाय दानव ॥३८॥

हनिष्यामि महाबाहो त्वामहं नात्र संशयः ॥

ऋषिरुवाच ॥ इत्युक्तः स तया देव्या धनुरादाय दानवः ॥३९॥

मुमोच तरसा बाणान्कर्णाकृष्टाञ्छिलाशितान् ॥

देवी चिच्छेद तान्बाणैः क्रोधान्मुक्तैरयोमुखैः ॥४०॥

तयोः परस्परं युद्धं संबभूव भयप्रदं ॥

सपदातिरथं सैन्यं देव्या सिंहेन नाशितं ॥४१॥

एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ॥

माहिषेण स्वरूपेण त्रासयामास तान्गणान् ॥४२॥

॥१६५॥

कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ॥
लाङ्गूलताडितांश्चान्यान् शृङ्गाभ्यां च विदारितान् ॥४३॥
वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ॥
निःश्वासपवनेनान्यान्पातयामास भूतले ॥४४॥
निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ॥
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥४५॥
सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ॥
शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥४६॥
वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥४७॥
धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः ॥
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥४८॥
इति क्रोधसमाध्मातमापतन्तं महासुरं ॥
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥४९॥
सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरं ॥
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥५०॥

॥१६६॥

ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ॥
छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ॥५१॥
तत एवाशु पुरुषं देवी चिच्छेद सायकैः ॥
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥५२॥
करेण च महासिंहं तं चकर्ष जगर्ज च ॥
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥५३॥
ततो महासुरो भूयो माहिषं वपुरास्थितः ॥
तथैव क्षोभयामास त्रैलोक्यं सचराचरं ॥५४॥
ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमं ॥
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥५५॥
ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ॥
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥५६॥
सा च तान्प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ॥
उवाच तं मदोद्धूतमुखरागाकुलाक्षरं ॥५७॥
देव्युवाच ॥ मा गर्वं कुरु मंदात्मंस्तिष्ठ तिष्ठ रणांगणे ॥
करिष्यामि निरातंकान्हत्वा त्वां सुरसत्तमान् ॥५८॥
गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहं ॥

॥१६७॥

Scanned with OKEN Scanner

मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥५९॥
ऋषिरुवाच ॥ इत्युक्त्वा चषकं हैमं गृहीत्वा सुरया युतं ॥
पपौ पुनः पुनः क्रोधाद्धंतुकामा महासुरं ॥६०॥
एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरं ॥
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥६१॥
ततः सोऽपि पदाक्रान्तस्तया निजमुखात्ततः ॥
अर्धनिष्क्रान्त एवासीद् देव्या वीर्येण संवृतः ॥६२॥
अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ॥
तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥६३॥
ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ॥
प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥६४॥
एवं स महिषो नाम ससैन्यः ससुहृद्गणः ॥
त्रैलोक्यं मोहयित्वा तु तया देव्या निपातितः ॥ ॥६५॥
तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ॥
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥६६॥

॥ श्री सप्तशती दुर्गापाठे देवीभगवतीमाहात्म्ये महिषासुरवधो नाम तृतीयोऽध्यायः ॥३॥

॥ आदितो मंत्राः २५६ ॥

॥१६८॥

ऋषिरुवाच ॥ अथ प्रमुदिताः सर्वे देवा इंद्रपुरोगमाः ॥
स्तुतिमारेभिरे कर्तुं निहते महिषासुरे ॥१॥
शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥२॥
देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या ॥
तामम्बिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः ॥३॥
यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च नहि वक्तुमलं बलं च ॥
सा चण्डिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं करोतु ॥४॥
या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वं ॥५॥
किं वर्णयाम तव रूपमचिन्त्यमेतत्किं चातिवीर्यमसुरक्षयकारि भूरि ॥
किंचाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥६॥
हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा ॥
सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥७॥
यस्याः समस्तसुरतासमुदीरणेन तृप्तिं प्रयांति सकलेषु मखेषु देवि ॥
स्वाहाऽसि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ॥८॥

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ॥
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्याऽसि सा भगवती परमा हि देवी ॥९॥
शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नां ॥
देवि त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहन्त्री ॥१०॥
मेधाऽसि देवि विदिताखिलशास्त्रसारा दुर्गाऽसि दुर्गभवसागरनौरसङ्गा ॥
श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥११॥
ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारि कनकोत्तमकान्ति कान्तं ॥
अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ॥१२॥
दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ॥
प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥१३॥
देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कुलानि ॥
विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सु विपुलं महिषासुरस्य ॥१४॥
ते संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः ॥
धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना ॥१५॥
धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥
स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥१६॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥
दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥१७॥
एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वन्तु नाम नरकाय चिराय पापं ॥
संग्राममृत्युमधिगम्य दिवं प्रयान्तु मत्वेति नूनमहितान्विनिहंसि देवि ॥१८॥
दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रं ॥
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वहितेषु साध्वी ॥१९॥
खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकान्तिनिवहेन दृशोऽसुराणां ॥
यन्नागता विलयमंशुमदिन्दुखण्डयोग्याननं तव विलोकयतां तदेतत् ॥२०॥
दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ॥
वीर्यं च हन्तृ हृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थं ॥२१॥
केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र ॥
चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥२२॥
त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ॥
नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते ॥२३॥
ब्रह्मा सृजत्यवति विष्णुरिदं महेशः शक्त्या तवैव हरते ननु चांतकाले ॥
ईशा न तेपि च भवन्ति त्वया विहीनास्तस्मात्त्वमेव जगतः स्थितिनाशकर्त्री ॥२४॥

कीर्तिर्मतिः स्मृतिगती करुणा दया त्वं श्रद्धा धृतिश्च वसुधा कमलाऽऽलया च ॥
पुष्टिः कलाथ विजया गिरिजा जया त्वं तुष्टिः प्रभा त्वमसि बुद्धिरुमा रमा च ॥२५॥
विद्या क्षमा जगति कांतिरपीह मेधा सर्वं त्वमेव विदिता भुवनत्रयेस्मिन् ॥
आभिर्विना तव तु शक्तिभिराशु कर्तुं कोवा क्षमः सकललोकनिवासभूमे ॥२६॥
त्वं धारणा ननु न चेदसि कूर्मनागौ धर्तुं क्षमौ कथमिलामपि तौ भवेतां ॥
पृथ्वी न चेत्त्वमसि वा गगने कथं स्थास्यत्येतदेव निखिलं बहुभारयुक्तं ॥२७॥
ये वा स्तुवंति मनुजा अमरान्विमूढा मायागुणैस्तव चतुर्मुखविष्णुरुद्रान् ॥
शुभ्रांशुवह्नियमवायुगणेशमुख्यान् किं त्वामृते जननि ते प्रभवंति कार्ये ॥२८॥
ये जुह्वति प्रविततेल्पधियोऽव यज्ञे वह्नौ सुरान्समधिकृत्य हविः समृद्धं ॥
स्वाहा नचेत्त्वमसि ते कथमापुरद्धा त्वामेव किं नहि यजंति ततो हि मूढाः ॥२९॥
भोगप्रदासि भवतीह चराचराणां स्वांशैर्ददासि खलु जीवनमेव नित्यं ॥
स्वीयान्सुराञ्जननि पोषयसीह यद्वत्तद्वत्परानपि च पालयसीति हेतोः ॥३०॥
चित्रं त्वमीयदसुभी रहिता न संति त्वच्चिंतितेन दनुजाः प्रथितप्रभावाः ॥
येषां कृते जननि देहनिबंधनं ते क्रीडारसस्तव न चान्यतरोऽत्र हेतुः ॥३१॥
विद्या त्वमेव सुखदाऽसुखदाऽप्यविद्या मातस्त्वमेव जननार्तिहरा नराणां ॥
मोक्षार्थिभिस्तु कलिता किल मंदधीभिर्नाऽऽराधिता जननि भोगपरैस्तथाऽज्ञैः ॥३२॥

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ॥
अर्चिता जगतां धात्री तथा गंधानुलेपनैः ॥३३॥
भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता ॥
प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान् ॥३४॥
देव्युवाच ॥ व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवांछितं ॥
ददाम्यहमतिप्रीत्या स्तवैरेभिः सुपूजिता ॥३५॥
देवा ऊचुः ॥ भगवत्या कृतं सर्वं न किंचिदवशिष्यते ॥
यदयं निहतः शत्रुरस्माकं महिषासुरः ॥३६॥
यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥
संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥३७॥
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥
तस्य वित्तर्धिविभवैर्धनदारादिसंपदां ॥३८॥
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदांबिके ॥
ऋषिरुवाच ॥ इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः ॥३९॥
तथेत्युक्त्वा भद्रकाली बभूवांतर्हिता नृप ॥
इत्येतत्कथितं भूप संभूता सा यथा पुरा ॥४०॥
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥

॥१७३॥

पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ॥४१॥
वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः ॥
रक्षणाय च लोकानां देवानामुपकारिणी ॥
तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥४२॥

॥ श्री सप्तशती दुर्गापाठे देवी भगवतीमाहात्म्ये देवैः कृता भगवतीस्तुतिर्नाम चतुर्थोऽध्यायः ॥४॥

॥ आदितो मंत्राः ३०८ ॥

॥ अथ श्री उत्तम चरितं ॥

॥ अथ श्री पंचमोऽध्यायः ॥५॥

ॐ अस्य श्री उत्तमचरितस्य रुद्र ऋषिः । अनुष्टुप् छंदः । महासरस्वती देवता । भीमा शक्तिः । भ्रामरी बीजं । सूर्यस्तत्वं । सामवेदः स्वरूपं । महासरस्वतीप्रीत्यर्थे श्री उत्तमचरितजपे विनियोगः ।

ॐ क्लीं नमश्चण्डिकायै अंगुष्ठाभ्यां हृदयाय नमः ॥
" " " तर्जनीभ्यां शिरसे स्वाहा ॥
" " " मध्यमाभ्यां शिखायै वषट् ॥
" " " अनामिकाभ्यां कवचाय हुं ॥
" " " कनिष्ठिकाभ्यां नेत्रत्रयाय वौषट् ॥
" " " करतलकरपृष्ठाभ्यां अस्त्राय फट् ॥

घण्टाशूलहलानिशङ्खमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभां ॥
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥१॥
इति ध्यात्वा मानसोपचारैः संपूज्य उत्तम चरितं जपेत् ।
ऋषिरुवाच ॥ पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः ॥
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥१॥
तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ॥
कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥२॥
तावेव पवनर्द्धिं च चक्रतुर्वन्हिकर्म च ॥
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥३॥
हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ॥
महासुराभ्यां तां देवीं संस्मरन्त्यपराजितां ॥४॥
तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ॥
भवतां नाशयिष्यामि तत्क्षणात्परमापदः ॥५॥
इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ॥
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥६॥

देवा ऊचुः ॥ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥७॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमोनमः ॥
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥८॥
कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूर्म्यै नमोनमः ॥
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमोनमः ॥९॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥१०॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमोनमः ॥
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमोनमः ॥११॥

यादेवीसर्वभूतेषु	विष्णुमायेतिशब्दिता ॥	नमस्तस्यै	नमस्तस्यै	नमस्तस्यैनमोनमः	॥१२॥
,,	चेतनेत्यभिधीयते ॥	,,	,,	,,	॥१३॥
,,	बुद्धिरूपेण संस्थिता ॥	,,	,,	,,	॥१४॥
,,	निद्रारूपेण संस्थिता ॥	,,	,,	,,	॥१५॥
,,	क्षुधारूपेण संस्थिता ॥	,,	,,	,,	॥१६॥
,,	छायारूपेण संस्थिता ॥	,,	,,	,,	॥१७॥

यादेवीसर्वभूतेषु	शक्तिरूपेण संस्थिता ॥	नमस्तस्यै	नमस्तस्यै	नमस्तस्यैनमोनमः	॥१८॥
,,	तृष्णारूपेण संस्थिता ॥	,,	,,	,,	॥१९॥
,,	क्षान्तिरूपेण संस्थिता ॥	,,	,,	,,	॥२०॥
,,	जातिरूपेण संस्थिता ॥	,,	,,	,,	॥२१॥
,,	लज्जारूपेण संस्थिता ॥	,,	,,	,,	॥२२॥
,,	शान्तिरूपेण संस्थिता ॥	,,	,,	,,	॥२३॥
,,	श्रद्धारूपेण संस्थिता ॥	,,	,,	,,	॥२४॥
,,	कान्तिरूपेण संस्थिता ॥	,,	,,	,,	॥२५॥
,,	लक्ष्मीरूपेण संस्थिता ॥	,,	,,	,,	॥२६॥
,,	धृतिरूपेण संस्थिता ॥	,,	,,	,,	॥२७॥
,,	वृत्तिरूपेण संस्थिता ॥	,,	,,	,,	॥२८॥
,,	स्मृतिरूपेण संस्थिता ॥	,,	,,	,,	॥२९॥
,,	दयारूपेण संस्थिता ॥	,,	,,	,,	॥३०॥
,,	तुष्टिरूपेण संस्थिता ॥	,,	,,	,,	॥३१॥
,,	पुष्टिरूपेण संस्थिता ॥	,,	,,	,,	॥३२॥
,,	मातृरूपेण संस्थिता ॥	,,	,,	,,	॥३३॥
,,	भ्रान्तिरूपेण संस्थिता ॥	,,	,,	,,	॥३४॥

Scanned with OKEN Scanner

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥
भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमोनमः ॥३५॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥३६॥
स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेन्द्रेण दिनेषु सेविता ॥
करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः ॥३७॥
या साम्प्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते ॥
या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ॥३८॥
ऋषिरुवाच ॥ एवं स्तवादियुक्तानां देवानां तत्र पार्वती ॥
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥३९॥
साऽब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ॥
शरीरकोशतश्चास्याः समुद्भूताऽब्रवीच्छिवा ॥४०॥
स्तोत्रं ममैतत्क्रियते शुम्भदैत्यनिराकृतैः ॥
देवैः समस्तैः समरे निशुम्भेन पराजितैः ॥४१॥
शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ॥
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥४२॥

तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ॥
कालिकेति समाख्याता हिमाचलकृताश्रया ॥४३॥
ततोम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ॥
ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥४४॥
ताभ्यां शुम्भाय चाख्याता सातीव सुमनोहरा ॥
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ॥४५॥
नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ॥
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥४६॥
स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ॥
सा तु तिष्ठति दैत्येन्द्र तां भवान्द्रष्टुमर्हति ॥४७॥
यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ॥
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ॥४८॥
ऐरावतः समानीतो गजरत्नं पुरन्दरात् ॥
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥४९॥
विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे ॥
रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥५०॥

निधिरेष महापद्मः समानीतो धनेश्वरात् ॥
किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ॥५१॥
छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ॥
तथाऽयं स्यन्दनवरो यः पुरासीत्प्रजापतेः ॥५२॥
मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ॥
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥५३॥
निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ॥
वन्हिश्चापि ददौ तुभ्यमग्निशौचे च वाससी ॥५४॥
एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ॥
स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥५५॥
ऋषिरुवाच ॥ निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ॥
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् ॥५६॥
इति चेति च वक्तव्या सा गत्वा वचनान्मम ॥
यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु ॥५७॥
स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ॥
तां च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ॥५८॥

॥१८०॥

दूत उवाच ॥ देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ॥
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥५९॥
अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ॥
निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥६०॥
मम त्रैलोक्यमखिलं मम देवा वशानुगाः ॥
यज्ञभागानहं सर्वानुपाश्नामि पृथक्पृथक् ॥६१॥
त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥
तथैव गजरत्नं च हृतं देवेन्द्रवाहनम् ॥६२॥
क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ॥
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥६३॥
यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ॥
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥६४॥
स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ॥
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥६५॥
मां वा ममानुजं वापि निशुम्भमुरुविक्रमम् ॥
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥६६॥

परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ॥
एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥६७॥

ऋषिरुवाच ॥
इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ॥
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥६८॥

देव्युवाच ॥
सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितम् ॥
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥६९॥
किन्त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ॥
श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥७०॥
यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ॥
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥७१॥
तदागच्छतु शुम्भोऽत्र निशुम्भो वा महाबलः ॥
मां जित्वा किञ्चिरेणात्र पाणिं गृह्णातु मे लघु ॥ ॥७२॥

दूत उवाच ॥
अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ॥
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ॥७३॥
अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ॥
तिष्ठन्ति संमुखे देवि किं पुनः स्त्री त्वमेकिका ॥७४॥

Scanned with OKEN Scanner

इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ॥
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखे ॥७५॥
सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ॥
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥७६॥

देव्युवाच ॥ एवमेतद्बली शुम्भो निशुम्भश्चातिवीर्यवान् ॥
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥७७॥
स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ॥
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत् ॥७८॥

॥ श्री सप्तशती दुर्गापाठे देवी भगवती माहात्म्ये देवीदूतसंवादो नाम पंचमोध्यायः ॥५॥
॥ आदितो मंत्राः ४७६ ॥

॥ अथ श्री षष्ठोध्यायः ॥६॥

ऋषिरुवाच ॥ इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ॥
समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥१॥
तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ॥
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥२॥

हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ॥
तामानय बलाद् दुष्टां केशाकर्षणविह्वलाम् ॥३॥
तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठते परः ॥
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ॥४॥

ऋषिरुवाच ॥ तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ॥
वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥५॥
स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ॥
जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥६॥
नचेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ॥
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥७॥

देव्युवाच ॥ दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ॥
बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥८॥

ऋषिरुवाच ॥ इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ॥
हुङ्कारेणैव तं भस्मसाच्चकाराम्बिका ततः ॥९॥
अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ॥
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥१०॥

ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ॥
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥११॥
कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ॥
आक्रान्त्या चाधरेणान्यान्स जघान महासुरान् ॥१२॥
केषाञ्चित्पाटयामास नखैः कोष्ठानि केसरी ॥
तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥१३॥
विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ॥
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥१४॥
क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ॥
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥१५॥
श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ॥
बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः ॥१६॥
चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ॥
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥१७॥
हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ ॥
तत्र गच्छत गत्वा च सा समानीयतां लघु ॥१८॥

केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ॥
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥१९॥
तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ॥
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् ॥२०॥

॥ श्री सप्तशती दुर्गापाठे देवी भगवती माहात्म्ये धूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥६॥
॥ आदितो मंत्राः ४९६ ॥

॥ अथ श्री सप्तमोऽध्यायः ॥७॥

ऋषिरुवाच ॥ आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ॥
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥१॥
ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ॥
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥२॥
ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ॥
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥३॥
ततः कोपं चकारोच्चैरम्बिका तानरीन्प्रति ॥
कोपेन चास्या वदनं मसीवर्णमभूत्तदा ॥४॥

भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ॥
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥५॥
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥६॥
अतिविस्तारवदना जिह्वाललनभीषणा ॥
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥७॥
सा वेगेनाभिपतिता घातयन्ती महासुरान् ॥
सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥८॥
पार्ष्णिग्राहाङ्कुशग्राहयोधघण्टासमन्वितान् ॥
समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥९॥
तथैव योधं तुरगै रथं सारथिना सह ॥
निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम् ॥१०॥
एकं जग्राह केशेषु ग्रीवायामथ चापरम् ॥
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ॥११॥
तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ॥
मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥१२॥

॥१८७॥

बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ॥
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तदा ॥१३॥
असिना निहताः केचित् केचित्खट्वाङ्गताडिताः ॥
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥१४॥
क्षणेन तद्बलं सर्वमसुराणां निपातितम् ॥
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥१५॥
शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ॥
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥१६॥
तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ॥
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥१७॥
ततो जहासातिरुषा भीमं भैरवनादिनी
काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥१८॥
उत्थाय च महासिंहं देवी चण्डमधावत ॥
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥१९॥
अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ॥
तमप्यपातयद् भूमौ सा खड्गाभिहतं रुषा ॥२०॥

छिन्ने शिरसि दैत्येंद्रश्चक्रे नादं सुभैरवम् ॥
तेन नादेन महता त्रासितं भुवनत्रयम् ॥२१॥
हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ॥
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥२२॥
शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ॥
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ॥२३॥
मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ॥
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥२४॥

ऋषिरुवाच ॥ तावानीतौ ततो दृष्ट्वा चण्डमुंडौ महासुरौ ॥
उवाच कालीं कल्याणीं ललितं चण्डिका वचः ॥२५॥
यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ॥
चामुण्डेति ततो लोके ख्याता देवी भविष्यसि ॥२६॥

॥ श्री सप्तशती दुर्गापाठे देवी भगवती माहात्म्ये चंडमुंडवधो नाम सप्तमोऽध्यायः ॥७॥

॥ आदितो मंत्राः ५२२ ॥

॥ अथ श्री अष्टमोऽध्यायः ॥८॥

ऋषिरुवाच ॥ चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ॥
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥१॥
ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ॥
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥२॥
अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥
कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ॥३॥
कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ॥
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥४॥
कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ॥
युद्धाय सज्जा निर्यान्तु चाज्ञया त्वरिता मम ॥५॥
इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ॥
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥६॥
आयातं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ॥
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥७॥

ततः सिंहो महानादमतीव कृतवान्नृप ॥
घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत् ॥८॥
धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ॥
निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥९॥
तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ॥
देवी सिंहस्तथा काली शरोषैः परिवारिताः ॥१०॥
एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ॥
भवायामरसिंहानामतिवीर्यबलान्विताः ॥११॥
ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ॥
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥१२॥
यस्य देवस्य यद्रूपं यथा भूषणवाहनम् ॥
तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥१३॥
हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ॥
आयाता ब्रह्मणः शक्तिर्ब्रह्माणीत्यभिधीयते ॥१४॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥१५॥

॥१९१॥

कौमारी शक्तिहस्ता च मयूरवरवाहना ॥
योद्धुमभ्याययौ दैत्यानाम्बिका गुहरूपिणी ॥१६॥
तथैव वैष्णवी शक्तिर्गरुडोपरिसंस्थिता ॥
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताऽभ्युपाययौ ॥१७॥
जज्ञे नाराहमतुलं रूपं या बिभ्रतो हरेः ॥
शक्तिः साऽप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥१८॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥१९॥
वज्रहस्ता तथैवैन्द्री गजराजोपरिस्थिता ॥
प्राप्ता सहस्रनयना यथाशक्रस्तथैव सा ॥२०॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ॥
हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥२१॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभिषणा ॥
चण्डिका शक्तिरत्युग्रा शिवा शतनिनादिनी ॥२२॥
सा चाह धूम्रजटिलमीशानमपराजिता ॥
दूत त्वं गच्छ भगवन्पार्श्वं शुम्भनिशुम्भयोः ॥२३॥

ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ॥
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥२४॥
त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ॥
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥२५॥
बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः ॥
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥२६॥
यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ॥
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥२७॥
तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ॥
अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ॥२८॥
ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ॥
ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥२९॥
सा च तान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान् ॥
चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ॥३०॥
तस्याग्रतस्तथा काली शूलपातविदारितान् ॥
खट्वाङ्गपोथितांश्चारीन्कुर्वती व्यचरत्तदा ॥३१॥

कमण्डलुजलाक्षेपहतवीर्यान्हतोजसः ॥
ब्रह्माणी चाकरोच्छत्रून्येन येन स्म धावति ॥३२॥
माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ॥
दैत्याञ्जघान कौमारी तथा शक्त्याऽतिकोपना ॥३३॥
ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः ॥
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥३४॥
तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ॥
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥३५॥
नखैर्विदारितांश्चान्यान्भक्षयन्ती महासुरान् ॥
नारसिंही चचाराजौ नादापूर्णदिगम्बरा ॥३६॥
चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥३७॥
इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ॥
दृष्ट्वाऽभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥३८॥
पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ॥
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥३९॥

॥१९४॥

Scanned with OKEN Scanner

रक्तबिंदुर्यदा भूमौ पतत्यस्य शरीरतः ॥
समुत्पतति मेदिन्यास्तत्प्रमाणो महासुरः ॥४०॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ॥
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥४१॥
कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ॥
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥४२॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ॥
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥४३॥
ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ॥
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥४४॥
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥४५॥
वैष्णवी समरे चैनं चक्रेणाभिजघान ह ॥
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥४६॥
वैष्णवी चक्रभिन्नस्य रुधिरस्रावसंभवैः ॥
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥४७॥

शक्त्या जघान कौमारी वाराही च तथाऽसिना ॥
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥४८॥
स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् ॥
मातॄः कोपसमाविष्टो रक्तबीजो महासुरः ॥४९॥
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ॥
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥५०॥
तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत् ॥
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥५१॥
तान्विषण्णान्सुरान्दृष्ट्वा चण्डिका प्राह सत्वरम् ॥
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ॥५२॥
मच्छस्त्रपातसंभूतान्रक्तबिन्दून् महासुरान् ॥
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥५३॥
भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् ॥
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥५४॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ॥
ऋषिरुवाच ॥ इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥५५॥

मुखेन काली जगृहे रक्तबीजस्य शोणितम् ॥
ततोसावाजघानाथ गदया तत्र चण्डिकाम् ॥५६॥
न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ॥
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥५७॥
यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति ॥
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥५८॥
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ॥
देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥५९॥
जघान रक्तबीजं तं चामुण्डा पीतशोणितम् ॥
स पपात महीपृष्ठे शस्त्रसंघसमाहतः ॥६०॥
नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप
तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥६१॥

॥ श्री सप्तशती दुर्गापाठे देवी भगवती माहात्म्ये रक्तबीजवधो नाम अष्टमोध्यायः ॥८॥

॥ आदितो मंत्राः ५८३ ॥

॥ अथ श्री नवमोऽध्यायः ॥९॥

राजोवाच ॥ विचित्रमिदमाख्यातं भगवन्भवता मम ।
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम ॥१॥
भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ॥
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ॥२॥
ऋषिरुवाच ॥ चकार कोपमतुलं रक्तबीजे निपातिते ॥
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥३॥
हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ॥
अभ्यधावन्निशुम्भोऽथ मुख्ययाऽसुरसेनया ॥४॥
तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ॥
संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥५॥
आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ॥
निहन्तुं चण्डिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥६॥
ततो युद्धमतीवासीद्देव्याः शुम्भनिशुम्भयोः ॥
शरवर्षमतीवोग्रमेघयोरिव वर्षतोः ॥७॥

चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिकास्वशरोत्करैः ॥
ताडयामास चाङ्गेषु शस्त्रौघैरशुरेश्वरी ॥८॥
निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ॥
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥९॥
ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ॥
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥१०॥
छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ॥
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥११॥
कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ॥
आयातं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥१२॥
आविद्ध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति ॥
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥१३॥
ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ॥
आहत्य देवी बाणौघैरपातयत भूतले ॥१४॥
तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ॥
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् ॥१५॥

सरथस्थस्तथाऽत्युच्चैर्गृहीतपरमायुधैः ॥
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥१६॥
तमायान्तं समालोक्य देवी शङ्खमवादयत् ॥
ज्याशब्दं चापि धनुषश्चकारातीव दुस्सहम् ॥१७॥
पूरयामास ककुभो निजघण्टास्वनेन च ॥
समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥१८॥
ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥
पूरयामास गगनं गां तथैव दिशो दश ॥१९॥
ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ॥
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥२०॥
अट्टाट्टहासमशिवं शिवदूती चकार ह ॥
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥२१॥
दुरात्मंस्तिष्ठतिष्ठेति व्याजहाराम्बिका यदा ॥
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥२२॥
शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ॥
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥२३॥

॥२००॥

सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ॥
निर्घातनिःस्वनो घोरो जितवानवनीपते ॥
शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् ॥
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥२४॥
ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ॥
स तदाभिहतो भूमौ मूर्छितो निपपातह ॥
ततो निशुम्भः संप्राप्य चेतनामात्तकार्मुकः ॥
आजघान शरैर्देवीं कालीं केसरिणं तथा ॥२५॥
पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ॥
चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ॥२६॥
ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥२७॥
ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् ॥
अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥२८॥
तस्यापतत एवाशु गदां चिच्छेद चण्डिका ॥
खड्गेन शितधारेण स च शूलं समाददे ॥

शूलहस्तं समायान्तं निशुम्भममरार्दनम् ॥
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥२९॥

भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ॥
महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ॥
शिरश्चिच्छेद खड्गेन ततोऽसावपतद् भुवि ॥३०॥

ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ॥
असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥३१॥

कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ॥
ब्रह्माणी मन्त्रपूतेन तोयेनान्ये निराकृताः ॥३२॥

माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ॥
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥
खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ॥३३॥

वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ॥

केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ॥
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥३७॥

॥ श्री सप्तशती दुर्गापाठे देवी भगवती माहात्म्ये निशुंभवधो नाम नवमोऽध्यायः ॥९॥

॥ आदितो मंत्राः ५१७ ॥

॥ अथ श्री दशमोऽध्यायः ॥१०॥

ऋषिरुवाच ॥ निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसंमितम् ॥
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥१॥
शुम्भ उवाच ॥ बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह ॥
अन्यासां बलमाश्रित्य युध्यसे याऽतिमानिनी ॥२॥
देव्युवाच ॥ एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥३॥
ऋषिरुवाच ॥ ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ॥
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥४॥
देव्युवाच ॥ अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ॥
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥५॥

ऋषिरुवाच ॥ ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ॥
पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥
शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥५॥
तयोर्युद्धमभूद् भूयः सर्वलोकभयङ्करम् ॥
दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ॥
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥६॥
मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ॥
बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः ॥
ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ॥७॥
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥
छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ॥
चिच्छेद देवीचक्रेण तामप्यस्य करे स्थिताम् ॥८॥
ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ॥
अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥
तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ॥९॥
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥

अश्वांश्च पातयामास रथं सारथिना सह ॥
हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ॥
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः
चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥ ॥१०॥
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्
स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ॥
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥११॥
तलप्रहाराभिहतो निपपात महीतले ॥
स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥
उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥१२॥
तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥
नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ॥
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् ॥१३॥
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ॥
उत्पाट्य भ्रामयामास चिक्षेप धरणीतले ॥१४॥
स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगवान् ॥

॥२०५॥

अभ्यधवत दुष्टात्मा चण्डिकानिधनेच्छया
समायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ॥
जगत्यां पातयामास भित्वा शूलेन वक्षसि ॥१५॥
स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ॥
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम्
ततः प्रसन्नमखिलं हते तस्मिन्दुरात्मनि ॥
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥१६॥
उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ॥
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते
ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ॥
बभूवुर्निहते तस्मिन्गन्धर्वा ललितं जगुः ॥१७॥
अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥
जज्वलुश्चाग्नयश्शान्ता शान्तदिग्जनितस्वनाः ॥१८॥

॥ श्री सप्तशती दुर्गापाठे देवी भगवती माहात्म्ये शुंभवधो नाम दशमोध्यायः ॥१०॥

॥ आदितो मंत्राः ६३५ ॥

॥ अथ श्री एकादशोध्यायः ॥११॥

देव्या हते तत्र महासुरेन्द्रे सेन्द्राः सुरा वन्हिपुरोगमास्ताम् ॥
कात्यायनीं तुष्टुवुरिष्टलाभाद्विकासिवक्त्राब्जविकासिताशाः ॥१॥
देवा ऊचुः देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ॥
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥२॥
आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि ॥
अपांस्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥३॥
त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया ॥
संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥४॥
विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ॥
त्वयैकया पूरितमम्बयैतत्का ते स्तुतिः स्तव्यपरापरोक्तिः ॥५॥
सर्वभूता यदा देवि भुक्तिमुक्तिप्रदायिनि ॥
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥६॥
सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ॥
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तुते ॥७॥

कलाकाष्ठादिरूपेण परिणामप्रदायिनि ॥
विश्वस्योपरतौ शक्ते नारायणि नमोस्तुते ॥८॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥९॥
सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ॥
गुणाश्रये गुणमये नारायणि नमोऽस्तुते ॥१०॥
शरणागतदीनार्तपरित्राणपरायणे ॥
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तुते ॥११॥
हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥
कौशाम्भःक्षरिके देवि नारायणि नमोस्तुते ॥१२॥
त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ॥
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तुते ॥१३॥
मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ॥
कौमारीरूपसंस्थाने नारायणि नमोस्तुते ॥१४॥
शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तुते ॥१५॥

गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे ॥
वराहरूपिणि शिवे नारायणि नमोऽस्तुते ॥१६॥
नृसिंहरूपेणोग्रेण हन्तुं दैत्यान्कृतोद्यमे ॥
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तुते ॥१७॥
किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ॥
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तुते ॥१८॥
शिवदूतीस्वरूपेण हतदैत्यमहाबले ॥
घोररूपे महारावे नारायणि नमोस्तुते ॥१९॥
दंष्ट्राकरालवदने शिरोमालाविभूषणे ॥
चामुण्डे मुण्डमथने नारायणि नमोऽस्तुते ॥२०॥
लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ॥
महारात्रि महामाये नारायणि नमोस्तुते ॥२१॥
मेधे सरस्वति वरे भूति बाभ्रवि तामसि ॥
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तुते ॥२२॥
सर्वतः पाणिपादांते सर्वतोक्षिशिरोमुखे ॥
सर्वतः श्रवणघ्राणे नारायणि नमोऽस्तुते ॥२३॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥२४॥
एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥२५॥
ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥२६॥
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥२७॥
असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ॥
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥२८॥
रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् ॥
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥२९॥
एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ॥
रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वाम्बिके तत्प्रकरोति कान्या ॥३०॥
विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ॥
ममत्वगर्तेऽतिमहान्धकारे विभ्रामयत्येतदतीव विश्वम् ॥३१॥

॥२१०॥

रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ॥
दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥३२॥
विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् ॥
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥३३॥
देवि प्रसाद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः ॥
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥३४॥
प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥३५॥
देव्युवाच ॥ वरदाऽहं सुरगणा वरं यं मनसेच्छथ ॥
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥३६॥
देवा उचुः ॥ सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥३७॥
देव्युवाच ॥ वैवस्वतेऽन्तरे प्राप्ते चाष्टाविंशतिमे युगे ॥
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ
नन्दगोपगृहे जाता यशोदागर्भसंभवा ॥
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥३८॥

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥
अवतीर्य हनिष्यामि वैप्रचित्तांश्च दानवान्
भक्षयन्त्याश्च तानुग्रान्वैप्रचित्तान्महासुरान् ॥
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥३९॥
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ॥
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥४०॥
भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ॥
मुनिभिः संस्मृता भूमौ सम्भविष्याम्ययोनिजा ॥
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन्
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥४१॥
ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ॥
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ॥४२॥
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्
दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति ॥
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥४३॥

॥२१२॥

Scanned with OKEN Scanner

रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ॥
दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥३१॥
विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् ॥
विश्वेशवन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥३३॥
देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः ॥
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥३४॥
प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥ ॥३५॥
देव्युवाच ॥ वरदाऽहं सुरगणा वरं यं मनसेच्छथ ॥
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥३६॥
देवा ऊचुः ॥ सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥३७॥
देव्युवाच ॥ वैवस्वतेऽन्तरे प्राप्ते चाष्टाविंशतिमे युगे ॥
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ
नन्दगोपगृहे जाता यशोदागर्भसंभवा ॥
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥३८॥

॥२११॥

Scanned with OKEN Scanner

रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ॥
तदा मां मुनयः सर्वे स्तोष्यंत्यानम्रमूर्तयः
भीमा देवीति विख्यातं तन्मे नाम भविष्यति ॥ ॥४५॥
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति
तदाऽहं भ्रामरं रूपं कृत्वासङ्ख्येयषट्पदम् ॥
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम्
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ॥४६॥
इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥
तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम् ॥४७॥

॥ श्री सप्तशती दुर्गापाठे देवी भगवती माहात्म्ये भगवतीस्तुतिर्नाम एकादशोऽध्यायः ॥११॥

॥ आदितो मंत्राः ६८२ ॥

॥ अथ श्री द्वादशोऽध्यायः ॥१२॥

देव्युवाच ॥ एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ॥
तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥

मधुकैटभनाशं च महिषासुरघातनम् ॥
कीर्तयिष्यन्ति ये तद्वद्वधं शुम्भनिशुम्भयोः ॥१॥
अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ॥
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥
न तेषां दुष्कृतं किञ्चिद् दुष्कृतोत्था न चापदः ॥२॥
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥
शत्रुतो न भयं तस्य दस्युतो वा न राजतः
न शस्त्रानलतो यौघात्कदाचित्सम्भविष्यति ॥३॥
तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ॥४॥
उपसर्गानशेषांस्तु महामारीसमुद्भवान् ॥
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥
यत्रैतत्पठ्यते सम्यङ् नित्यमायतने मम ॥
सदा न तद्विमोक्ष्यामि सांनिध्यं तत्र मे स्थितम् ॥५॥
बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ॥
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥६॥

जानताऽजानतावापि बलिपूजां तथा कृताम् ॥
प्रतीक्षिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम् ॥
शरत्काले महापूजा क्रियते या च वार्षिकी ॥
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥७॥
सर्वाबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ॥
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥८॥
श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ॥
पराक्रमं च युद्धेषु जायते निर्भयः पुमान्
रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते ॥
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥९॥
शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ॥
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥
उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः ॥१०॥
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥
बालग्रहाभिभूतानां बालानां शान्तिकारकम् ॥
सङ्घातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥११॥

दुर्वृत्तानामशेषाणां बलहानिकरं परम् ॥
रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥१२॥
सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् ॥
पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः ॥
विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ॥
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥१३॥
प्रीतिर्मे क्रियते सास्मिन्सकृदुच्चरिते श्रुते ॥
श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥
रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ॥ ॥१४॥
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम्
तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते ॥ ॥१५॥
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥
ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम् ॥
अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः ॥
दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ॥
सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥१६॥

राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा ॥
आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥
पतत्सु चापि शस्त्रेषु सङ्ग्रामे भृशदारुणे
सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥ ॥१७॥
स्मरन्ममैतच्चरितं नरो मुच्येत सङ्कटात् ॥
मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा
दूरादेव पलायन्ते स्मरतश्चरितं मम ॥१८॥
ऋषिरुवाच ॥ इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ॥
पश्यतामेव देवानां तत्रैवान्तरधीयत ॥१९॥
तेऽपि देवा निरातङ्काः स्वाधिकारान्यथा पुरा ॥
यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ॥
दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ॥
जगद्विध्वंसके तस्मिन्महोग्रेऽतुलविक्रमे ॥
निशुम्भे च महावीर्ये शेषाः पातालमाययुः ॥२०॥
एवं भगवती देवी सा नित्यापि पुनः पुनः ॥
सम्भूय कुरुते भूप जगतः परिपालनम् ॥

तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ॥
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥२१॥
व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ॥
महाकाल्या महाकालीमहामारीस्वरूपया ॥२२॥
सैव काले महामारी सैव सृष्टिर्भवत्यजा ॥
स्थितिं करोति भूतानां सैव काले सनातनी ॥
भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥
सैवाभावे तथाऽलक्ष्मीर्विनाशायोपजायते ॥२३॥
स्तुता संपूजिता पुष्पैर्धूपगन्धादिभिस्तथा ॥
ददाति वित्तं पुत्रांश्च मतिं धर्मं गतिं शुभाम् ॥२४॥

॥ श्री सप्तशती दुर्गापाठे देवी भगवती माहात्म्ये भगवत्याज्ञानाम द्वादशोध्यायः ॥१२॥

॥ आदितो मंत्राः ७०६ ॥

॥ अथ श्री त्रयोदशोध्यायः ॥१३॥

ऋषिरुवाच ॥ एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ॥
एवं प्रभावा सा देवी ययेदं धार्यते जगत् ॥

विद्या तथैव क्रियते भगवद्विष्णुमायया ॥
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥१॥
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे ॥
तामुपैहि महाराज शरणं परमेश्वरीम् ॥
आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥२॥

मार्कण्डेय उवाच इति तस्य वचः श्रुत्वा सुरथः स नराधिपः
प्रणिपत्य महाभागं तमृषिं शंसितव्रतम् ॥
निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ॥३॥
जगाम सद्यस्तपसे स च वैश्यो महामुने ॥
संदर्शनार्थमम्बाया नदीपुलिनसंस्थितः ॥
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ ॥४॥
तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥
अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥
निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥
ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥५॥
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥

॥२१९॥

परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥६॥

देव्युवाच ॥ यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ॥
मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि ते ॥७॥

मार्कण्डेय उवाच ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥
अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥
सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥८॥

देव्युवाच ॥ स्वल्पैरहोभिर्नृप ते स्वं राज्यं प्राप्स्यते भवान् ॥
हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥
मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः
सावर्णिको मनुर्नाम भवान्भुवि भविष्यति ॥९॥
वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः ॥
तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥१०॥

मार्कण्डेय उवाच इति दत्त्वा तयोर्देवी यथाभिलषितं वरम् ॥
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥ ॥११॥
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥

सूर्याज्जन्म समासाद्य सावर्णिर्भविता ॥ मनुः सावर्णिर्भविता मनुः ॥ ॥१३॥

॥ श्री मार्कण्डेय दुर्गापाठे देवी भगवती माहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोऽध्यायः ॥१३ ॥ आदितो मंत्राः ७१८ ॥

अद्याद्य० तिथौ मम आत्मनः सकुटुंबिनः श्रुतिस्मृति पुराणोक्त पुण्यफला वाप्त्यर्थं आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं धनकनकेप्सितकामनासिद्ध्यर्थं श्री दुर्गा सप्तशती षोडशांगपाठा सावर्णिः सूर्यतनय इत्यारभ्य सावर्णिर्भवितामनुरित्यंतो मया कृतः तदंगत्वेन उत्तरन्यासान् देवीसूक्तं रहस्यत्रयं च जपिष्ये तेन पुण्येन श्री भगवती महाकाली महालक्ष्मी महासरस्वती देवताः प्रीयन्तां ॥

अथोत्तरन्यासाः ॥ ॐखड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥ हृदयाय नमः ॥ ॐशूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ शिरसे स्वाहा ॥ ॐप्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य चोत्तरस्यां तथेश्वरि ॥ शिखायै वषट् ॥ ॐसौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ॥ यानि चात्यर्थघोराणि ते रक्षास्मांस्तथा भुवम् ॥ कवचायहुं ॥ ॐखड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥ करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः ॥ नेत्रत्रयाय वौषट् ॥ ॐसर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमो-

॥२२१॥

ऽस्तुते ॥ अस्त्राय फट् ॥ अथ ध्यानम् । विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्रधरालिखेटवि-शिखांश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥१॥

॥ अथ तत्रादौ यजुर्वेदोक्तं देवीसूक्तम् ॥

ॐ देवीरापः शुद्धा॑वोढ्व ०‿० सुपरिविष्टादेवेषु सुपरिविष्टावयम्परि-
वेष्टारोभूयास्म ॥६–१३–॥१॥

ॐ देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः ॥
तन्देवेभ्योदेवत्रादत्तशुक्रपेभ्योयेषाम्भागस्थस्वाहा ॥६–२७–॥२॥

ॐ देवीरापऽएषवोगर्भस्त्त ०‿० सुप्रीत ०‿० सुभृतम्बिभृत ॥
देवसोमैषतेलोकस्तस्मिञ्छञ्चवक्ष्वपरिचवक्ष्व ॥८–२६–॥३॥

ॐ देवीर्द्वारोऽअश्विनाभिषजेन्द्रेसरस्वती ॥
प्राणन्नवीर्य्यन्नसिद्द्वारोदधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ॥२१–४३–॥४॥

ॐ देवीऽउषासावश्विनासुत्रामेन्द्रेसरस्वती ॥ बलन्न
वाचमास्यऽउषाभ्यान्दधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ॥२१–५०–॥५॥

ॐ देवीजोष्ट्रीसरस्वत्यश्विनेन्द्रमवर्द्धयन् ॥ श्रोत्रन्न-
कर्णयोर्य्यशोजोष्ट्रीभ्यान्दधुरिन्द्रियंवसुवनेवसुधेयस्यव्यन्तुयज ॥२१–५१–॥६॥

ॐ देवीऽऊर्जाहुतीदुघेसुदुघेन्द्रेसरस्वत्यश्विनाभिषजावतः ॥ शुक्रन्न
ज्ज्योतिस्स्तनयोराहुतीधत्तऽइन्द्रियंवसुवनेव्वसुधेयस्यव्व्यन्तुयज ॥२१—५२—॥७॥

ॐ देवीस्तिस्रस्तिस्रादेवीरश्विनेडासरस्वती ॥ शूषन्न
मद्ध्येनाभ्यामिन्द्रायदधुरिन्द्रियंव्वसुवनेव्वसुधेयस्यव्व्यन्तुयज ॥२१—५४—॥८॥

ॐ देवीर्द्वारऽइन्द्र ० ० सातेव्वीड्वीर्यामन्नवर्द्धयन् ॥ आवत्सेनतरुणेनकुमारेण
चमीवतापार्व्वाण ० ० रेणुककाटन्नुदन्तांव्वसुवनेव्वसुधेयस्यव्व्यन्तुयज॥२८·१३—॥९॥

ॐ देवीऽउपासानक्तेन्द्रंय्यज्ञेप्रय·त्यह्वेताम् ॥ दैवीर्विशःप्रायासिष्टा ० ० सुप्रीते
सुधितेव्वसुव्वनेव्वसुधेयस्यव्वीतांय्यज ॥२८—१४—॥१०॥

ॐ देवीजोष्ट्रीवसुधितीदेवमिन्द्रमवर्द्धताम ॥ अयाव्व्यन्न्याघाद्वेषा ० ० स्यान्न्या-
व्वक्षद्वसु वार्य्याणियजमानायशिक्षिते वसुवने वसुधेयस्य वीतांय्यज ॥२८—१५—॥११॥

ॐ देवीऽऊर्जाहुतीदुघेसुदुघेपयसेन्द्रमवर्द्धताम् ॥ इषमूर्ज्जमन्न्या वक्ष·त्सग्धिं
० ० सपीतिमन्न्यानवेनपूर्व्वन्दयमानेपुराणेननवमधातामूर्ज्जमूर्जाहुतीऽऊर्ज्जयमा-
ने वसु वार्य्याणियजमानायशिक्षिते वसुवने वसुधेयस्य वीतांय्यज ॥२८—१६—॥१२॥

ॐ देवीस्तिस्रस्तिस्रोदेवीःपतिमिन्द्रमवर्द्धयन् ॥ अस्पृक्षद्भारतीदिव ० ० रुद्रै-
र्य्यज्ञ ० ० सरस्वतीडा वसुमतीगृहान्व्वसुवने वसुधेयस्य व्यन्तुयज ॥२८—१८—॥१३॥

ॐ देवीर्द्वारो वयोधस ँ शुचिमिन्द्रमवर्द्धयन् ॥ उष्णिहाच्छन्दसेन्द्रिय
म्प्राणमिन्द्रे वयोदधद्वसुवने वसुधेयस्य व्यन्तुयज ॥२८–३६–॥१४॥

ॐ देवीऽउषासानक्ता देवमिन्द्रं वयोधसन्देवीदेवमवर्द्धताम् ॥ अनुष्टुभाच्छन्दसे-
न्द्रियम्बलमिन्द्रे वयोदधद्वसुवने वसुधेयस्य वीतांयज ॥२८–३७–॥१५॥

ॐ देवीजोष्ट्री वसुधितीदेवमिन्द्रं वयोधसन्देवीदेवमवर्द्धताम् ॥ बृहत्याच्छन्दसे-
न्द्रिय ँ श्रोत्रमिन्द्रे वयोदधद्वसुवने वसुधेयस्य वीतांयज ॥२८–३८–॥१६॥

ॐ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसेन्द्रं वयोधसन्देवीदेवमवर्द्धताम् ॥ पङ्क्त्याच्छ-
न्दसेन्द्रिय ँ शुक्रमिन्द्रे वयोदधद्वसुवने वसुधेयस्य वीतांयज ॥२८–३९–॥१७॥

ॐ देवीस्तिस्रस्तिस्रोदेवी र्वयोधसम्पतिमिन्द्रमवर्द्धयन् ॥ जगत्याच्छन्दसेन्द्रिय-
ँ शूषमिन्द्रे वयोदधद्वसुवने वसुधेयस्य व्यन्तुयज ॥२८–४१–॥१८॥

ॐ देवीद्यावापृथिवीमखस्यवामद्यशिरोराद्ध्यासन्देव यजनेपृथिव्याः ॥ मखाय
त्वामखस्य त्वाशीर्ष्णे ॥३७–३–॥१९॥

ॐ देव्यो वम्म्यो भूतस्यप्रथमजामखस्यवोद्यशिरोराद्ध्यासन्देवयजनेपृथिव्याः ॥
मखाय त्वामखस्य त्वाशीर्ष्णे ॥३७–४–॥२०॥

॥ अथ तन्त्रोक्तं देवीसूक्तम् ॥

नमोदेव्यैमहादेव्यैशिवायैसततंनमः ॥ नमःप्रकृत्यैभद्रायैनियताःप्रणताः स्म ताम् ॥१॥
रौद्रायैनमोनित्यायैगौर्यैधात्र्यैनमोनमः ॥ ज्योत्स्नायैचेन्दुरूपिण्यैसुखायैसततंनमः ॥२॥
कल्याण्यैप्रणतांवृद्ध्यैसिद्ध्यैकूर्म्यैनमोनमः ॥ नैर्ऋत्यैभूभृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः ॥३॥
दुर्गायैदुर्गपारायैसारायैसर्वकारिण्यै ॥ ख्यात्यैतथैवकृष्णायैधूम्रायैसततंनमः ॥४॥
अतिसौम्यातिरौद्रायैनतास्तस्यैनमोनमः ॥ नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः ॥५॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः ॥६॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥ ,, ,, ॥७॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥ ,, ,, ॥८॥
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ॥ ,, ,, ॥९॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥ ,, ,, ॥१०॥
या देवी सर्वभूतेषु छायारूपेण संस्थिता ॥ ,, ,, ॥११॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥ ,, ,, ॥१२॥
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥ ,, ,, ॥१३॥
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ॥ ,, ,, ॥१४॥

॥२२५॥

Scanned with OKEN Scanner

या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः॥१५॥				
,,	लज्जारूपेण संस्थिता ॥	,,	,,	॥१६॥
,,	शान्तिरूपेण संस्थिता ॥	,,	,,	॥१७॥
,,	श्रद्धारूपेण संस्थिता ॥	,,	,,	॥१८॥
,,	कान्तिरूपेण संस्थिता ॥	,,	,,	॥१९॥
,,	लक्ष्मीरूपेण संस्थिता ॥	,,	,,	॥२०॥
,,	धृतिरूपेण संस्थिता ॥	,,	,,	॥२१॥
,,	वृत्तिरूपेण संस्थिता ॥	,,	,,	॥२२॥
,,	स्मृतिरूपेण संस्थिता ॥	,,	,,	॥२३॥
,,	दयारूपेण संस्थिता ॥	,,	,,	॥२४॥
,,	तुष्टिरूपेण संस्थिता ॥	,,	,,	॥२५॥
,,	पुष्टिरूपेण संस्थिता ॥	,,	,,	॥२६॥
,,	मातृरूपेण संस्थिता ॥	,,	,,	॥२७॥
,,	भ्रान्तिरूपेण संस्थिता ॥	,,	,,	॥२८॥

इन्द्रियाणामधिष्ठात्रीभूतानांचाखिलेषुया ॥ भूतेषुसततंतस्यैव्याप्त्यैदेव्यैनमोनमः ॥२९॥
चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थिता जगत् ॥ नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ३०

॥२२६॥

स्तुतासुरैः पूर्वमभिष्टसंश्रया तथा सुरेन्द्रेण दिनेषु सेविता ॥
करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः ॥३१॥
या साम्प्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते ॥
या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्त्तिभिः ॥३२॥

देवीसूक्तंपठित्वाऽष्टोत्तरशतं नवार्णमन्त्रजपं कृत्वा ततो नवार्णन्यासाः। मालांपूजयेत्ततउत्कीलनम् ॥१॥ ॐश्रींक्लींह्रींचण्डिकादेव्यै सप्तशतीचण्डगुत्कीलनंकुरुकुरुस्वाहा ॥ इति एकविंशतिधा जपेत् ॥२१॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ ॐ अस्यश्रीसप्तशतीरहस्यत्रयस्य नारायण ऋषिः ॥ अनुष्टुप्छन्दः ॥ महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥ यथोक्तफलावाप्त्यर्थंजपे विनियोगः ॐ अस्य श्री प्राधानिकरहस्यस्य ब्रह्मा ऋषिः। गायत्री छन्दः। महाकाली देवता । ऐं नन्दजा शक्तिः । ह्रांरक्तदंतीका बीजं । रंअग्निस्तत्त्वं । श्रीमहाकालीप्रीत्यर्थेप्राधानिकरहस्यजपे विनियोगः ॥

राजोवाच ॥

भगवन्नवतारा मेचण्डिकायास्त्वयोदिताः॥ एतेषां प्रकृतिं ब्रह्मन्प्रधानंवक्तुमर्हसि ॥१॥
आराध्यं यन्मया देव्याः स्वरूपंनेवतद्द्विज। विधिना ब्रूहि सकलं यथावत्प्रणतस्य मे ॥२॥

ऋषिरुवाच ॥
इदं रहस्यं परममनाख्येयं प्रचक्षते । भक्तोऽसीति नमे किञ्चित्तवावाच्यंनराधिप ॥३॥
सर्वस्याद्या महालक्ष्मीस्त्रिगुणा सकलेश्वरी । लक्ष्यालक्ष्यस्वरूपा साव्याप्यकृत्स्नंव्यवस्थिता ।४॥
मातुलिङ्गं गदां खेटं पानपात्रं च बिभ्रती ॥ नागं लिङ्गं च योनिं च बिभ्रतीमैवमूर्धनि ॥५॥
तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा ॥ शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥६॥
शून्यं तदखीलं लोकं विलोक्य परमेश्वरी ॥ बभार रूपमपरं तमसा केवलेनहि ॥७॥
सा भिन्नाञ्जनसङ्काशा दंष्ट्रांकितवरानना ॥विशाललोचना नारी बभूव तनुमध्यमा ॥८॥
खड्गपात्रशिरःखेटैरलङ्कृतचतुर्भुजा ॥ कबंधहारं शिरसा बिभ्राणा हि शिरःस्त्रजम् ॥९॥
सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा ॥ नामकर्म च मे मातर्देहि तुभ्यं नमोनमः ॥१०॥
तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम् ॥ददामि तव नामानि यानि कर्माणितानिते॥११॥
महामाया महाकाली महामारी क्षुधा तृषा ॥ निद्रा तृष्णाचैकवीरा कालरात्रिर्दुरत्यया ॥१२॥
इमानि तव नामानि प्रतिपाद्यानि कर्मभिः॥एभिःकर्माणिते ज्ञात्वायोऽधीतेसोऽश्नुतेसुखम्१३
तामित्युक्त्वा महालक्ष्मीः स्वरूपंपरमं नृप ॥ सत्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ ॥१४॥
अक्षमालाङ्कुशधरावीणा पुस्तकधारिणी ॥ सा बभूव वरा नारी नामान्यस्यै च सा ददौ ॥१५॥
महाविद्या महावाणी भारती वाक् सरस्वती ॥ आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी ॥१६॥
अथोवाच महालक्ष्मी र्महाकालीं सरस्वतीं ॥ युवां जनयतां देव्यौमिथुने स्वानुरूपतः ॥१७॥

इत्युक्त्वा सा महालक्ष्मीः ससर्ज मिथुनं स्वयम् ॥ हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥१८॥
ब्रह्मन्विधे विरिञ्चेति धातरित्याह तं नरम् ॥ श्रीः पद्मे कमले लक्ष्मीत्याह माता स्त्रियं च ताम् ॥१९॥
महाकाली भारती च मिथुने सृजतः स्वयं॥ एतयोरपि रूपाणि नामानि च वदामि ते ॥२०॥
नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम ॥ जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥२१॥
स रुद्रः शङ्करः स्थाणुः कपर्दी च त्रिलोचनः ॥ त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा ॥२२॥
सरस्वतीं स्त्रियं गौरीं कृष्णं च पुरुषं नृप ॥ जनयामास नामानि तयोरपि वदामि ते ॥२३॥
विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः। उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा ॥२४॥
एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे। चक्षुष्मन्तोऽनुपश्यन्ति नेतरे तद्विदो जनाः ॥२५॥
ब्रह्मणे प्रददौ पत्नीं सावित्रीं नृपसत्तम। रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥२६॥
स्वरया सह संभूय विरञ्चोऽण्डमजीजनत्। बिभेद भगवान्रुद्रस्तद्गौर्या सह वीर्यवान् ॥२७॥
अण्डमध्ये प्रधानादि कार्यजातमभून्नृप। महाभूतात्मकं सर्वं जगत्स्थावरजंगमम् ॥२८॥
पुपोष पालयामास तल्लक्ष्म्या सह केशवः। संजहार जगत्सर्वं सह गौर्या महेश्वरः ॥२९॥
महालक्ष्मीर्महाराज सर्वसत्त्वमयीश्वरी। निराकारा च साकारा सैव नानाभिधानभृत् ॥३०॥
नामान्तरैर्निरूप्यैषा नाम्ना नान्येन कस्यचित् ॥३१॥

इतिश्री मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये प्राधानिकं नाम रहस्यं

ॐ अस्य श्रीवैकृतिकरहस्यस्य विष्णुर्ऋषिः। अनुष्टुप्छन्दः। महालक्ष्मीर्देवता। ह्रं सें दुर्गा बीजं। ह्रीं शाकम्भरी शक्तिः। हं वायुस्तत्त्वं। श्रीमहालक्ष्मीप्रीत्यर्थं वैकृतिकरहस्यजपे विनियोगः ॥

ऋषिरुवाच ॥

त्रिगुणा तामसी देवीसात्त्विकी या त्रिधोदिता। सा शिवा चण्डिका दुर्गाभद्राभगवतीपरा॥१॥
योगनिद्रा हरेरुक्ता महाकाली तमोगुणा। मधुकैटभनाशार्थं यां तुष्टावाम्बुजासनः ॥२॥
दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा। विशालया राजमाना त्रिंशल्लोचनमालया ॥३॥
स्फुरद्दशनदंष्ट्राभा भीमरूपापिभूमिप। रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम् ॥४॥
खड्गबाणगदाशूल शङ्खचक्र भुशुण्डिभृत्। परिघं कार्मुकं शीर्षं निश्चोतद् रुधिरं दधौ ॥५॥
एषासावैष्णवीमाया महाकाली दुरत्यया। आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम् ॥६॥
सर्वदेवशरीरेभ्यो याऽऽविर्भूतामितप्रभा। त्रिगुणासा महालक्ष्मीःसाक्षान्महिषमर्दिनी ॥७॥
श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला। रक्तमध्या रक्तपादा नीलजङ्घोरुमूर्धजा ॥८॥
सुचित्रजघना चित्रमाल्यांबरविभूषणा। चित्रानुलेपनाकान्तीरूपसौभाग्यशालिनी ॥९॥
अष्टादशभुजा पूज्या सा सहस्रभुजासती। आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात् ॥१०॥
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा। चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः॥११॥
शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः। अलङ्कृतभुजामेभिरायुधैः कमलासनाम् ॥१२॥

सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप । पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत ॥१३॥
गौरीदेहात्समुद्भूता यासत्त्वैकगुणाश्रया । साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिवर्हणी ॥१४॥
दधौ चाष्टभुजा बाणान्मुशलं शूलचक्रभृत् । शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ॥१५॥
एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति । निशुम्भमथिनी देवी शुम्भासुरनिबर्हणि ॥१६॥
इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव । उपासनं जगन्मातुः पृथगासां निशामय: ॥१७॥
महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती । दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् ॥१८॥
विरञ्चिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे । वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम ॥१९॥
अष्टादशभुजा मध्ये वामे चास्या दशानना । दक्षिणेऽष्टभुजा वाणी ब्रह्माण्याद्या यथाक्रमम ॥२०॥
पूर्वादिदलतः पूज्या असिताङ्गाष्टभैरवाः । अष्टादशभुजा चैषा यदा पूज्या नराधिप ॥२१॥
दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा । दशानना यदा पूज्या दक्षिणोत्तरयोस्तदा ॥२२॥
कालमृत्यू च संपूज्यौ सर्वानिष्टप्रशांतये । यदा चाष्टभुजा पूज्या शुम्भासुरनिबर्हणी ॥२३॥
नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ । नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत २४
अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः । अष्टादशभुजा चैषा पूज्या महिषमर्दिनी ॥२५॥
महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती । ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥२६॥
महिषान्तकरी येन पूजिता स जगत्प्रभुः । लिखित्वाष्टदलं पद्मं चंदनागुरुकुंकुमैः ॥२७॥
षट्कोणं चक्रं तन्मध्ये देवीं तन्मध्यतो यजेत् । पूजयेज्जगतां धात्री चण्डिकां भक्तवत्सलाम २८

अर्घ्यादिभिरलङ्कारैर्गन्धपुष्पैस्तथाऽक्षतैः। धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥२९॥
रुधिराक्तेन बलिना मांसेन सुरया नृप। प्रणामाचमनीयेन चन्दनेन सुगन्धिना ॥३०॥
सकर्पूरैश्च ताम्बूलैर्भक्तिभावसमन्वितैः। वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ॥३१॥
पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया। दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥३२॥
वाहनं पूजयेद्देव्या धृतं येन चराचरम्। ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः ॥३३॥
एकेन वा मध्यमेन नैकेनेतरयोरिह। श्लोकार्धं श्लोकपादं वा श्लोकं वा राजसत्तम ॥
चरितार्धं तु न जपेज्जपन्छिद्रमवाप्नुयात ॥३४॥
स्तोत्रमन्त्रैः स्तुवीतेमां यदि वा जगदम्बिकाम्। प्रदक्षिणानमस्कारं कृत्वा मूर्ध्नि कृताञ्जलिम् ३५
क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः। प्रतिश्लोकं च जुहुयात्पायसं मधुसर्पिषा ॥३६॥
जुहुयात्स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः॥ नमोनमः पदैर्देवीं पूजयेत्सुसमाहितः ॥३७॥
प्रयतः प्राञ्जलिः प्रह्वः प्राणानारोप्य चात्मनि। सुचिरं भावयेद्देवीं चण्डिकां तन्मयो भवेत ३८
एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम। भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुयात् ३९
यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम्। भस्मीकृत्यास्य पुण्यानि निर्दहेत्परमेश्वरी ॥४०॥
तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीम। यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि ॥४१॥

इतिश्री मार्कंडेय पुराणे देवी माहात्म्ये वैकृतिकं नाम रहस्यं

ॐ अस्यश्रीमूर्तिरहस्यस्य रुद्र ऋषिः। अनुष्टुप्छन्दः। महासरस्वती देवता। क्लीं भीमा शक्तिः। क्लींभ्रामरीबीजं। यंसूर्य्यस्तत्त्वं। मूर्तिरहस्यजपे विनियोगः।

नन्दा भगवती नाम या भविष्यन्ति नन्दजा। स्तुतासंपूजिताभक्त्या वशीकुर्याज्जगत्त्रयम् १

कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा। देवीकनकदामाढ्याकनकोत्तमभूषणा ॥२॥

कमलाङ्कुशपाशाब्जैरलङ्कृतचतुर्भुजा। इन्दिरा कमला लक्ष्मीः सा श्री रुक्माम्बुजासना ॥३॥

या रक्तदंतिका नाम देवी प्रोक्ता मयाऽनघ। तस्या स्वरूपं वक्ष्यामि शृणु सर्वभयापहम् ॥४॥

यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः। रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा ॥५॥

रक्तायुधा रक्तनेत्रा रक्तकेशाऽतिभीषणा। रक्ततीक्ष्णनखा रक्तरसना रक्तदन्तिका ॥६॥

पतिं नारीवाऽनुरक्ता देवी भक्तं भजेज्जनम्। वसुधेव विशाला सा सुमेरुयुगलस्तनी ॥७॥

दीर्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ। सुकर्कशावतिकान्तौ सर्वानन्दपयोनिधी ॥८॥

भक्तान्संपाययेद्देवी सर्वकामदुधौ स्तनौ। खड्गं पात्रं च मुशलं लांगलं च बिभर्ति सा ॥९॥

आख्याता रक्तचामुण्डा देवी योगेश्वरीति च। अनया व्याप्तमखिलं जगत्स्थावरजङ्गमम् १०

इमांयःपूजयेद्भक्त्यासव्याप्नोतिचराचरम्। भुक्त्वाभोगान्यथाकामंदेवीसायुज्यमाप्नुयात् ११

अधीते य इमं नित्यं रक्तदन्त्यावपुःस्तवम्। तं सा परिचरेद्देवी पतिं प्रियमिवाङ्गना १२

शाकम्भरी नीलवर्णा नीलोत्पलविलोचना। गम्भीरनाभिस्त्रिवलीविभूषिततनूदरी ॥१३॥

सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी। मुष्टिं शिलीमुखैः पूर्णं कमलं कमलालया ॥१४॥

॥२२३॥

पुष्पपल्लवमूलादिफलाढ्यं शाकसञ्चयम्। काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युजरापहम् ॥१५॥
कार्मुकं च स्फुरत्कान्तिबिभर्ति परमेश्वरी ॥ शाकम्भरी शताक्षी स्यात् सैव दुर्गा प्रकीर्तिता ॥१६॥
उमा गौरी सती चण्डी कालिका सा तु पार्वती। शाकम्भरीं स्तुवन्ध्यायन् जपन्संपूजयन्नमन्॥१७॥
अक्षय्यमश्नुते शीघ्रमन्नपानामृतं फलम्। भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा ॥१८॥
विशाललोचना नारी वृत्तपीनपयोधरा। चन्द्रहासं च डमरुं शिरः पात्रं च बिभ्रती ॥१९॥
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता। तेजोमण्डलदुर्दर्शा भ्रामरी चित्रकान्तिभृत् ॥२०॥
चित्रभ्रमरपाणिः सा महामायेति कीर्त्तिता। इत्येता मूर्तयो देव्या व्याख्याता वसुधाधिप॥२१॥
जगन्मातुश्चण्डिकायाः कीर्तिता कामधेनवः। इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ॥२२॥
व्याख्यानं दिव्यमूर्तीनामभीष्टफलदायकम्। तस्माद् सर्वप्रयत्नेन देवीं जप निरन्तरम्॥२३॥
सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि। पाठमात्रेण मंत्राणां मुच्यते सर्वकिल्बिषैः ॥२४॥
देव्या ध्यानं तवाख्यातं गुह्याद्गुह्यतरं महत्। पात्रशिष्यायदातव्यं देवीसांनिध्यकारकं ॥२५॥
मेधा प्रज्ञा तथा श्रद्धा धारणां कांतिरेव च। शांतिः पुष्टिस्तथा लक्ष्मीरेतत्सर्वं प्रयच्छति ॥२६॥
सर्वरूपमयीदेवी सर्वं देवीमयं जगत। यतोऽहं विश्वरूपां तां नमामि जगदंबिकाम् ॥२७॥

इतिश्री मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये मूर्ति रहस्यं

श्रीगणेशायनमः ॥ ॐ अस्य श्रीदुर्गापञ्जरस्तोत्रस्य सूर्य ऋषिः त्रिष्टुप्छन्दः छायादेवता श्रीदुर्गापञ्जरस्तोत्रपठने विनियोगः ध्यानम् ॥ ॐहेमप्रख्यामिन्दुखण्डात्तमौलिं शङ्खाभीष्टाभीतिहस्तां त्रिनेत्राम् ॥ हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि ॥ अपराधशतं कृत्वा जगदम्बेति चोच्चरेत् । यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥ सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके ॥१॥ ॐ नमश्चण्डिकायै ॥

मार्कण्डेय उवाच ॥

दुर्गे दुर्गप्रदेशेषु दुर्वाररिपुमर्दिनी ॥ मर्दयित्रीरिपुश्रीणां रक्षां कुरु नमोस्तुते ॥१॥
पथि देवालये दुर्गे अरण्ये पर्वते जले ॥ सर्वत्रोपगते दुर्गे दुर्गे रक्ष नमोस्तुते ॥२॥
दुःस्वप्नदर्शने घोरे घोरे निष्पन्नबन्धने ॥ महोत्पाते च नरके दुर्गे रक्ष नमोस्तुते॥३॥
व्याघ्रोरगवराहाग्निनिर्ह्रादिजनसङ्कटे ॥ ब्रह्मविष्णुस्तुते दुर्गे दुर्गे रक्ष नमोस्तुते ॥४॥
खेचरा मातरःसर्वभूचराश्चातिरोहिताः ॥ येत्वांसमाश्रितास्तांस्त्वंदुर्गेरक्षनमोऽस्तुते॥५॥
कंसासुरपुरे घोरे कृष्ण रक्षणकारिणी ॥ रक्ष रक्ष सदा दुर्गे दुर्गे रक्ष नमोऽस्तुते ॥६॥
अनिरुद्धस्य रुद्धस्य दुर्गे बाणपुरे पुरा ॥ वरदे त्वं महाघोरे दुर्गे रक्ष नमोऽस्तुते ॥७॥
देवद्वारे नदातीरे राजद्वारे च सङ्कटे ॥ पर्वतारोहणे दुर्गे दुर्गे रक्ष नमोऽस्तुते ॥८॥
दुर्गापञ्जरमेतत्तु दुर्गासारसमाहितम् ॥ पठतस्तारयेद्दुर्गान्नात्र कार्या विचारणा ॥९॥

रुद्रज्वाला महादेवी क्षमा च परमेश्वरी ॥ अनन्ताविजया नित्या मातस्त्वमपराजिता ॥१०॥
इतिश्री मार्कण्डेय पुराणे देवी माहात्म्ये रुद्रयामलेदेव्याः पञ्जरस्तोत्रं सम्पूर्णम् ॥

॥ अथ देव्यपराध क्षमापन स्तोत्रम् ॥

न मंत्रं नो यंत्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ॥
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदभिसरणं कष्टहरणम् ॥१॥
विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ॥
तदेतत्क्षंतव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रोजायेत क्वचिदपि कुमाता न भवति ॥२॥
जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ॥
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥

॥२३६॥

पृथिव्यां पुत्रास्ते जननि बहवः संति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ॥
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ॥४॥
परित्यक्त्वा देवान् विविधविधिसेवाकुलतया
मया पंचाशीतेरधिकमपनीते तु वयसि ॥
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालंबो लंबोदरजननि कं यामि शरणम् ॥५॥
श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातंको रंको विहरति चिरं कोटिकनकैः ॥
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं
जनः को जानीते जननि जपनीयं जपविधौ ॥६॥
चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कंठे भुजगपतिहारी पशुपतिः ॥
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥७॥

न मोक्षस्याकांक्षा भवविभववाञ्छापि च न मे ।
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ॥
अतस्त्वां संयाचे जननि जननं यातु मम वै
भवानो रुद्राणी शिवशिवभवानीति जपतः ॥८॥

नाराधितासि विधिना विविधोपचारैः किं रूक्षचिंतनपरैर्न कृतं वचोभिः ॥
श्यामे त्वमेव यदि किंचन मय्यनाथे धत्से कृपामुचितमंब परं तवैव ॥९॥

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि ॥
नैतच्छठत्वं मम भावय त्वं क्षुधातृषार्ता जननीं स्मरंति ॥१०॥

जगदंब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ॥
अपराधपरंपरावृतं नहि माता समुपेक्षते सुतम ॥११॥

इति श्रीमत्परमहंस परिव्राजकाचार्य जगद्गुरु श्रीमच्छंकराचार्य विरचितं देव्यपराध क्षमापन स्तोत्रं संपूर्णम् ॥ श्री जगदंबार्पणमस्तु ॥ शुभं भवतु ॥

॥ श्री सप्तशत्या भिन्नः पाठक्रमः* ॥

॥ अथ सप्तशती प्रारंभः ॥

पूजयेन्मंडलं देव्यास्तस्योद्धारं शृणु प्रिये ॥ चतुष्कोणं प्रकर्तव्यं चतुर्द्वारं सकर्णिकं ॥१॥
तदंतश्च लिखेदष्टदलं पद्मं सकर्णिकं ॥ कर्णिकांतश्च षट्कोणं तदंतश्च त्रिकोणकं ॥२॥
तस्य मध्ये महालक्ष्मी महाकाली च दक्षिणे ॥ सरस्वती तथा वामे रूपाण्यासां प्रचक्ष्यति॥३॥
एवं मंडलमालिख्य ततः पूजनमाचरेत् ॥ देवीं तत्त्वं च बीजं च ऋषिः छंदांसि देवताः ॥४॥
एवं ज्ञात्वा जपं कुर्यादन्यथा छिद्रमाप्नुयात् ॥ द्रव्याणि संनिधीकृत्य पूजायोग्यानियोगवित्५
प्राणानायम्ययत्नेनकालज्ञानं ततोन्वियात् ॥ भूतशुद्धिततः कृत्वा मुद्राः कुर्यात् सुवाक्
शुचिः ॥ पूजयेदर्घपात्रं च मूलमंत्रेण मंत्रवित् ॥६॥

अथ गायत्री ॐ ऐंह्रींक्लीं बीजत्रयायविद्महे तत्प्रधानाय धीमहि ॥ तन्नो शक्तिः प्रचोदयात् ॥ अनया वा षोडशोपचारान् कुर्यात् ॥ एवं छंदःऋषिदेवताप्रभृतिसर्वं श्रीदेव्या मंत्रसमन्वितं परिज्ञाय सवाहनायुधां देवीं ध्यानपूर्वं सपरिवारां संपूज्य पश्चात्सप्तशतीपाठं कुर्यात ॥

* अयं क्रमः काठोभावाडांतर्गत प्रभासपाटणपत्तनस्थ गोर मूलशंकर त्रिकमजी शुक्लाभिध वृद्धसकाशात्प्राप्त सप्तशती पुस्तके दृष्टः । अयं पाठः विक्रम संवत १९१६ फाल्गुन शुदी १४ मंगलवासरे लिखित आस्ते अयं क्रमो मनोहरः सरहस्य सविशेष इति मनसि निधायात्र मुद्रितः ॥ ले. गजवैद्य ॥

अथ करन्यासः ॥ ॐ श्रीं अंगुष्ठाभ्यांनमः ॥ ॐ श्रींह्रींतर्जनीभ्यांनमः ॥ ॐश्रीं ऐंह्रींमध्यमभ्यांनमः ॥ ॐह्रींश्रींअनामिकाभ्यांनमः ॥ ॐऐंह्रींकनिष्ठाकाभ्यांनमः ॥ ॐऐंह्रींश्रींक्लींकरतलकरपृष्ठाभ्यांनमः ॥ इतिकरन्यासः ॥ एवंहृदयादिन्यासः ॥

ॐऐंह्रींश्रींक्लींह्सौंशिरसेदेव्येनमः॥ मूलं ॥ ॐऐंह्रींश्रींक्लींह्सौंबालात्रिपुरायैनमः ॥ लक्षमेकं जपः ॥ तद्दशांशहोमतर्पणमार्जनं ॥ ब्राह्मणभोजनं शतं ॥ भुक्तिमुक्तिप्रदादेवी शुद्धपाठवतां नृणां ॥ अशुद्धचंडिकापाठाद्रावणो निधनं गतः ॥

अस्यश्रीसप्तशतिकास्तोत्रमंत्रस्य ॥ मेधामार्कंडेय ऋषिः ॥ वा ब्रह्मविष्णुरुद्रा ऋषयः ॥ महाकालीमहालक्ष्मीमहासरस्वतीदेवताः ॥ अनुष्टुप्शकरी गायत्रीप्रभृति च्छंदांसि ॥ वाग्भवंमायाकामराजं बीजानि ॥ जूंशक्तिः ॥ श्रीमहाकालीमहालक्ष्मी महासरस्वतोपूजने जपे विनियोगः ॥

अथन्यासः मार्कंडेयोक्तः॥ ह्रांहृदयायनमः ॥ ह्रींशिरसेस्वाहा ॥ ह्रूंशिखायैवषट् ह्रैंकवचायहुं ॥ ह्रौंनेत्रत्रयायवौषट् ॥ ह्रः अस्त्रायफट् ॥ इति षडंगः ॥

एभिर्बीजैरंगपूजा ॥ पश्चात्द्वारपालपूजा ॥ ॐह्रींश्रींगांगणपतये नमः ॥ ॐ क्षांक्षींक्षौं क्षेत्रपालाय नमः ॥ ॐह्रींतीक्ष्णशृंगायमहिषाय नमः ॥ ॐह्रींवनस्पति पुत्रायसिंहाय नमः ॥ इति द्वारपालपूजा ॥

ॐह्रींगुरुपादुकाभ्यो नमः॥ ॐह्रांरुद्राय नमः ॥ ह्रींविष्णवे नमः ॥ वंब्रह्मणे नमः॥

इयं मध्यपूजा ॥

ॐ ह्रीं ब्रह्माण्यै नमः ॥ ॐ ह्रीं वैष्णव्यै नमः ॥ ॐ ह्रीं रुद्राण्यै नमः ॥ इति दिग्भागपूजा ॥

ॐ ह्रीं कौमार्यै नमः ॥ ॐ ह्रीं वाराह्यै नमः ॥ ॐ ह्रीं ऐन्द्र्यै नमः इति प्रदक्षिणे पूजा ॥

ॐ ह्रीं चंडिकायै नमः ॥ ॐ ह्रीं चामुंडायै नमः ॥ ॐ ह्रीं महालक्ष्म्यै नमः ॥ इति मध्यपूजा ॥

ॐ ह्रीं चामुंडायै नमः ॥ ॐ ह्रांह्रींह्रूं चामुंडामूर्त्तये नमः ॥ अथ मूलं ॥ ॐ ह्रींश्रीं सः नमोभगवति महादुर्गे चंडि कात्यायनि नमः ॥ इति मूलं ॥

ॐ नमः पिशाचिनि किरिकिरित्रिशूलखड्गहस्ते सिंहारूढे ऐंह्येहि आगच्छ २ मम पूजां गृह्ण २ सर्वसिद्धिं कुरु २ ॐ ह्रींश्रीं चंडिकायै नमः ॥ इत्यावाहनम् ॥

ॐ ह्रीं चंडिकायै नमः ॥ ॐ ह्रीं विंध्यवासिन्यै नमः ॐ ह्रीं रक्तदंतिकायै नमः ॥ ॐ ह्रीं शताक्ष्यै नमः ॥ ॐ ह्रीं शाकंभर्यै नमः ॥ ॐ ह्रीं भ्रामर्यै नमः ॥ इत्यावरणम् ॥

ॐ ह्रीं चंडिके पाद्यं गृहाण नमः ॥ अर्घ्यं ॥ गंधं ॥ पुष्पं ॥ अनुलेपनं ॥ धूपं दीपं ॥ दक्षिणां ॥ ॐ ह्रींचंडिके चामुंडे गणपति क्षेत्रपाल सिंह महिषासुरसहिते बलिं गृहाण २ सर्व सिद्धिं कुरु २ स्वाहा ॥ इति पूजा विधिः ॥

पटलं देवतागात्रं पद्धतिर्देवताशिरः ॥ कवचं देवतावक्त्रं सहस्राक्षं मुखं स्मृतं ॥१॥

स्तोत्रंदेवरसः प्रोक्तंपंचांगमुपवक्रकं । एकांगेनविहीनस्यजपंकृत्वा च निष्फलं ॥२॥
अनेनविधिनायस्तुपूजयित्वाच वाचयेत् । तस्मैदेव्यः प्रसीदंतियच्छंतिविविधंसुखं ॥३॥
अनेनविधिना यस्तु विहीनः पुस्तकंपठेत् । तस्यजापो भवेद्व्यर्थः अरण्येरुदितंयथा॥३॥
ददातिविविधांसिद्धिं ददातिविविधंसुखं । योजपेत्तस्यसिद्धिः स्यात्क्षेमंप्राप्नोतिनित्यशः ५
पुस्तकंसप्तशतिकं अनेनविधिनार्चयेत् । सर्वान्कामानवाप्नोति रुद्रस्य वचनंयथा ॥४॥

अथ अनुक्रमणिका ॥ प्रथमं अर्गलास्तुतिः ॥ पश्चादुत्कीलनं तदनु देव्यारक्षा कवचं ॥ पश्चात्स्तुतिः चरितानि ॥ तदनंतरं प्राधानिकं मूर्त्तिरहस्यं वैकृतिकं ॥ एवं सप्तभिः प्रकारैः सप्तशत्या यथोक्तजपः ॥

अस्य श्रीअर्गलायाः स्तोत्रस्य भगवान् ऋषिः ॥ अनुष्टुप् छंदः ॥ ह्रीं दुर्गादेवता ॥ नर्वाणःशक्तिः ॥ मंत्रोदिता देवता ॥ देव्या ऐंह्रींक्लीं बीजं ॥ सप्तशतीमनुस्तत्त्वं ॥ अर्गलास्तोत्र जपे विनियोगः ॥ ॐ नमश्चंडिकायै ॥

जयंती मंगलाकृष्णा–इत्यारभ्य वरमाप्नोति संपदः–पर्यंतं पठित्वा ॥

ज्ञानादज्ञानतो वापि विरुद्धं यत्कृतं भवेत् ॥
तत्सर्वं पशुरूपस्य क्षंतव्यं मम चंडिके ॥२५॥

इति अर्गला स्तुतिः ॥१॥

ॐ अस्यश्री कीलकस्तुतेः श्रीवर्मरूपायाः सर्वेश्वर ऋषिः । चंडी देवता । अनुष्टुप् छंदः । ॐऐंह्रींक्लीं चामुंडायै विच्चे नमः शक्तिः । मंत्रोदिता देवताः ॥ देव्या ऐंह्रींक्लीं बीजं । उन्माला मनुस्तत्त्वं । कीलक जपे विनियोगः ॥

ॐ ह्स्रां ह्स्रीं ह्स्रौं ऐं क्षमलवरयीं ॐ क्षां क्षीं क्षूं क्षैं क्षौं क्षः उत्कीलयर स्वाहा ॥ ॐ नमश्चंडिकायै ॥ विशुद्ध ज्ञान देहाय–इत्यारभ्य स्तूयते सा न किं जनैः–पर्यंतं पठेत् इति उत्कीलनं (कीलकं) ॥

ॐ अस्यश्री ब्रह्मकवचस्य ब्रह्मा ऋषिः । अनुष्टुप् छंदः । श्रीचंडी परमेश्वरी देवता । ह्रीं बीजं । श्रीं शक्तिः । क्लीं कीलकं । समस्तैश्वर्य प्राप्त्यर्थे कवच पाठे विनियोगः ॥ ध्यानं ॥

सृष्टौ संस्थापनाय त्वपहरणविधौ मोहनेऽनुग्रहे वा
सर्वेषामर्गलानां निजमहिमवशादक्रमेणैव यालं ॥
नित्यं क्रीडाप्रसक्ता रचयति सकलं स्वात्मशक्त्या प्रपंचं
सा नस्त्राणाय भूयादभिमतफलदा भद्रकाली च काली ॥१॥

शतानीक उवाच ॥

यद्गुह्यं परमं लोके–इत्यारभ्य–महामाया प्रसादतः–पर्यंतं पठेत् ॥

इतिश्री वराह पुराणे हरिहरब्रह्म विरचितं देव्याः कवचं ॥२॥

ॐ अस्यश्री सप्तशती स्तोत्रमंत्रस्य ब्रह्मा मेधा रुद्रः ऋषिः ॥ गायत्र्युष्णिक् अनुष्टुप जगती शक्वरी छंदांसि । महाकाली महालक्ष्मी महासरस्वत्यो देवताः । ऐं ह्रीक्लीं ब्लूं सः क्ष्व्लुं वीजानि । चामुंडा शक्तिः । सर्वदुःखोपशांतये सर्वकामनावाप्तये सर्वसमृद्धिप्राप्तये जपे विनियोगः ॥

प्रथम चरित्रस्य ब्रह्मा ऋषिः । देवी गायत्री च्छंदः । महाकाली देवता । भूर्लोकः । ऐं बीजं । अग्निस्तत्वं । ऋग्वेदमयीमूर्तिः प्रथम चरितजपे विनियोगः ॥

मध्यम चरितस्य विष्णुर्ऋषिः । उष्णिक् छंदः । महालक्ष्मी देवता । भुवर्लोकः ह्रीं बीजं । वायुस्तत्वं यजुर्वेदमयी मूर्तिः मध्यमचरितजपे विनियोगः ॥

उत्तर चरितस्य रुद्र ऋषिः । त्रिष्टुप् छंदः । महासरस्वती देवता । स्वर्लोकः । क्लीं बीजं । सूर्यस्तत्वं । सामवेदमयी मूर्तिः उत्तर चरित जपे विनियोगः ॥

इति सप्तशती महास्तोत्र मंत्रस्य छंदांसि देवतास्तत्वानि बीजानि शक्तयः ॥

॥ अंगन्यासः हृदयादि न्यासः ॥

ॐ शंभुज्वाला मालिनि पावके ह्रां नंदायै हृदयाय नमः ॥
„ „ ह्रीं रक्तदंतिकायै शिरसे स्वाहा ॥
„ „ ह्रूं शाकंभर्यै शिखायै वषट् ॥

ॐ शंभुज्वाला मालिनि पावके ह्रैं दुर्गायै कवचाय हुं ॥
" " ह्रौं भीमायै नेत्रत्रयाय वौषट् ॥
" " ह्रः भ्रामर्यै अस्त्राय फट् ॥

॥ अथ करन्यासः ॥

" " ह्रां नंदायै अंगुष्ठाभ्यां नमः ॥
" " ह्रीं रक्तदंतिकायै तर्जनीभ्यां स्वाहा ॥
" " ह्रूं शाकंभर्यै मध्यमाभ्यां वषट् ॥
" " ह्रैं दुर्गायै अनामिकाभ्या हुं ॥
" " ह्रौं भीमायै कनिष्ठिकाभ्यां वौषट् ॥
" " ह्रः भ्रामर्यै करतलकरपृष्ठाभ्यां फट् ॥

ॐ अस्यश्री कवचसहितस्य सप्तशती स्तोत्रस्य मेधा मार्कंडेय ऋषिः शिरसि । देवो गायत्रीच्छंदो मुखे । दुर्गादेवता हृदये । ऐंद्रं धनुष्मयीह बीजं । स्प्लं स्प्लं श्रीं शक्तिः वसंततिलका श्रीदुर्गा देवता प्रीत्यर्थे कवच सहित सप्तशती स्तोत्रस्य यथाशक्ति जपमहं करिष्ये ।

विष्णोर्माया चेतना बुद्धिर्निद्रा क्षुधा छाया शक्ति तृष्णास्तथैव ॥
क्षांतिर्जातिर्लज्जया शांतिरिच्छा कांतिर्लक्ष्मीश्चापि वृत्तिः श्रुतिश्च ॥१॥

स्मृतिर्दया तथा माया तुष्टिः पुष्टिर्धृतिः क्षमा ॥
श्रद्धा मेधान्विता माता भ्रांतिरेता नमस्त्रिधा ॥२॥

ॐ नमःश्चंडिकायै ॥

पंचेंद्रियाणि संयम्य शुचिर्भूत्वा समाहितः॥ सात्विकं भावमास्थाय भक्त्या तद्गतमानसः १
मायाबीजं हृदिन्यस्य सर्वकामफलप्रदं । स्वदेहरक्षणार्थाय न्यासं कुर्यादनन्यधीः ॥२॥
दुर्गामेशिरसिस्थातु ललाटेचंद्रधारिणी । नेत्रेनारायणी रक्षेत्कर्णयोर्विंध्यवासिनी ॥३॥
घ्राणेतुशांकरीदेवी मुखं माहेश्वरी तथा । कपोलौकालिकारक्षेज्जिव्हायां च सरस्वती॥४॥
कंठंखड्गधरीरक्षेद् ग्रीवायां च गणेश्वरी । सर्वज्ञा हृदये स्थातु धर्मकामार्थमोक्षदा ॥५॥
भद्रकालीभुजौरक्षेत्सर्वशत्रुक्षयंकरी। सौभाग्य सुंदरीरक्षेदुदरं सिंहवाहिनी ॥६॥
पृष्ठं धनुर्धरी रक्षेत्पार्श्वयोः सर्वमंगला । नाभिं देवी रमारक्षेद् गुह्यं गुह्येश्वरि तथा ॥७॥
जंघे महाबलादेवी पादौरक्षतु पार्वती । मनोरक्षेन्महालक्ष्मी विशोकाशोकनाशिनी ॥८॥
चित्तंब्रह्माणीमे रक्षेद् ब्रह्मज्ञानपरायणा। बुद्धिं श्रद्धां च मेधां च रक्षेन्मे धर्मधारिणी ॥९॥
मृत्युंजयासदारक्षेज्जीवनंव्याधिहारिणी । चतुर्दिक्षु महामाया अधोर्ध्वं सकलेश्वरि ॥१०॥
रक्षाहीनं च यत्स्थानं वर्जितं कवचे मया। तत्सर्वं रक्ष मेदेवी दुर्गादीनार्त्तिनाशिनी ॥११॥
इदं तु कवचं कृत्वा संग्रामे प्रविशेन्नरः। सविजित्यरिपून्सर्वान्जयकामोजयं लभेत ॥१२॥
पुत्रकामोलभेत्पुत्रं भार्याकामोवरस्त्रियः । विद्याकामोलभेद्विद्यां धनकामोधनंलभेत् ॥१३॥

रोगाद्विमुच्यतेरोगी बद्धोमुच्येतबंधनात। त्रिसंध्यंपठमानस्तु दारिद्र्यान्मुच्यतेनरः ॥१४॥
सर्वापदोविनिर्मुक्तो दीर्घायुर्विजयी भवेत्। स्नानेदानेजपेहोमे प्रत्यक्षंदेवतार्चने ॥१५॥
पठनीयंप्रयत्नेन देव्या कवचमुत्तमं। कृत्वादेवीमयंदेवं महास्तोत्रं समारभेत् ॥१६॥

॥ इतिश्री देव्याअंगन्यास कवचं ॥

प्रथम चरित्रस्य ब्रह्मा ऋषिः। महाकाली देवता। गायत्री छंदः। नंदा शक्तिः। रक्तदंतिका बीजं। अग्निस्तत्वं। ऋग्वेदमूर्तिः श्रीमहाकाली प्रीत्यर्थे जपे विनियोगः॥ अथ ध्यानं—खड्गं चक्रगदेषु चापपरिघान्शूलं भुशुंडीं शिरः।

शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषाभृतां॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां।
यामस्तौच्छयिते हरौ कमलजो हंतुं मधुं कैटभं ॥१॥

मार्कंडेय उवाच॥

सावर्णिः सूर्यतनयो—इत्यारभ्य भूयः श्रृणुवदामि ते—पर्यंतं पठित्वा सांगायै सपरिवारायै वाङ्मयबीजाधिष्ठात्र्यै महाकाल्यै महाहुतिं समर्पयामि नमः॥ कपित्थ फलद्वयं नागवल्ली सहितं जुहुयात॥

इतिश्री मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये मधुकैटभवधःप्रथमोध्यायः॥१॥

श्रीमध्यमचरितस्य विष्णुर्ऋषिः । महालक्ष्मीर्देवता । उष्णिक् छंदः । शाकंभरी शक्तिः । दुर्गा बीजं । वायुस्तत्त्वं । यजुर्वेदमूर्तिः महालक्ष्मीप्रीत्यर्थे जपे विनियोगः ॥

अथ ध्यानं

अक्षस्रक्परशुं गदेशुकुलिशंपद्मं धनु कुंडीकां । दंडं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनं ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां । सेवे सैरिभ-मर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥:॥

ऋषि रुवाच

देवासुरमभूद्युद्धं–इत्यारभ्य पुष्पवृष्टिमुचोदिवि–पर्यंतं पठित्वा सांगायै सपरिवारायै लक्ष्मीबीजाधिष्ठात्र्यै महालक्ष्म्यै महावृतिं समर्पयामि नमः ॥ नारिकेरफलं जुहुयात् ॥

इतिश्री मार्कण्डेय पुराणे सावर्णिक मन्वन्तरे देवी माहात्म्ये द्वितीयोऽध्यायः ॥

ॐ श्रां श्रामयाभयप्रदामनंतरूपां पाशभृतां सिंहवाहिनीं महिषासुरहंत्रीं चंडिकामूर्तिं मनःकामनाफलसिद्ध्यर्थे जपे विनियोगः ॥

अथ ध्यानं

उद्यद्भानु सहस्रकांतिमरुणां क्षौमं शिरोमालिकां । रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरं ॥ हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविंदश्रियं । देवीं बद्ध-हिमांशुरत्नमुकुटां वंदे समंदस्मितां ॥१॥ ३१३

ऋषि रुवाच

निहन्यमानं–इत्यारभ्य ननृतुश्चाप्सरोगणाः–पर्यंतं पठित्वा ॥ सांगायै सपरिवारायै अष्टाविंशति वर्णात्मिकायै महालक्ष्म्यै महाहुत्ति समर्पयामि नमः सघृत-मधुपुष्पाणि जुहुयात् ॥

इतिश्री मार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरवधः तृतीयोध्यायः३

ॐ ह्रीं श्रीं देवैस्तुतां महिषासुरवधानंतरं शुंभनिशुंभवधार्थे कौशिकीमूर्तिरूपां शत्रुहंत्रीं मनःकामना सिद्धयर्थे जपे विनियोगः ॥

अथ ध्यानं—कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां ।
शंखं चक्रं कृपाणीं त्रिशिखमपि करैरुद्वहंतीं त्रिनेत्रां ॥
सिंहस्कंधाधिरूढां त्रिभुवनमखिलं तेजसा पूरयंतीं ।
ध्याये दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धसंघैः ॥१॥

ऋषिरुवाच

शक्रादयः सुरगणा–इत्यारभ्य यथावत्कथयामि ते–पर्यंतं पठित्वा ततः श्री-सूक्तं पठेत् ॥ सांगायै सपरिवारायै त्रिवर्णात्मिकायै त्रिशक्ति महालक्ष्म्यै महाहुत्ति समर्पयामि नमः ॥ पूगी फलं सघृतं जुहुयात् ॥

इतिश्री मार्कण्डेय पुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरवधानंतरं देव्याः स्तुतिः चतुर्थोध्यायः ॥४॥

उत्तरचरितस्य रुद्र ऋषिः । महासरस्वती देवता । अनुष्टुप् छंदः । भीमा शक्तिः । भ्रामरी बीजं । सूर्यस्तत्वं । सामवेदमूर्तिः महासरस्वती प्रीत्यर्थे जपे विनियोगः ॥

अथ ध्यानं—घंटाशूलहलानि शंखमुशले चक्रं धनुः सायकं ।
हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभाम् ॥
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा- ।
पूर्वामत्र सरस्वतीमनुभजे शुंभादिदैत्यार्दिनीम् ॥१॥

ॐ ऐं श्लीं रुद्रोक्ता सरस्वतीदेवतां अंबिकामूर्तिम् मनःकामनासिद्ध्यर्थे जपे विनियोगः ॥

ऋषिरुवाच ॥

पुरा शुंभनिशुंभाभ्यां—इत्यारभ्य—स च युक्तं करोतु यत्—पर्यंतं पठित्वा ॥ सांगायै सपरिवारायै विष्णुमायादित्रयोविंशति देवताभ्यश्च महावृत्तिं समर्पयामि नमः ॥ बीजपूरफलं जुहुयात् ॥

॥२५०॥

इतीश्री मार्कण्डेय पुराणे सावर्णिके मन्वंतरे देवीमहात्म्ये देव्या दूतस्य च संवादो नाम पंचमोध्यायः ॥५॥

ॐ ध्रां ध्रां मत्तहुंकारशब्देन दैत्यनिरसनांगगतां कन्यां चंडमुंडनाशिनीं निशुंभ शुंभयोर्व्यापादयित्रीं प्रतिज्ञाकृतसंकल्पां धूम्रलोचनहंत्रीं कौशुकीं भगवतीं मनःकामना सिद्धयर्थे जपे विनियोगः ॥

अथ ध्यानं—सिंहस्था शशिशेखरा मरकतप्रख्या चतुर्भिर्भुजैः ।
शंखं चक्रधनुःशरांश्च दधती नेत्रैस्त्रिभिः शोभिता ॥
आमुक्तांगदहारकंकणरणत्कांचीरणन्नूपुरा ।
दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुंडला ॥१॥

ऋषि रुवाच ॥

इत्याकर्ण्य वचोदेव्या–इत्यारभ्य गृहीत्वा तामंथाम्बिकाम्–पर्यंतं पठित्वा ॥

सांगायै सपरिवारायै शताक्ष्यै धूम्राक्ष्यै महाहुत्ति समर्पयामि नमः ॥ नालिकेरं जुहुयात् ॥

इतिश्री मार्कण्डेय पुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये धूम्रलोचनवधो नाम षष्ठोध्यायः ॥

ॐ क्रां क्रां कनकरूपां विकटभ्रुकुटीकराकवदनां महामायां चंडमुंडकेशेषु कृतोद्यमां चंडमुंडशोभितकरां चामुंडां कालीं मनःकामनासिद्ध्यर्थे जपे विनियोगः

अथ ध्यानं—ध्यायेहं रत्नपीठे शुककलपठितं शृण्वतीं श्यामलांगीं ।
न्यस्तैकांघ्रिं सरोजे शशिशकलधरां वल्लकीं वादयंतीम् ॥
कल्हाराबद्धमालां नियमितविलसच्चूडिकां रक्तवस्त्रां ।
मातंगीं शंखपात्रां मधुमदविवशां चित्रकोद्भासिभालां ॥

ऋषिरुवाच ॥

आज्ञप्तास्तु ततो दैत्या–इत्यारभ्य ख्याता देवी भविष्यसि–पर्यंतं पठित्वा सांगायै सपरिवारायै कर्पूरबीजाधिष्ठात्र्यै कालीचामुंडादेव्यै महाहुतिं समर्पयामि नमः ॥
कुष्मांडफलहोमः ॥

इतिश्री मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये चंडमुंडवधः सप्तमोध्यायः ७

ॐ क्लीं ह्रीं रक्तां रक्तबिंदुरूपां शिवदूतीं कालीं वारणात्तवरस्थसालंकारदंत चर्वितां ब्रह्मविष्णुगुहनृसिंहेंद्रवराहरूपां मनःकामनासिद्ध्यर्थे जपे विनियोगः ॥

अथ ध्यानं—नागाधीश्वरविष्टरां फणिफणोत्तंसोरुरत्नावलीं ।
भास्वद्देहलतां विभाकरनिभां नेत्रत्रयोद्भासिताम् ॥

मालाकुंभकपालनीरजकरां चंद्रार्धमौलिं परां ।
सर्वज्ञेश्वरभैरवांकनिलयां पद्मावतीं चिंतये ॥१॥

ऋषि रुवाच

चंडे च निहते दैत्ये—इत्यारभ्य ननर्तासृङ्मदोद्धतः—पर्यंतं पठित्वा ॥ सांगायै सपरिवारायै अष्टमातृसहितायै रक्ताक्ष्यै देव्यै महार्घ्यत्ति समर्पयामि नमः ॥ इक्षु दंडखंड होमः ॥

इतिश्री मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये रक्तबीजवधः अष्टमोध्यायः॥८॥

ॐ ह्रीं ह्रां सर्वशक्तियुतां युद्धशालिनीं मुनिकरमर्दिनीं कोटीसूर्यप्रभां ब्राह्म्यादि भवशक्तियुतां निशुंभशुंभहंत्रीं मनःकामना सिद्ध्यर्थे जपे विनियोगः ॥ अथ ध्यानं—

बंधूककांचननिभं रुचिराक्षमालं पाशांकुशौ च वरदं निजबाहुदंडैः ॥
बिभ्राणमिंदुशकलाभरणं त्रिनेत्रमर्धांबिकेशमनिशं वपुराश्रयामि ॥१॥

राजोवाच ॥

विचित्रमिदमाख्यातं—इत्यारभ्य शिवदूती मृगाधिपैः—पर्यंतं पठित्वा ॥

सांगायै सपरिवारायै भैरव्यै तारादेव्यै महार्घ्यत्ति समर्पयामि नमः ॥ कुष्मांड खंडेक्षुखंड होमः ॥ ३१८

इतिश्री मार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवी माहात्म्ये निशुंभवधः नवमोध्यायः ॥९॥

ॐ श्रीं श्रीं शुंभहंत्रीमंबिकां यक्षगणैःपरिवृतां अमरविद्याधराद्यैर्वंदितां शुंभमथनां पुष्पवर्षमयीं मनःकामना सिद्ध्यर्थे जपे विनियोगः ॥ अथ ध्यानं—

उत्तप्तहेमरुचिरां रविचंद्रनेत्रां धन्यां धनुःशरयुतां कुशपाशहस्ताम् ॥
रम्यैर्भुजैश्च दधतीं शिवशक्तिरूपां कामेश्वरीं हृदि भजामि धृतेंदुलेखाम् ॥१॥

ऋषिरुवाच ॥

निशुंभं निहतं दृष्ट्वा–इत्यारभ्य शांतदिग्जनितस्वनाः ॥ –पर्यंतं पठित्वा ॥

सांगायै सपरिवारायै सिंहासनायै त्रिशूल वरधारिण्यै महाहुतिं समर्पयामि नमः ॥ मातुलुंगफलहोमः ॥

इतिश्री मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवी माहात्म्ये शुंभवधो नाम दशमोध्यायः ॥१०॥

ॐ सूं सूं शुक्लां श्वेतवर्णां चंद्रनिभाननां गुडाकेशीं भीमां भ्रामरीं शाकंभरीं दुर्गां रक्तदंतिकां शतनेत्रां देवैःस्तुतां मनःकामनासिद्ध्यर्थे जपे विनियोगः ॥

अथ ध्यानं—उद्यदिंदुद्युतिमिंदुकिरीटां तुंगकुचां नयनत्रययुक्ताम् ॥
स्मेरमुखीं वरदांकुशपाशाभीतिकरां प्रभजे भुवनेशीम् ॥१॥

ऋषिरुवाच—

देव्याहते तत्र महासुरेन्द्रे—इत्यारभ्य करिष्याम्यरिसंक्षयं—पर्यंतं पठित्वा ॥ सांगायै सपरिवारायै सर्वनारायण्यै महावृत्तिं समर्पयामि नमः ॥ दाडिमी फलं जुहुयात् ॥

इतीश्री मार्कंडेय पुराणे सावर्णिके मन्वन्तरे देवी माहात्म्ये नारायणीस्तुतिर्नाम एकादशोऽध्यायः ॥११॥

ॐ सौं सौं हरिनेत्रजां देवगणसमूहां मधुकैटभ महिषासुरमर्दिनीं धूम्रलोचन चंडमुंड रक्तबीज विनाशिनीं निशुंभशुंभनिर्वाहिणीं फलप्रदां चंडिकां मनःकामना सिद्ध्यर्थे जपे विनियोगः ॥

अथ ध्यानं—विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां ।
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥
हस्तैश्चक्रगदासिखेट विशिखांश्चापं गुणं तर्जनीं ।
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥१॥

देव्युवाच ॥

एभिः स्तवैश्चमां नित्यं—इत्यारभ्य मतिं धर्मे तथा शुभाम् ॥ पर्यंतं पठित्वा ॥

सांगायै सपरिवारायै बालात्रिपुरसुंदर्यै महावृत्तिं समर्पयामि नमः॥ विल्व फलं जुहुयात्॥

इतिश्री मार्कंडेय पुराणे सावर्णिके मन्वंतरे देवी माहात्म्ये देव्याः स्तुति फलानुकीर्तनं नाम द्वादशोध्यायः ॥१२॥

ॐ ह्रीं ह्रीं सुरथवैश्यकल्यादां महीमयीमूर्तिरूपां गोकुलाविर्भवां सुरथवैश्य वरप्रदां निष्कंटकराज्यज्ञानदां सावर्णिमनुरूपां सप्तशतीं चंडीं मनःकामना फल प्राप्त्यर्थे जपे विनियोगः ॥ अथ ध्यानं—

वालार्कमंडलाभासां चतुर्बाहुं त्रिलोचनाम्। पाशांकुशशरांश्चापं धारयंतीं शिवां भजे ॥१॥

पद्मासनस्थां करपंकजाभ्यां रक्तोत्पलेशं दधतीं त्रिनेत्रां ॥

संविभ्रतीमाभरणानि रक्तां पद्मावतीं पद्ममुखीं नमामि ॥२॥

ऋषिरुवाच ॥

एतत्ते कथितं भूप—इत्यारभ्य सावर्णिर्भविता मनुः—पर्यंतं पठित्वा ॥

सांगायै सपरिवारायै श्रीत्रिपुरसुंदर्यै श्रीविद्यायै महावृत्तिं समर्पयामि नमः ॥ कदलीफलं जुहुयात ॥

इतिश्री मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवी माहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोध्यायः ॥१३॥

॥ इति सप्तशत्या भिन्नपाठक्रमः ॥

॥ परिशिष्टम् ॥

॥ अथ कुमारी पूजनं कुमारीलक्षणम् ॥१॥

अरोगिणीं सुपुष्टाङ्गीं सुरूपां व्रणवर्जिताम् । एकवंशसमुद्भूतां कन्यां सम्यक्प्रपूजयेत् ।१।
हीनाधिकाङ्गीं कुष्ठीं च विशीलकुलसंभवाम् । जात्यन्धां केकरां काणीं कुरूपां तनुलोमशाम् ।२।
संत्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवाम् । ब्राह्मणीं सर्वकार्येषु जयार्थे क्षत्रियोद्भवाम् ।२।
लाभार्थे वैश्यसंभुतां सुतार्थे शूद्रवंशजाम् । दारुणे चान्त्यजातीयां पूजयेद्विधिना नरः ।३।

॥ अथ कुमारी पूजन विधिः ॥

सर्वयज्ञोत्तमं भूप कुमारीपूजनं शृणु । कृतं यस्मिन्महालक्ष्मीरचिरेण प्रसीदति ।१।
आमन्त्रयेद्दिने पूर्वे कुमारीं भक्तिपूर्वकम् । पूजादिने समाहूय कुमारीमाद्यदेवताम् ।२।
मण्डले चरणौतस्याः क्षालये दुष्णवारिणा । अर्चयेद्धेमपात्रेण वारिपुष्पाक्षतैः समम् ।३।
सुविताने शुभे स्थाने पङ्कजोपरि पीठके । उपवेश्य कुमारीं तां स्वाङ्गे न्यासं समाचरेत् ।४।
आत्मानं विधिवत्पूज्य क्रोधदर्पविवर्जितः । अथ ध्यात्वा कुमारीं तां महालक्ष्मीस्वरूपिणीम् ५
मातुलुङ्गं गदां खेटं पात्रं पीयूष पूरितम् । दक्षिणाधः क्रमाद्धस्तैर्बिभ्रतीं सर्वमङ्गलाम् ।६।
सुतप्तहेमवर्णाङ्गीमाद्यामाद्यैः सुपूजिताम् । नवाक्षरेण मन्त्रेण सुसिद्धेन समर्चयेत् ।७।
दद्यादाचमनं तस्यै दद्याद्वस्त्रं सकञ्चुकम् । सकङ्कणाङ्गुलीयानि कर्णालङ्करणे शुभे ।८।

ग्रैवेयकं प्रदत्त्वा तु चन्दनेन विलेपयेत् । पूजयेत्पुष्पमालाभिर्दिव्यैर्धूपैः सुधूपयेत् ।९।
कुर्यादारात्रिकं राजन्नतुल्यं चाच्यतां मुहुः । भोजयेद्भक्तिभावेन पायसं शर्कराघृतम् ।१०।
सुपक्वान्नानि चान्यानि सर्वक्षोभविवर्जितः । फलेक्षुस्वादु चान्यच्च दद्यात्तस्यै पुनः पुनः ।११।
यावत्सा भोजनं कुर्यात्तावन्मन्त्रं जपेत्सुधीः । दद्यादाचमनं तस्यै ताम्बूलं च समर्पयेत् ।१२।
तोपयेत्क्षेमदानेन कुमारीं प्रणतः सकृत् । प्रदक्षिणानमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः १३
विसर्जयेत्कुमारीं तां स्वगृहं हर्षनिर्भरः । अनेन विधिना भक्त्या कुमारीं योऽभिपूजयेत् ।१४।
स पृथ्वीराज्यमासाद्य शिवसायुज्यतां व्रजेत् । यं यं प्रार्थयते कामं देवानामपि दुर्लभम् ।१५।
कुमारीपूजनं कृत्वा तं तं प्राप्नोत्यसंशयम् । ब्रह्मविष्णुमहेशानां कुमारी परमा मता ।१६।
तत्पूजनेन राजेन्द्र त्रैलोक्यं स्यात्सुपूजितम् । सम्यक्क्रतुफलं तस्य यः कुमारीं प्रपूजयेत् ।१७।
तस्मात्पूजय भूपाल कुमारीं यतमानसः । स्वं राज्यं प्राप्स्यसेऽवश्यं मा तेऽभूत्त्वत्र संशयः ।१८।

अथैतत्पद्धतिः ।

तत्र साधकः कृतनित्यक्रियः पूजादिनात्पूर्वदिने कुमारीगृहं गत्वा गन्धाक्षतादिभिर्मूलमन्त्रेण भगवति कुमारि पूजार्थं त्वं मया निमन्त्रितासि मां कृतार्थय इति निमन्त्र्य पूजादिने तां समाहूय अभ्यङ्गस्नानादिना परिष्कृतां समलङ्कृतां च पूजागृहं नीत्वा अष्टदलपद्मोपरि सुखासनास्तृतपीठे समुपवेश्य तस्याः पादावुष्णशीतजलेन मण्डलोपरि प्रक्षाल्य सूक्ष्मवस्त्रेण च प्रोञ्छ्य स्वस्तिकासने चोपविष्टां तां श्रीमहालक्ष्मीस्वरूपां ध्यायन्स्वशरीरे पूर्वपूजाप्रकरणोक्तविधिना न्यासं विधायात्मपूजां कृत्वा तस्यां । ॐ मन्त्राक्षरमयीं लक्ष्मीं

मातृणांत्वधारिणीम् । नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥१॥ इत्यावाह्य । आवाहना-दिपरमीकरणान्तं तत्तन्मुद्रया विधाय तां प्रमाणोक्तरूपां ध्यात्वा नवाक्षरमन्त्रेण अर्घ्यपाद्या-दिभिः पूजाप्रकरणोक्तविधिना संपूज्य दीपान्ते षडरसोपेतं पञ्चविधमन्नं नैवेद्यं समर्प्य याव-त्सा भोजनं करोति तावन्मौनी ध्यानी मूलमंत्रं नवाक्षरं जपेत् । ततो भुक्तवत्यां तस्यां करोद्वर्तनं करक्षालनादिकं च दत्त्वाचमनं समर्प्य सकर्पूरं ताम्बूलं तस्यै निवेद्य आरार्तिकं विधाय प्रदक्षिणानमस्कारैः पुनः पुनः प्रतोष्य मस्तके न्यस्तांजलिः सुवर्णादिविशिष्टदक्षिणां दत्त्वा सहर्षस्तां तद्गृहं विसृजेदिति ॥

॥ अथ नित्यचंडीपाठ प्रयोगविधिः ॥२॥

नित्यचंड्यादिजापस्य विधानं ते वदाम्यहम् ॥
क्रमेण सर्वकार्याणां सिद्धये सर्व पुण्यदं ॥१॥
पूर्वोक्तविधिना कृत्वा चंडिकातर्पणादिकम् ॥
शुक्लभूतमवष्टभ्य मासं प्रतिदिनं जपेत् ॥२॥
सकृद्रहस्यसंयुक्तं चंडिकाचरितत्रयम् ॥
दशांशहोमसहितं सोच्यते नित्यचंडिका ॥३॥
धनपुत्रयशोदात्री महाव्याधिविनाशिनी ॥
महाभय महादुःख हंत्री सौख्यप्रदायिनी ॥४॥

साधकः विधिना कृतनित्यक्रियः पूजास्थानं प्रविश्य पूर्वाभिमुखः आसने उपविश्य आचम्य प्राणानायम्य स्वेष्टदेवतां स्मृत्वा संकल्पं कुर्यात् । अत्राद्य विक्रम संवत्—तमे वर्षे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुक देशे क्षेत्रे अमुकगोत्रः अमुकशर्माहं अमुक कामना सिद्ध्यर्थे अद्यारभ्य मास मात्रं नित्यदुर्गासप्तशती जपमहं करिष्ये इति संकल्पं कुर्यात् । शुक्लचतुर्दश्यां होमं कुर्यात । देव्याः पूजनादिकं कृत्वा चरितत्रयं विधिवत सरहस्यं संपूर्णं सकृत्पठेत् । ततः मासानंतरं कुंडस्थंडिलादिकं कृत्वा विधिना पायसघृततिलसमिदादिभिः दशांशसंख्यकहोमपुरःसरं हुत्वा तर्पणं मार्जनं ब्राह्मणभोजनं कुर्यात् । कुमारिकाः सुवासिनीश्च संपूज्य भोजयित्वा तांबुल दक्षिणादिभिः संतोष्य विसर्जयेत् । स्वयं यदि कर्तुमशक्तश्चेत् देवीभक्तसप्तशतीपाठनिपुणब्राह्मणद्वारा पाठं जपं होमं कारयित्वा यथाशक्ति दक्षिणादिभिः संतोषयेत् । एवं कृते यथाभिलषितवरान् लभते । एवं यथाभिलापं नित्यचंडीजपप्रयोगविधानेन सर्वाभीष्टफलप्राप्तिर्भवति राजमान्यो धनवान् पुत्रपौत्रधनैश्वर्यारोग्यसम्पन्नः शतसंवत्सरं दीर्घमायुः प्राप्नुयात् ॥

॥ इति नित्यचंडी विधिः ॥

॥ अथ नवदुर्गा प्रयोगविधिः ॥३॥

शुक्लाष्टमीं समारभ्य यावत्कृष्णा च नंदिनो । नवदुर्गा विधातव्या सर्वाभीष्टफलार्थिना ।१।
संपूज्यविधिवद् देवीं चंडिकां कृततर्पणाम् । कलशं पंचरत्नाढ्यं सहकारदलान्वितं ।२।
सवस्त्रं संप्रतिष्ठाप्य चंडिकाग्रेंभसा भृतम् । समंतात् पूजयेद् दिक्षु दिशापालान्यथाक्रमम् ।३।
चंदनेन विलिप्तांगः स्रग्वी न्यासपरायणः । नवाहं भूप एकैकं मौनी बद्धासनो जपेत् ।४।
प्रणवादि रहस्यांतं चंडिकाचरितत्रयम् । नवदुर्गेति विख्याता पापतापप्रणाशिनी ।५।
सर्वैश्वर्यप्रदाभूप कुर्वतामविलंबितम् ॥ इतिश्री खिलमार्कण्डेये ॥ अथ पूजन विधिः ॥

अथ साधकः कृतनित्यक्रियः देशकालौ संकीर्त्य नवदुर्गाजपमहं करिष्ये इति संकल्प्य देवीं संपूज्य देव्यग्रे शालिपुंजोपरि स्वर्णादिरचितं वस्त्रवेष्टितं वज्र मुक्ता नील पद्मराग मरकतमणिसंज्ञक पंचरत्नसहितं चंदनधूपदीपादिभिः पूजितं कलशं वेदमंत्रैः संस्थाप्य वेदमंत्रेण जलमापूर्य तत्र चंदनकुसुमादिकं निःक्षिप्य तस्य मुखे आम्रपल्लवान् दत्वा तदुपरि नारिकेलसहितं सतंदुलं पात्रं निधाय तं कुंभं रक्तवस्त्रद्वयेन संवेष्ट्य कुंभस्य दश दिक्षु पूर्वादिक्रमेण इंद्रादि दश दिक्पालान् संपूज्य स्वयं कुंकुमाक्तचंदनविलिप्तांगः सुवस्त्रमाल्याद्यलंकृतः मौनी ध्यानपरः सन् सरहस्यं चंडीचरितत्रयं मूलमंत्रजपादिविधिपुरःसरं प्रत्यहमेकैकावृत्ति पठेत । एवं नव दिवसपर्यंतं पठित्वा दशमे दिने कुंडस्थंडिलादौ अग्निं संस्थाप्य होमं विधाय ब्राह्म-

णान् कुमारिकाः सुवासिनीश्च संपूज्य भोजनतांबूलदक्षिणादिभिः संतोष्य प्रणम्य विसृजेत् । स्वयमशक्तश्चेत् ब्राह्मणद्वारा यथोक्तविधिना प्रयोगं कारयेत् । एवं कृते सर्वाभीष्टकामनासिद्धिर्भवति ॥

॥ अथ सार्धनवचंडीप्रयोगः ॥४॥

नवसार्धं जपेद्यस्तु मुच्येत्प्राणान्तकाद्भयात्। राज्यं श्रीः सर्वसंपत्तिः सर्वान्कामानवाप्नुयात ।१।
प्रयोगोऽयं महागुह्यो देवानामपि दुर्लभः । तत्तेऽहं संप्रवक्ष्यामि सावधानाऽवधारय ।२।
मधुकैटभनाशं च महिषासुरघातनम । शक्रादिस्तुतिरेवातो देवीसूक्तं पुनस्तथा ।३।
नारायणीस्तुतिश्चैव फलानुकीर्त्तनं तथा। ततो वरप्रदानं तु ह्यर्धपाठोऽयमुच्यते ।४।
अर्धपाठस्त्वयं प्रोक्तः सर्वकामफलप्रदः । अर्धपाठेन रहितं नवपाठफलं न हि ।५।

अत्रार्धपाठे पञ्चमाध्याये देवा ऊचुः नमो देव्यै इत्यारभ्य ऋषिरुवाचेति पर्यन्तमिति । ब्राह्मणास्त्वत्रैकादश । तेषु नव ब्राह्मणाः पूर्णत्रयोदशाध्यायपाठकर्तारः एकोर्धपाठकर्ता । एको यजुर्वेदीयषडङ्गाष्टाध्यायपाठकः । एवमेकादश ब्राह्मणाः प्रयोगकर्त्तार इति ॥

अथ प्रयोगपद्धतिः ।

तत्र चन्द्रतारानुकूले शुभे मुहूर्ते अथवा कृष्णाष्टमीनवमीचतुर्दशीनामन्यतमदिने कुमारीं यथोक्तलक्षणामानीय यजमानः सुस्नातः श्वेताम्बरधरः सपत्नीकः

सुप्रक्षालितपाणिपादः तां संपूज्य संभोज्य दक्षिणादानेन तां संतोष्य तस्याज्ञां गृहीत्वा गोमयोपलिप्तायां भूमौ स्वासने समुपविष्टः प्राङ्मुख उदङ्मुखो वा स्वेष्ट देवं संस्मृत्य आचम्य स्वस्तिवाचनं[१] कारयित्वा कस्मिंश्चित्पीठे विघ्नविघातार्थं गणेशमावाह्य[२] गन्धाक्षतपुष्पमालाधूपदीपमोदकनैवेद्यताम्बूलदक्षिणाप्रार्थनान्तैः संपूज्य संप्रार्थ्य संकल्पं कुर्यात् । ॐ तत्सदद्येत्यादिदेशकालौ संकीर्त्य अमुकगोत्रो अमुक शर्माहं राजतो व्यवहारतश्च प्रतिष्ठाश्रीवृद्धिकामः सकुटुम्बस्यात्मनः शरीरारोग्यकामश्च एकादशब्राह्मणद्वारा यजुर्वेदीयवाजसनेयिसंहितान्तर्गतैकषडङ्गपाठसहित मार्कण्डेयपुराणान्तर्गत चण्डीचरितस्य श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवतानां प्रीत्यर्थं सार्धनवकरूपपुरश्चरणं कारयिष्ये । इति संकल्प्य गन्धाक्षतपुष्पकौसुम्भसूत्रवासोरूपां वरणसंभृतिमादाय तत्पात्रं करद्वयोपरि निधाय संकल्पं कुर्यात् । ॐतत्सदद्येत्यादि अमुकगोत्रोऽमुकशर्मा पूर्वप्रतिज्ञातार्थसिद्धिकामः एभिर्वरणद्रव्यैरेकषडङ्गसहितसार्धनवकपाठान्कर्तुमेकादश ब्राह्मणान्यथानामगोत्राnहं वृणे । इति संकल्प्य जलं भूमौ निःक्षिप्य प्रदक्षिणक्रमेण प्रत्येकं ब्राह्मणं वृणुयात् । तत आचार्यः यथाविधि कलशं संस्थाप्य तत्र श्रीभवानीशङ्करावावाह्य स्नान वस्त्र गन्धाक्षत पुष्प बिल्व पत्र माला धूप दीप नैवेद्य फल ताम्बूल दक्षिणान्तोपचारैर्वक्ष्यमाणक्रमेण

१ पुण्याहवाचनाख्यं कर्म । तत्प्रयोगस्तु ग्रन्थान्तरादवगन्तव्यः । २ गणानां त्वेत्यादिमन्त्रग्रन्थः ।

संपूज्य देवीं ध्यात्वा नमस्कृत्य पुस्तकं पूजयेत् । ।अथ पुस्तक पूजनम्।

तत्र पाद्यादिभिः षडङ्गपीठाधिष्ठातृदेवतां संपूजयेत्। यथा एतानि पाद्यानि श्रीभवानीशंकराभ्यां नमः । एष गन्धः श्रीभवानीशंकराभ्यां नमः । इमे अक्षताः श्रीभवानीशंकराभ्यां नमः । इमानि पुष्पाणि श्रीभवानीशंकराभ्यां नमः । एष धूपः श्री भवानीशंकराभ्यां नमः । एष दीपः श्रीभवानीशंकराभ्यां नमः । इदं नैवेद्यं श्री भवानीशंकराभ्यां नमः । एष नमस्कारः श्रीभवानीशंकराभ्यां नमः इतिषडङ्गपुस्तकं संपूज्य । सप्तशतीपुस्तकमप्येवमेव पूजयेत् । ततः पाठार्थमनुज्ञां ब्राह्मणेभ्यो दद्यात् । ते ब्राह्मणाः पृथक् पृथक् स्वस्वपाठसंकल्पं कुर्युः । तत्र क्रमः । ॐतत्सदद्य देशकालौ संकीर्त्य अमुकगोत्रोऽमुकशर्मा अमुकगोत्रस्यामुकनाम्नो यजमानस्य मनोऽभीष्टसीद्ध्यर्थमाद्यन्ताष्टोत्तरशतनवार्णजपपूर्वकचण्डी चरित्रस्यैकपाठमहं करिष्यामि। एवं नवब्राह्मणाः। दशमस्तु चण्डीचरित्रस्यार्धपाठं करिष्यामि इति । एकादशस्तु यजुर्वेदीयषडंगमष्टाध्यायपाठं करिष्यामि इति संकल्पयेत्। स्वं स्वं पाठं यथाविधि निर्वर्त्यान्ते नवार्णजपं विधाय श्रीदेव्यैः समर्प्य होमविधिसंस्कृते वह्नौ घृतपायसतिलैः पाठेकेन होमं विधाय तदन्ते मूलमन्त्रेण तर्पणमार्जनादिकं विधाय ब्राह्मणान्भोजयेत् । यथा ॐतत्सदद्य अमुकगोत्रोऽमुकशर्मा श्रीभवानीशंकरप्रीत्यर्थं कारितषडङ्गैक पाठसहितसार्धनवचण्डीपाठाङ्गत्वेन पायसाद्यन्नेन सोपकरणेन यथानामगोत्रान्ब्राह्मणा-

नहं संभोजये । इति संकल्प्य । नानाविधव्यञ्जनैस्तान्संभोज्य ताम्बूलं भोजनदक्षिणां च दद्यात् । ॐतत्सदद्य अमुकगोत्रोऽमुकशर्मा श्रीभवानीशंकरप्रीत्यर्थं कारितब्राह्मणभोजनसाङ्गतासिद्ध्यर्थमिदं दक्षिणाद्रव्यं यथानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे । इति संकल्प्य भोजनदक्षिणां दत्त्वा पाठदक्षिणां दद्यात् । ॐ तत्सदद्येत्याद्युक्त्वा अमुकगोत्रोऽमुकशर्मा प्रतिज्ञातार्थसिद्ध्यर्थं श्रीभवानीशंकर प्रीत्यर्थं सपड्ङ्गसार्धनवपाठसांगत्वसिद्धये इदं दक्षिणाद्रव्यं तन्मूल्योपकल्पितं हिरण्यमग्निदैवतं रजतं चंद्रदैवतं वा यथानामगोत्रेभ्यो यथाभागमाचार्याय द्विगुणं दातुमहमुत्सृजे इति-पाठकर्तृभ्यो यथाभागमाचार्याय च द्विगुणं दत्त्वा ॐयतो यतः समीहसे ततो नो अभयं कुरु। शंनः कुरुप्रजाभ्योऽभयं नः पशुभ्यः॥इति पठित्वा पुष्पाक्षतयुतमाशीर्वादं यजमानाय दत्त्वा श्रीदेवीं विसर्ज्य विहरेदिति शिवम् ॥ इति श्रीसार्धनवदुर्गापाठविधिः रुद्रयामले ॥

॥ अथ सप्तशतीदीपदानविधिः ॥५॥

सर्वेप्सितफलावाप्त्यै प्रयोगं शृणु सादरम्। एकान्ते विजने रम्ये स्थण्डिलं रचयेच्छुभम् ।१।
हस्तमात्रं तु विस्तारं चतुरङ्गुलमुन्नतम्। रजोभिः पञ्चभिश्चित्रं कृत्वा तत्र क्रमेण तु ।२।
त्रयोदशैव पात्राणि स्थापयेत्त्रिवलीयथा। एकत्रिनवयोगेन चरित्राध्यायसंख्यया ।३।
गोघृतेन समापूर्य स्थापयेद्बुद्धवर्तिकान्। दीपान्प्रज्वाल्य मूलेन तत्तदध्यायदेवताम् ।४।
तत्तद्दीपे समावाह्य आसनाद्युपचारकैः। रक्तचामुण्डिमन्त्रेण पुष्पपूजां विशेषतः ।५।

वक्ष्यमाणनवश्लोकैरर्पयेत्परमेश्वरीम् । तत्राध्यायं पठित्वा तु नवभिश्च पुनर्जपेत् ।६।
धूपदीपौ निवेद्याथ पायसान्नं निवेदयेत् । ताम्बूलादि समर्प्याथ ब्राह्मणं च सुवासिनीम् ।७।
कुमारीं वटुकं चापि भोजयेच्च विशेषतः । ततो द्वितीयाध्यायस्य देवतां पूर्ववद्यजेत् ।८।
एवं पृथक् पृथक् सर्वा ध्यात्वा देवीः प्रपूज्य च । सर्वान्ते महतीं पूजां नवार्णविधिना चरेत् ।९।
अनुग्रहे तु पूर्वाह्णे निग्रहे चापराह्णके । महत्कार्ये तु एकोनपञ्चाशद्दिनमाचरेत् ।१०।
मध्ये चतुर्विंशतिश्च अल्पे द्वादशसंख्यकः । त्रयः प्रयोगकर्तारो महत्यल्पक एव हि ।११।
धनार्थं बिल्वपत्रैस्तु वश्यार्थं करवीरकैः । जपापुष्पैर्मोहनार्थं पुत्रार्थं तुलसीदलैः ।१२।
पुष्ट्यर्थं पङ्कजैर्देवि नवश्लोकैः प्रपूजयेत् । मूर्तिप्रमाणं महति माषैः षोडशभिः शिवे ।१३।
तदर्धेन तदर्धेन कार्यलाघवगौरवात् । पूजामन्त्रं नवश्लोकाः शृणु वक्ष्यामि भामिनी ।१४।
तारं माया रक्तपदं चामुण्डायै तुरुद्वयम् । अमुकं मे वशपदमानयान्ते ऽनलाङ्गना ।१५।
पूजामन्त्रोऽयमीशानि श्लोकान्वक्ष्यामि ताञ्शृणु । विश्वेश्वरीं जगद्धात्रीं द्वितीयं तु स्तुता सुरैः १६
या सांप्रतं तृतीयं स्याच्चतुर्थं तु महेश्वरि । या च स्मृता तत्क्षणेति पञ्चमं त्वष्टमं शृणु ।१७।
सर्वाबाधाप्रशमनं सर्वमङ्गलसंज्ञकम् । सृष्टिस्थितिविनाशानां सप्तमं त्वष्टमं शृणु ।१८।
शरणागतदीनार्त नवमं शृणु सुन्दरि । सर्वस्वरूपे सर्वेशे एभिः पूजां च कारयेत् ।१९।
सर्वान्ते मन्त्रमयुतं जपेत्तत्सङ्ख्यया हुनेत् । कटुतैलयुतेनाथ रक्तचन्दनराजिकाः ।२०।
सहस्राहुतिमात्रेण राजानं वशमानयेत् । मधु चाशोकपुष्पं च रात्रौ हुत्वा च पूर्ववत् ।२१।

चक्रवर्ती भवेद्वश्यश्चण्डीमन्त्रप्रभावतः। अन्ते शतं ब्राह्मणांश्च सुवासिनीश्च भोजयेत्।२२।
प्रयोगोऽयं महादेवि देवानामपि दुर्लभः। गुह्यं च मम सर्वस्वं कलाविष्टार्थसिद्धिदम्।२३।

तत्रादौ साधकः कृतनित्यक्रियो यागमण्डपे कदलीस्तम्भतोरणपताकादीपाद्यलंकृते गोमयोपलिप्ते समे शुद्धभूमौ स्वासनमास्तीर्य तत्रोपविश्य आचमनप्राणायामादिपूजाप्रकरणोक्तभूतशुद्ध्यादिप्राणप्रतिष्ठान्तमन्तर्मातृकाबहिर्मातृकाद्येकादशन्यासान्विधाय सुपवित्रमृदा हस्तमात्रां चतुरस्रां चतुरङ्गुलोन्नतां सुलक्षणां वेदीं निर्माय तथैव तदग्रे अन्यामपि वेदीं निर्माय एवं वेदीद्वयं विधाय प्रथमवेदिकायां नवार्णोपासनोक्तक्रमेण कस्मिंश्चिन्मनोहरे पीठे कलशोपरि कार्यानुसारेण यथोक्तमानमितां मूर्तिं संस्थाप्य भक्त्या संपूज्य तदाज्ञामादाय यथाकामं संकल्पं कृत्वा द्वितीयवेदिकायां पञ्चवर्णरजश्चित्रितायामूर्ध्वमध्यायक्रमेण पङ्क्तित्रयं प्रकल्प्य प्रथमपङ्क्तिमध्ये एकं द्वितीयपङ्क्तौ त्रयं तृतीयपङ्क्तौ नव। एवं क्रमेण दीपस्थानं कल्पयित्वा तत्र स्वर्णरजतताम्राद्यन्यतमं पात्रं शुद्धगोघृतपूरितं रुद्रवर्ति युक्तं त्रयोदशसंख्यं दीपं संपाद्य दीपस्थले प्रथमपङ्क्तिक्रमेण मूलोच्चारपूर्वकं दीपं प्रज्वाल्य तस्मिन्दीपे प्रथमाध्यायादितत्तदध्यायदेवतामावाह्य आसनाद्युपचारैः। ॐ ह्रीं रक्तचा-

१ 'आधारे लिङ्गनाभौ हृदयसरसिजे तालमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के। वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वराणां हक्षौ कोदण्डमध्ये न्यसतु विमलधीर्न्यासमपत्तिसिद्ध्यै॥' इत्युक्ता अन्तर्मातृका।

मुंडाये तुरु २ अमुकं मे वशमानय स्वाहा इति रक्तचामुण्डामन्त्रेण दीपे अध्याय देवतां संपूज्य नवभिः श्लोकैः पुष्पांजलिं दद्यात् । ते मन्त्राश्च । विश्वेश्वरीं जगद्धात्रीं० ॥१॥ स्तुता सुरैः पूर्वमभीष्टसंश्रयात्० ॥२॥ या सांप्रतं चोद्धतदैत्यतापितैः० करोतु सा नः शुभहेतुरीश्वरी० ॥३॥ या च स्मृता तत्क्षणमेव हन्ति नः करोतुसानः० ॥४॥ सर्वाबाधाप्रशमनं० ॥५॥ सर्वमङ्गलमाङ्गल्ये० ॥६॥ सृष्टिस्थिति विनाशानां० ॥७॥ शरणागतदीनार्त० ॥८॥ सर्वस्वरूपे० ॥९॥ एभिर्नवभिर्मन्त्रैर्यथाकामं प्रकरणोक्तकरवीरजपातुलसीबिल्वदलपङ्कजाद्यन्यतमैः पुष्पाञ्जलिं दत्त्वा आद्यन्ते नर्वाणजपपूर्वकं प्रथमाध्यायक्रमेणाध्यायपाठं विधाय पुनर्मूलमन्त्रम् जपित्वा पूर्ववन्नवभिर्मन्त्रैः पुष्पाञ्जलिं दत्त्वा धूपदीपौ निवेद्य पायसान्नं नैवेद्यं दत्त्वाचमनीयं ताम्बूलं च दत्त्वा ब्राह्मणं सुवासिनीं कुमारीं बटुकं चापि संपूज्य संभोज्य दक्षिणां दत्त्वा समाप्य ततोद्वितीयाध्यायदेवतां संपूज्य पुष्पाञ्जलिदानादिबटुकपूजनान्तं पूर्ववत्समाप्य । एवं त्रयोदशाध्यायदेवीः पृथक् पृथक् संपूज्य त्रयोदशाध्यायान्पृथक् पृथग् दीपाग्रे पठित्वा ब्राह्मणसुवासिनीकुमारीबटुकांश्च संभोज्य संताप्यान्ते नवार्णोपासनक्रमेण महतीं पूजां विधाय अनुग्रहे पूर्वाह्णे निग्रहे पराह्णे समापयेत् । महति कार्ये एकोनपञ्चाशद्दिनम्। मध्यकार्ये चतुर्विंशतिदिनम्। अल्पे द्वादशदिनं कार्यमिति । महति कार्ये त्रयो ब्राह्मणाः प्रयोगकर्तारो अल्पे एक एवेति। एवंकृते सर्वे मनोरथाः सिद्ध्यंति ॥

३३४ प्रयोग खण्डः ॥ ६ ॥

व्यक्तिविशेष साधनार्थं संपुटीकरणं ॥ सिद्धेश्वरी तंत्रे ॥

मंत्रमादौ वदेत्सर्वं साध्यसंज्ञामनंतरम। विपरीतं पुनश्चांते मंत्रं तत्संपुटं वदेत ॥१॥
मंत्रमादौ समुच्चार्य ततोनामाखिलं वदेत। अंतेव्युत्क्रमतोमंत्रमेष संपुट ईरितः ॥२॥

प्रथमं यमुद्दिश्य प्रयोगः करणीयस्तदनुसृत्य संकल्पं कुर्यात् तथाहि—

यथा–अत्राद्य संवत्—वर्षे मासे पक्षे तिथौ वासरे अमुक मनुष्य वशीकरणार्थे सप्तशत्याः प्रतिमंत्रे तन्नाम निधाय पाठमहं करिष्ये ॥ (दृष्टांतं)

मार्कंडेय उवाच

अमुकं मे वशमानय स्वाहा

मार्कंडेय उवाच

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः। निशामय तदुत्पत्तिं विस्तराद्गदतोमम ॥१॥

अमुकं मे वशमानय स्वाहा

सावर्णिः सूर्यतनयो योमनुः कथ्यतेऽष्टमः। निशामय तदुत्पत्तिं विस्तराद्गतोमम ॥१॥
महामायानुभावेन० अमुकं मे वशमानय स्वाहा महामायानुभावेन० ॥२॥

इत्थ यं यं व्यक्तिमुद्दिश्य यद्यत्कर्मापेक्षा वर्तते तदुक्त्वा अंते स्वाहा नियोज्य आद्यंते सप्तशती मंत्रं निधाय संपूर्णस्त्रयोदशाध्यायात्मकः संपुटितः पाठः कार्यः

इति व्यक्तिसाधनप्रयोग प्रकारः ॥

॥ विविध कामना सिद्धिः ॥१॥

विविधफलदानां सप्तशतीमंत्रैरन्यतममंत्रैर्वा प्रत्येक सप्तशतीमंत्रं संपुटीकृत्य सप्तशत्याः संपूर्ण पाठकरणेन तत्तत्फलप्राप्तिर्भवेत् । तत्प्रकारो यथा प्रथमं संकल्पः

अत्राद्य संवत्—वर्षे मासे पक्षे तिथौ वासरे मम सर्व कामना सिद्धये अथवा विशेष फलप्राप्तये जातवेदसे इति मंत्रेण अथवा अमुक मंत्रेण संपुटितेन सप्तशत्याः पाठमहं करिष्ये इति संकल्प्य संपुटितपाठं कुर्यात ॥ तद्यथा–

निम्न लिखित संपुट प्रयोगाः सिद्धेश्वरी तंत्र चिदंबर संहितायां चोक्ताः ॥

॥ सर्व कामना सिद्धिः ॥२॥

(१) ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वानावेव दुरितात्यग्निः ॥

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेष्टमः। निशामय तदुत्पत्तिं विस्तराद् गदतो मम ॥१॥

जातवेदसे सुनवाम सोम० अयं संपूर्णमंत्रः पुनश्च

जातवेदसे सुनवाम० अयं संपूर्ण मंत्रः पुनः महामायानुभावेन अयं सप्तशत्याः द्वितीयो मंत्रः ततः जातवेदसे सुनवाम० अयं संपूर्ण मंत्रः

अयं संपुट प्रकारः ॥ अस्य जातवेदस इतिमंत्रेण संपुटित शतचंडी पाठात

सर्व कामना सिद्धिः ॥

(२) शरणागतदीनार्त परित्राणपरायणे। सर्वस्यार्तिहरे देवि नारायणि नमोस्तुते ॥१॥
अनेन संपुटितेन शतपाठात कामना सिद्धिः ॥

(३) क्लींबीजसंपुटितं नित्यं त्रिवार पाठात् एक चत्वारिंशद्दिनैः सर्वकार्यसिद्धिः स्यात ॥

(४) करोतुसानः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतु चापदः ॥ अनेनार्धश्लोके न संपुटित शत पाठेन सर्वमनोभिलषितवशानाप्नुयादिति भगवान् चिदंबर मूर्तिः॥

॥ लक्ष्मी प्राप्तिः ॥३॥

कांसोस्मितां हिरण्यप्राकारां० इति श्रीसूक्त मंत्र संपुटेन शत पाठात् लक्ष्मीवान् जायते श्रीं ह्रींबीजेन संपुटीकरणात् ब्राह्मणद्वारा नित्यं पंचदशपाठः एकोन पंचाशद्दिनप्रयोगेण धनवान् लक्ष्मीवानवश्यं जायते ॥

॥ विद्याप्राप्तिः ॥४॥

इत्युक्ता सा तदा देवी गंभीरांतः स्मिताजगौ॥ दुर्गा भगवती भद्रा ययेदं धार्यते जगत्॥१॥
अनेनवा ऐंबीजेन संपुटित शतपाठात् विद्याप्राप्तिः ॥

॥ मोहनं वशीकरणं ॥५॥

(१) ज्ञानिनामपि चेतांसि देवी भगवती हिसा। बलादाकृष्य मोहाय महामाया प्रयच्छति॥१॥
एतन्मंत्रस्य लक्ष जापेनवा एतन्मंत्र संपुटित चंडीशतपाठाद्राजपत्न्यो मोहमाप्नुयुः॥

(२) कामबीजेन क्लीं संपुटितेन प्रत्यहं दशपाठात् एकविंशद्दिने राजवशीकरणं भवेत् ॥

॥ महामारी प्रभृति रोगोपद्रव शांतिः ॥६॥

(१) इत्थं यदायदा बाधा दानवोत्थाभविष्यति । तदा तदावतीर्याहं करिष्याम्यरि संक्षयम् ॥१॥

अनेन संपुटितेन शतपाठात् क्षिप्रं महामारिप्रभृतय उपद्रवाः शाम्यंति ॥ युद्धाग्निभय जलभय शत्रुभयाद्युपद्रवेषु जनपदोध्वंसकरेषु राजपरिवारैरवश्यं करणीयं ॥

॥ अकालमरण सर्वापत्तिनिवारणम् ॥७॥

(१) त्र्यंबकं यजामहे सुगंधिं० अनेन संपुटीकरणेन शतपाठात् अपमृत्युक्षयापस्मारादिमहारोगप्रशमनं भवति ॥

(२) दुर्गेस्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥ दारिद्र्य दुःख भयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥१॥ अनेन संपुटीकरणेन शतावृत्त्या सर्वापत्ति राजभय रोग शत्रुभय निवारणं भवति ॥

(३) दुर्गे स्मृता हरसीति अर्धो मंत्रः पूर्वं पठित्वा मध्ये सप्तशती मंत्रः अनन्तरं पुनरर्धो मंत्रः दारिद्र्यदुःखेति पठेत् अनेन क्रमेण शतावृत्त्या सर्वापत्ति दुःखशोकभयनिवारणं॥

(४) दुर्गेस्मृता हरसीति केवल मंत्रस्य लक्षजापेन सर्वदुःखकष्ट निवारणं स्यात् ॥

(५) दुर्गे स्मृता हरसीति आद्यमर्धं पठित्वा ततः यदन्ति यच्च दूरकेति ऋग्वेदमंत्रं पठित्वा पुनः दारिद्र्यदुःख इत्यर्धं पठेत् अनेन क्रमेण लक्षमंत्रजापेन सर्वापत्ति दुःखमहारोगनिवारणं स्यात् ॥

॥२७२॥

॥ भूतप्रेतादि सत्त्व निष्कासनं गृहात् स्थलात् शरीराद्वा ॥८॥

(१) हिनस्ति दैत्यतेजांसि स्वनेनापूर्यया जगत्। साघंटा पातुनो देवि पापेभ्यो नः सुतानिव॥१॥
कार्यलाघव गौरवानुसारं मंत्रस्यास्य सहस्रमयुतंलक्षं वा जपेत् । कांस्यधातुना कृतां घंटां बद्ध्वा प्रतिमंत्रं घंटानादं कुर्यात् ॥ माषभक्त बलिं दद्यात तन्नाद-श्रवणेनभूत प्रेत पिशाच राक्षस गंधर्व डाकिनी शाकिनी प्रभृति सत्त्वानि पलायन्ते ॥

॥ रोगनिवारणं ॥९॥

(१) रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् ॥
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति ॥१॥
मंत्रेणानेन संपुटितेन शतपाठादथवा केवलं मंत्रस्यास्य लक्षजपेन राजयक्ष्मा-दिमहारोग शांतिर्भवति ॥

॥ शत्रुनाशः ॥१०॥

(१) सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि। एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥१॥
अनेन संपुटितेन शतपाठावृत्या अथवा मंत्रास्यास्य केवलं लक्ष जापेन वैरिनाशो भवति ॥

॥ सर्वापत्तिपरिहारः सकल कामना सिद्धिः ॥११॥

(१) भगवत्याकृतंसर्वं न किंचिदवशिष्यते। यदयं निहतः शत्रुरस्माकं महिषासुरः ॥१॥
यदि चापि वरो देयस्त्वयास्माकं महेश्वरि। संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः २

यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने। तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदां ॥
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥३॥

सार्धमंत्रत्रयेणैको द्वादश शताक्षरो मंत्रो निगद्यते अस्य लक्षजपेन सर्व कामाः सिध्यन्ति सर्वापत्तिनिवारणं रोगशांतिश्च भवति ॥

(२) देविप्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ॥
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥

अनेन सप्तशत्या संपुटीकरणेन शतावृत्त्या अथवा अयं मंत्रः केवलं लक्ष संख्याको जप्तः सर्वारिष्टशांतिर्भवति सर्वेष्टकार्याणि सिद्ध्यंति ॥

॥ शत्रोरुच्चाटनं मारणं च ॥१२॥

(१) ह्रीं फट्–पल्लवसंयुतं संपुटीकृत्य प्रत्यहं ब्राह्मणद्वारा सप्तशत्या त्रिदशावृत्त्या एकविंशति दिवसैः शत्रुमुच्चाटयेत् ॥

(२) एवमुक्त्वा समुत्पत्य सारूढातं महासुरं। पादेनाक्रम्य कंठे च शूलेनैनमताडयत् ॥१॥
अनेन संपुटितेन शतपाठात् रिपुमारणं भवेत् ॥

॥ मंत्रसिद्धिः ॥१३॥

प्रयोगारंभे प्रथमदिवसे ॐ भूः ॐ भुवः ॐ स्वः इति व्याहृत्या संपुटीकृत्य शतवारं पाठेन मंत्रसिद्धिर्भवेत् ॥

॥२७४॥

॥ नवार्ण मंत्र संपुटित पाठफलानि ॥१४॥

ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे ॥ इति नवार्ण मंत्रः ॥

॥ १ पाठ फल ॥

नवार्ण संपुटितेनैकपाठेन सर्वपापक्षयो भवेत् ॥

॥ ३ पाठ फलं ॥

नवार्ण संपुटितत्रिरावृत्त्या भूतप्रेतपिशाचाद्युपसर्गशांतिर्भवेत ॥

॥ ५ पाठफलं ॥

ग्रहदोषोपशांत्यर्थं नवार्णसंपुटितपंचावृत्तिं पठेत् ॥

॥ ७ पाठ फलं ॥

महाभये समुत्पन्ने नवार्णसंपुटितां सप्तावृत्तिं पठेत् ॥

॥ ९ पाठ फलं ॥

महामारी प्रभृतिभये जनपदोद्ध्वंसकरे समुद्भूते प्रतिगृहं नवार्ण संपुटितां नवावृत्तिं पठेत्तेन जगतः शांतिर्भवेत् ॥

॥ ११ पाठ फलं ॥

राजवश्यार्थमैश्वर्यप्राप्तये एकादशावृत्तिं नवार्णसंपुटितां पठेत् ॥

॥ १२ पाठ फलं ॥

द्वादशावृत्त्या नवार्णसंपुटितया सर्वकार्यसिद्धिः शत्रुविनाशो जायते ॥

Scanned with OKEN Scanner

॥ १४ पाठ फलं ॥

नवार्णसंपुटितया चतुर्दशावृत्त्या रिपुवश्यं स्त्रीवश्यं च भवेत् ॥

॥ १५ पाठ फलं ॥

नवार्णसंपुटितया पंचदशावृत्त्या सौख्यैश्वर्यलक्ष्मीप्राप्तिः स्यात् ॥

॥ १६ पाठ फलं ॥

नवार्णसंपुटितया षोडशावृत्त्या पुत्र पौत्र धनधान्य समृद्धिप्राप्तिः स्यात् ॥

॥ १७ पाठ फलं १८ पाठ फलं ॥

१७ किंवा १८ आवृत्त्या नवार्णसंपुटितया राजभयनिवृत्तिः शत्रूच्चाटनं भवेत् ॥

॥ २० पाठ फलं ॥

विंशत्यावर्तनेन नवार्णसंपुटितेन महाव्रण क्षयादि महारोगशांतिर्भवति ॥

॥ २५ पाठ फलं ॥

नवार्णसंपुटितया पंचविंशावृत्त्या कारावास बंधमोक्षो भवेत् ॥

॥ १०० पाठ फलं ॥

प्राप्तसंकटे आयुषो नाशे प्राप्ते क्षय संग्रहणी महा व्रणादिरोगेषु वैरिवृद्धौ रोगवृद्धौ धननाशे विविध संकटे नवार्ण संपुटितया शतावृत्त्या सुखं संपद्यते ॥

॥ १००० पाठफलं ॥

नवार्णसंपुटित सहस्रावर्तनात् लक्ष्मीसाक्षात्कारः स्यात् वरं ददाति स्थिरा भूत्वा तद्गृहे निवसति । सच मनःसंकल्पितकामान्भुक्त्वा अंते मोक्षमाप्नुयात् ॥

तदंते हवनं कुर्याद्दशांशेन जपस्य वै । हुनेत्सर्पिःप्रयुक्तांश्च तिलधान्यादितंडुलान् ।१।
धर्मार्थकाममोक्षाणां संसिद्ध्यै पायसं हुनेत् । मारणे मोहने चैव तथोच्चाटनकर्मणि ।२।
वश्ये मांसं त्रिमध्वक्तं मोहने मधु पायसम् । धत्तूरस्य फलं स्तंभे वश्ये तुश्वेतसर्षपान् ।३।
पायसान्नं त्रिमध्वक्तैर्द्राक्षारंभाफलादिभिः । मातुलुंगैरिक्षुदंडैर्नारिकेलैस्तिलैरपि ।४।
जातीफलैराम्रफलैरन्यैर्मधुरवस्तुभिः । सप्तशत्या दशावृत्त्या प्रतिमंत्रहुतं चरेत् ।५।
तदशक्तो नमोदेव्यै मंत्रेणैव तु संख्यया । हुत्वा तत्फलमाप्नोति नात्र कार्या विचारणा ।६।

॥ क्षयादि महारोग शांतिः ॥१५॥

समस्तापन्निवृत्त्यर्थं क्षयादिरोगापमृत्यु निवारणाय शताक्षरा गायत्री मंत्रेण प्रतिश्लोकमादौ पठितेन शतावृत्तिं पठेत् समस्तापत्तिनिवारणं भवेत् । क्षयादिमहारोग मृत्युभयान्मुच्यते ॥

शताक्षरा गायत्री—ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात् ॥ जातवेदसे सुनवाम सोममरातियतो निदहाति वेदः । सनः पर्षदति दुर्गाणि विश्वानावेव सिंधुं दुरियात्यग्निः ॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥

॥२७७॥

॥ आयुरैश्वर्य वृद्धिः ॥१६॥

प्रतिश्लोकमाद्यंतयोः प्रणवं जपेन्मंत्रसिद्धिः आयुरार्ग्यैश्वर्याभिवृद्धिर्भवति ॥

॥ शीघ्रसिद्धिः ॥१६॥

ॐ भूर्भुवः स्वः इति व्याहृतित्रयमादौ अनुलोमं न्यस्य सप्तशतीश्लोकं पठित्वा अंते स्वः भुवः भूः ॐ इति विलोमं न्यस्य शतावृत्ति पाठेन मंत्रसिद्धिः वचनसिद्धिश्च भवति ॥

॥ अपमृत्यु निवारणम् ॥१७॥

प्रतिश्लोकमादावंते त्र्यंबकमिति मंत्रं पठेत् शतावृत्त्या क्षयाद्यपमृत्यु निवारणं अथवा अयुतं वा लक्षं वा त्र्यंबकं इति मंत्रस्य केवलं वा जपं कुर्यात् तद्दशांशं घृतक्षीरयुतं कमलं जुहुयात क्षयादि महारोगहरं मृत्युनिवारणं स्यात् ॥

॥ सर्वापत्ति निवारणं ॥१८॥

शरणागतदीनार्तश्लोकं मंत्रादिकं पठेत्। भवेद्रोगारि मृत्यूनां नाशनं सर्वसिद्धिदं ॥१॥
शरणागतदीनार्त परित्राण परायणे। सर्वस्यार्तिं हरे देवि नारायणि नमोस्तुते स्वाहा ॥२॥

ॐ शरणागत इति मंत्रस्य रुद्रात्मा सुमेधाऋषिः। अनुष्टुप् छंदः श्री नारायणी देवता मम वा अमुकस्य यजमानस्य अमुकरोगापमृत्यु निवारणे जपे विनियोगः ॥ स्वाहांतः शरणागतेति मंत्रजपः होमस्तर्पणं मार्जनं विधिवत् ॥

॥ सर्व कार्य सिद्धिः ॥१९॥

या च स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्ति विनम्रमूर्तिभिः ॥
करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतु चापदः ॥१॥
अनेन संपुटितेन शतावृत्तिं पठेत् सर्वकार्यसिद्धिः ॥

॥ वर प्राप्तिः ॥२०॥

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः । सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥१॥
अनेन प्रतिश्लोक संपुटित पाठेन स्वाभीष्टवरप्राप्तिः शतावृत्त्या भवति ॥

॥ सर्वकामाप्तिः सर्वकष्ट निवारणं ॥२१॥

(१) दुर्गे स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥ ततः सप्तशती मंत्रः । ततः दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकार-करणाय सदार्द्रचित्ता ॥ एवं शतावृत्त्या सर्वकष्टनिवारणं ॥

(२) दुर्गे स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतिव शुभां ददासि यदंति यच्च दूरके भयं विंदति मामिह । पवमान वितज्जहि यदुरिथतं भयं भगवति दुर्गे तत्त्वं शमय स्वाहा । दुर्गा देवीं शरणमहं प्रपद्ये प्रतिकूलं मे नश्य त्वनुकूलं मे प्रयच्छ ॥
दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥१॥

मंत्रस्यास्य कार्यानुसारं सहस्रं अयुतं लक्षं वा जपं कुर्यात सर्वे भय निवारणं मनःकामनासिद्धिर्भवेत् ॥

॥ भय कष्ट निवारणं शत्रुनाशनं ॥२२॥

ॐ अस्यश्री मार्कंडेय पुराणांतर्गत भवानी चरित्रांगत सर्वाबाधेति मंत्रस्य भगवान् वेदव्यास ऋषिः । अनुष्टुप् छंदः । शुंभासुर विध्वंसिनी दुर्गादेवता रिपु नाशार्थे जपे विनियोगः ॥

॥ अथ करन्यासाः ॥

ॐ सर्वा इत्यगुंष्ठाभ्यां नमः ।
ॐ बाधाप्रशमनमिति तर्जनीभ्यां स्वाहा ।
ॐ त्रैलोक्यस्याखिलेश्वरि इति मध्यमाभ्यांवषट् ।
ॐ एवमेवइति अनामिकाभ्यां हूं ।
ॐ त्वयाकार्यमिति कनिष्ठिकाभ्यांवौषट् ।
ॐ अस्मद्वैरिविनाशनमिति करतल करपृष्ठाभ्यांफट् ।

॥ अथ हृदयादि न्यासाः ॥

ॐ सर्वाइति हृदयाय नमः ।
ॐ बाधाप्रशमनमिति शिरसे स्वाहा । ३४५

ॐ त्रैलोक्यस्याखिलेश्वरि इति शिखायै वषट् । ॐ एवमेव इति कवचाय हुं ।
ॐ त्वयाकार्यमिति नेत्रत्रयाय वौषट् । ॐ अस्मद्वैरिविनाशनमितिअस्त्राय फट् ।

॥ अथ वर्णन्यासः ॥

ॐ सं नमः मूर्ध्नि	ॐ एं नमः दक्ष करतले
,, वीं ,, ललाटे	,, वं ,, वाम करतले
,, वां ,, दक्ष कर्णे	,, में ,, दक्ष कर पल्लवे
,, धां ,, वाम कर्णे	,, वं ,, वाम कर पल्लवे
,, प्रं ,, दक्ष नासायां	,, त्वं ,, हृदये
,, शं ,, वाम नासायां	,, यां ,, जठरे
,, मं ,, उत्तरोष्ठे	,, कां ,, नाभौ
,, नं ,, अधरोष्ठे	,, र्यं ,, गुह्ये
,, त्रें ,, ऊर्ध्वदंतपंक्तौ	,, मं ,, दक्षोरुमूले
,, लों ,, अधोदंतपंक्तौ	,, स्मं ,, वामोरुमूले
,, क्यं ,, जिव्हायां	,, द्वैं ,, दक्ष जानुनि
,, स्यां ,, कंठे	,, रिं ,, वाम जानुनि
,, खिं ,, दक्षांसे	,, विं ,, दक्ष वाम जंघयोः
,, लें ,, वामांसे	,, नां ,, दक्ष पादांगुलीषु
,, श्वं ,, दक्षमणिबंधे	,, शं ,, वाम पादांगुलीषु
,, रिं ,, वाम मणिबंधे	,, नम्,, पादयोः

॥ सद्यो मोहनमाकर्षणं च ॥२५॥

ज्ञानिनामपि चेतांसि देवी भगवती हि सा। बलादाकृष्य मोहाय महामाया प्रयच्छति।१।

अस्य संपुटेन शतावृत्त्या अथवा केवलं मंत्रस्य लक्ष जपेन सद्यो मोहन माकर्षणं च भवतीत्यनुभवसिद्धं ॥ अथ प्रयोगः ॥

ॐ अस्यश्री मार्कंडेय पुराणांतर्गत सप्तशती प्रथम चरितांतर्गत ज्ञानिनामपि चेतांसीति मंत्रस्य ब्रह्मा ऋषिः । गायत्रीच्छंदः । श्री महाकाली देवता। अमुक-वश्यार्थे जपे विनियोगः ।

॥ करन्यासः हृदयादि न्यासः ॥

ज्ञानिनामपि चेतांसि	अंगुष्ठाभ्यां नमः	ज्ञानिनामपि चेतांसि	हृदयाय नमः
देवी	तर्जनीभ्यां स्वाहा	देवी	शिरसे स्वाहाः
भगवती हि सा	मध्यमाभ्यां वषट्	भगवती हि सा	शिखायै वषट्
बलादाकृष्य	अनामिकाभ्यां हुं	बलादाकृष्य	कवचाय हुं
मोहाय	कनिष्ठिकाभ्यां वौषट्	मोहाय	नेत्रत्रयाय वौषट्
महामाया प्रयच्छति	करतलकरपृष्ठाभ्यां फट्	महामाया प्रयच्छति	अस्त्राय फट्

अथध्यानं—साध्यं सुपाशेन दृढेन बध्वा निपातयंतीं खलु साधकस्य ॥
पादाब्जयोः खड्गधरां त्रिनेत्रां भजामि दुर्गां जनवश्यसिद्धयै ॥१॥

ततो जपः पाठो वा ॥

॥२८३॥

॥ सद्यो मोहनमाकर्षणं च ॥२५॥

ज्ञानिनामपि चेतांसि देवी भगवती हि सा। बलादाकृष्य मोहाय महामाया प्रयच्छति।१।

अस्य संपुटेन शतावृत्त्या अथवा केवलं मंत्रस्य लक्ष जपेन सद्यो मोहन माकर्षणं च भवतीत्यनुभवसिद्धं ॥ अथ प्रयोगः ॥

ॐ अस्यश्री मार्कंडेय पुराणांतर्गत सप्तशती प्रथम चरितांतर्गत ज्ञानिनामपि चेतांसीति मंत्रस्य ब्रह्मा ऋषिः । गायत्रीच्छंदः । श्री महाकाली देवता। अमुक-वश्यार्थे जपे विनियोगः ।

॥ करन्यासः हृदयादि न्यासः ॥

ज्ञानिनामपि चेतांसि	अंगुष्ठाभ्यां नमः	ज्ञानिनामपि चेतांसि	हृदयाय नमः
देवी	तर्जनीभ्यां स्वाहा	देवी	शिरसे स्वाहाः
भगवती हि सा	मध्यमाभ्यां वषट्	भगवती हि सा	शिखायै वषट्
बलादाकृष्य	अनामिकाभ्यां हुं	बलादाकृष्य	कवचाय हुं
मोहाय	कनिष्ठिकाभ्यां वौषट्	मोहाय	नेत्रत्रयाय वौषट्
महामाया प्रयच्छति	करतलकरपृष्ठाभ्यां फट्	महामाया प्रयच्छति	अस्त्राय फट्

अथध्यानं—साध्यं सुपाशेन दृढेन बध्वा निपातयंतीं खलु साधकस्य ॥
पादाब्जयोः खड्गधरां त्रिनेत्रां भजामि दुर्गां जनवश्यसिद्ध्यै ॥१॥

ततो जपः पाठो वा ॥

॥२८३॥

॥ सर्वापन्निवारणं ॥२६॥

देविप्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोखिलस्य ॥
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति ॥१॥
अनेन संपुटितेन शतावृत्त्या लक्षजपेन वा सर्वापन्निवारणं स्यात् ॥

॥ अभीष्ट प्राप्तिः ॥२७॥

सर्व मंगल मांगल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यंबके गौरि नारायणि नमोस्तुते ॥१॥

अत्राद्येति........देशकालौ स्मृत्वा अमुककामः श्रीदुर्गा प्रीतये सर्वमंगल मांगल्येति मंत्रस्य सहस्रमयुतं लक्षं वा आवर्तनं करिष्ये ॥

सर्व मंगल मांगल्येति मंत्रस्य ईश्वर ऋषिः । अनुष्टुप छंदः । श्रीगौरी देवता ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः ।

सर्व मंगल मांगल्ये अंगुष्ठाभ्यां नमः एवं हृदयादि न्यासः

शिवे	तर्जनीभ्यां स्वाहा
सर्वार्थ साधिके	मध्यमाभ्यां वषट्
शरण्ये त्र्यंबके	अनामिकाभ्यां हूं
गौरि	कनिष्ठिकाभ्यां वौषट्
नारायणि नमोस्तुते	करतल करपृष्ठाभ्यां फट्

अस्य सप्त लक्ष जपः ॥ पायस होमस्तर्पण मार्जनादिरपि दशांशेन । एवंकृते अभीष्टसिद्धिर्भवति ॥

॥ पत्नी प्राप्तिः ॥२८॥

साधकः नाभि मात्रेंभसि स्थित्वा। ॐ क्लीं पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ॥ तारिणीं दुर्ग संसार सागरस्य कुलोद्भवताम् ॥ एतन्मंत्रं प्रतिदिनमेकसहस्रं जपेत् एवं अष्टचत्वारिंशद् (४८) दिवसैः पत्नीप्राप्तिर्भवति होमस्तर्पणं मार्जनं ब्राह्मणभोजनं पूर्ववत् दशांशेन पायसहोमः ॥

॥ महा भय निवृत्तिः ॥२९॥

सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते। भयेभ्यस्त्राहिनो देवि दुर्गे देवि नमोस्तुते स्वाहा ॥१॥

सर्व स्वरूपे मंत्रस्य शीघ्रं महाभय निवारणार्थे लक्ष चतुष्टयजपमहं करिष्ये इति संकल्प्य ॐ सर्वस्वरूपेति मंत्रस्य महेश्वर ऋषिः। अनुष्टुप् छंद। श्रीदुर्गा देवता महाभयनिवृत्यर्थे जपे विनियोगः ॥

॥ कर न्यासः ॥

ॐ	ह्रां	अंगुष्ठाभ्यां	नमः	एवं हृदयादि न्यासः
,,	ह्रीं	तर्जनीभ्यां	स्वाहा	चतुर्लक्ष जपः पायसेन दशांश होमः
,,	ह्रूं	मध्यमाभ्यां	वषट्	तर्पणादि पूर्ववत् नवसुवासिन्यः नवकुमार्य
,,	ह्रैं	अनामिकाभ्यां	हूं	श्च भोज्याः ताभ्योलंकारदक्षिणादिकं
,,	ह्रौं	कनिष्ठिकाभ्यां	वौषट्	च देयं। एवं महाभयनिवृत्तिः ॥
,,	ह्रः	करतलकरपृष्ठाभ्यां	फट्	

॥ वशीकरणं ॥३०॥

त्वं वैष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया ॥
संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ॥१॥

प्रत्यहं अष्टोत्तरशतजपेन वशीकरणम् लक्षजपेन इष्टकार्यसिद्धिः ॥
सप्तशत्या–संपुटितेनापि तदेव फलम् ।

॥ भगवती दर्शनं ॥३१॥

ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितं ॥ एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका ॥१॥

मुखे बदाम लवंगैलाखदिरयुतां तांबूलपट्टीं धृत्वा लक्षं जपेत तद्दशांशं कमलं घृतमधुयुतं जुहुयात् तदा भगवत्या दर्शनं भवति वरं ददाति ॥

॥ परचक्र भय निवृत्तिः ॥३२॥

ॐ ऐं ह्रीं हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितं। मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं ॥१॥

पर सैन्यं स्वदेश पलायनं कुरुते परचक्रादिभय निवृत्तिः कायानुसारं लक्षं लक्षाधिकं वा जपं कुर्यात दशांशं त्रिमधुरं होमः तर्पणादि पूर्ववत् ॥

॥ शत्रुसेना पलायनं ॥३३॥

ॐ हूं ततो धुतसटः कोपात्कृत्वानादं सुभैरवम्। पपातासुरसेनायां सिंहो देव्याः स्ववाहनम् ॥१॥

कार्यानुसारं अयुतं लक्षं तदधिकं वा ब्राह्मणद्वारा जपः ॥
त्रिमधुरैर्दशांश होमः । अरिसेनापलायनं झटिति भवेत् ॥

॥ स्वसैन्ये हर्षानंद वृद्धिः ॥३४॥

ॐ उत्पातमेघाः सोल्कोये प्रागासंस्ते शमं ययुः । सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ।१।
कार्यानुसारं पठेत् स्वसैन्ये हर्षानंदनिर्भयत्वं भवेत् ॥

॥ स्वसैन्ये बलादि वृद्धिः ॥३५॥

ॐयं रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्यु बलानि यत्र
दावानलोयत्र तथाब्धि मध्ये तत्रस्थितात्वं परिपासि विश्वम् ॥१॥
मंत्रपठनपूर्वकं स्वसैन्यप्रदक्षिणेन स्वसैन्यं बलवीर्यधैर्ययुक्तं युद्धक्षमं भवति ॥

॥ शत्रुर्निरायुर्भवेत् ॥३६॥

ॐ रं इतिमातृगणं क्रुद्धं मर्दयंतं महासुरान् । दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारि सैनिकाः ॥१॥
अमुकशत्रुर्निरायुर्भवेत् इति संकल्प्य प्रत्यहं सहस्त्रं जपेत् अयुतजपेन शत्रो-
रायुःक्षयोभवति ॥

॥ अतुल लक्ष्मी प्राप्तिः ॥३८॥

ॐ श्रीं ह्रीं श्रीं या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म विदधातु शुभानि सा नः ॥१॥

अयुतं लक्षं वा जपेत् क्षीरघृत मधुभिर्दशांशं जुहुयात् तदा अतुला लक्ष्मी-र्भवति सर्वे मनोरथाः सिद्ध्यंति प्रतिश्लोकं दीपाग्रे केवलं नमस्कार करणेनापि अति शीघ्रं सिद्धिर्भवति ॥

॥ पुत्र प्राप्तिः ॥३९॥

देवकी सुत गोविंद वासुदेव जगत्पते । देहि मे तनयं कृष्ण त्वामहं शरणंगतः ।१।

संतानार्थे इमं गोपाल संतानमंत्रं सप्तशत्या संपुटितं पठेत् एवं एकचत्वारिंशदिन पर्यंतं प्रतिदिनमेकपाठक्रमेण जपेत् होम तर्पण ब्राह्मण भोजनाद्यपि तद्दशांशेन एवं शतचंडीं सहस्रचंडीं च ब्राह्मणद्वारा पुत्रप्राप्तये कृता यथेप्सितं संतानं प्राप्नुयात् ॥

॥ अतुलित लक्ष्मी समृद्धि राज्यैश्वर्यप्राप्तये श्रीसूक्त प्रयोगः ॥४०॥

श्री सूक्त प्रयोग परायणस्य ये नियमा अग्रे निर्दिशितास्ताननुसृत्यैकनिष्ठः प्रयोगपरायणः स्यात् ॥

ॐ श्रीं ह्रीं श्रीं महालक्ष्मि कमले कमलालये प्रसीद प्रसीद ॐ श्रीं ह्रीं श्रीं महालक्ष्मि नमः ॥

दुर्गेस्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो मआवह ।१।

दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥

ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद ॐ श्रीं ह्रीं श्रीं महालक्ष्मि नमः ॥

॥२८८॥

Scanned with OKEN Scanner

तां म आवह ॥२॥	गंधद्वारां० ॥९॥
अश्वपूर्वां ॥३॥	मनसःकाम० ॥१०॥
कांसोस्मितां ॥४॥	कर्दमेन प्रजा० ॥११॥
चंद्रां प्रभासां ॥५॥	आपः सृजंतु० ॥१२॥
आदित्यवर्णे ॥६॥	आर्द्रांपुष्करिणीं० ॥१३॥
उपैतुमां ॥७॥	आर्द्रांयष्करिणी ॥१४॥
क्षुत्पिपासा० ॥८॥	तां म आवह० ॥१५॥
	यः शुचिः० ॥१६॥

इति पूर्ववत हिरण्यवर्णा स्थाने तांमआवह इत्यादि यः शुचिः पर्यंतं प्रत्येकं मंत्रं निधाय षोडशमंत्रपाठः कार्यः। एवं अस्यानुष्ठानं द्वादश शतं द्वादशसहस्रं तेनायुः कांत्यैश्वर्य पुत्रपौत्रसमृद्धिवृद्धिर्मनःकामना सिद्धिर्भवतीति रुद्रयामलोक्तिः।
श्रीसूक्तस्य षोडशमंत्राः अस्य पुस्तकस्य ३३ पृष्ठे विद्यन्ते तेषां सबीजानामबीजानां वा जपः॥

श्रीसूक्तस्यान्ये धनैश्वर्यादिप्राप्ति प्रयोगाः

श्रीसूक्तस्य अधोलिखितस्य प्रतिमंत्रस्य सप्तशत्याः संपुटीकरणेन शतावृत्तिं कुर्यात अथवा प्रत्येकमंत्रस्य केवलो वा जपः लक्षसंख्यात्मकः कार्यः तद्दशांशो होमस्तर्पण मार्जन ब्राह्मणभोजनमपि क्रमेण बोध्यं तेन तत्तन्मंत्रोक्तफलं प्राप्नुयात् ॥

४० हिरण्यवर्णा० ॥१॥ इतिऋचं जपेत् हिरण्यवृद्धिर्भवति चम्पकपुष्पं त्रिमधुप्लुतं सघृतं दशांशं जुहुयात् ॥१॥

४१ तांमआवह० ॥२॥ इति ऋचं जपेत् तिलाज्येन होमः सुवर्ण रौप्य समृद्धिर्भवति ॥२॥

४२ अश्वपूर्वां० ॥३॥ अनेन स्वगृहे सततं श्रीर्निवसति। बिल्वकांडस्य सघृत पायसस्य होमः ॥३॥

४३ कांसोस्मितां० ॥४॥ अनेन ऐश्वर्य पुत्र पौत्र सुखसमृद्धिर्भवति। बिल्व फल तिल पायस होमः ॥४॥

४४ चंद्रां प्रभासां० ॥५॥ अनेन यशोधनानुचरगृहाभिवृद्धिर्भवति बिल्वपत्र पायस जपापुष्प होमः ॥५॥

४५ आदित्य वर्णे० ॥६॥ इति ऋचं पठेत् त्रिमध्वक्तैर्बिल्वपुष्पफलैर्वा जुहुयात् बिल्वनिलयो बिल्वाशी एकविंशति रात्रं कुर्यात्तदंते नवसुवासिनींभोजयेत् तदा अलक्ष्मीर्नश्यति महाधनधान्यसमृद्धिर्भवति ॥६॥

४६ उपैतुमां० ॥७॥ इतिऋचं पठेत् जपापुष्पं जातिपुष्पं वा त्रिमध्वक्तं जुहुयात् तदा यशोवृद्धिर्भवति ॥७॥

४७ क्षुत्पिपासा० ॥८॥ इति ऋचं पठेत् श्वेत तिल कमल पुष्प बिल्व पत्र घृतं

होमः तदा महादारिद्र पीडितः सुखी भवति संपद्वृद्धिर्भवति कुलपरं परागतं द्रारिद्र्यं नश्यति ॥८॥

४८ गंधद्वारां० ॥९॥ इति मंत्रं पठेन कमलपुष्पैर्घृतमधु श्वेत तिलैर्होमः । सर्व-प्राणिभृतां वशीकरणं ऐश्वर्यधनधान्यसमृद्धिः स्यात ॥९॥

४९ मनसः काम० ॥१०॥ इति मंत्रं पठेत् विल्वफल नारिकेर बादाम द्राक्षा घृतं-होमः । वाकसिद्धिः पशु पुत्र यशः समृद्धिर्धनधान्यवृद्धिर्भवेत् ॥१०॥

५० कर्दमेन० ॥११॥ इति मंत्रं पठेत् आम्रफल नारिकेर द्राक्षा त्रिमधुघृतैर्जुहु-यात् । पुत्रफलं प्राप्नुयात् वंध्यात्वं नश्येत् नित्यं सर्वप्रकारेण सुखी स्यात् लक्ष्मीधनायुर्वृद्धिर्भवति ॥११॥

५१ आपः सृजन्तु० ॥१२॥ इति ऋचं पठेत श्रीहियवगोधूमैस्त्रिमधुघृतैर्जुहुयात् । धनधान्यसमृद्धिर्भवति लक्ष्मीवासः स्यात् पर्जन्यो वर्षति दुष्काल भय निवृत्तिः स्यात् राज्ञा चतुर्गुणो जपः कारयितव्यः ॥१२॥

५२ आर्द्रां पुष्करिणीं० ॥१३॥ पठेत् कमल घृतादिभिर्होमः आयुर्धनधान्यवृद्धिः पुत्र-मित्रबंधुजनवृद्धिर्भवति ॥१३॥

५३ आर्द्रां यःकरिणीं० ॥१४॥ पठेत् दधि मधु घृत विल्वफलैः सूर्यावर्तपुष्पैर्होमः सुवर्णरजतरत्नादिलाभो विपुलो भवेत् ॥१४॥

५४ तां म आवह० ॥१५॥ पठेत् कमलपुष्प नारिकेर बिल्वफल मधु घृत पायसाद्यै र्जुहुयात्। लक्ष्मीः स्थिरा भवति हिरण्यरत्नदासदासीगजरथाश्ववाहनादिलाभः स्यात् ॥१५॥

॥ उपर्युक्त श्रीसूक्तप्रयोग कर्तृणां नियमाः नारायणीयोक्ताः ॥

न जिघ्रेन्ना क्रमेच्चाब्जं तद्बीजं नच भक्षयेत्। नस्यान्म्लिष्टो नच छिंद्याद् बिल्वं भूमौशयीत च १

लवणामलकं वर्जेन्ना गादित्यतिथौ क्रमात्। पञ्चम्यामुत्तरे चश्री वर्ज्या प्रत्यङ्मुखोऽशने ।२।

बिल्वैर्नैमार्जयेदन्तान् त्रिसंध्यं प्रणमेच्चतान्। प्रातर्भक्ष्यास्तिलास्ते च धात्र्या लक्ष्मीं च भक्षयेत् ३

धारयेन्मूर्ध्नि तत्पुष्पमुत्तरे मधुरान्नभुक्। पायसं बिल्वबीजं च भक्षयेच्छुक्लपर्वणि ।४।

धान्यगोगुरुहुताशनराणां नो स्वपेदुपरि नाप्यनुवंशम् ॥
नोत्तरापरशिरा नच नग्नो नार्द्रपाणिचरणः श्रियमिच्छन् ॥
नाभ्यंज्यादपि तैलमेव रजनीं नैवानुलिंपेन्मुखे ॥५॥

॥ मैत्रीकरणं ॥५६॥

ॐ दमयंतीनलाभ्यां च नमस्कारं करोम्यहम्। अभिवादो भवेदत्र कलिदोष प्रशांतिदः ।१।

एकमत्यं भवेदेषां ब्राह्मणानां पृथग्धियाम्। निर्वैरता च जायेत संवादान्मे प्रसीद मे ।२।

इति मंत्र द्वय रूपं नलसूक्तं पठेत् सघृतं पायसं हुनेत् तदा वैरिणोः परस्परं वैरशांतिर्मैत्रीकरणं भवति ॥ ३५७

॥ कारागारमभय निवृत्तिः ॥५६॥

ॐ नमः सुते निर्ऋते तिग्मतेजोऽयस्मयं विचृताबन्धमेतम् ॥
यमेन त्वं यम्या संविदानोत्तमे नाकेऽधिरोहयेनम् ॥१॥

इति ऋचं संपुटितं पठेत् शतपाठे कृते बंधादि दुःखान्मोक्षो भवति ॥ प्रथमं साधकः पार्थिवं शिवलिंगं संपूज्य तत्समीपे पठेत ॥

॥ ज्वरशांतिः ॥५७॥

ॐ भस्मायुधाय विद्महे एकदंष्ट्राय धीमहि तन्नो ज्वरः प्रचोदयात् ॥ इति ज्वर गायत्रीं प्रतिदिनं सृष्टि–संहार–सृष्टि क्रमेण सप्तशती संपुटीकरणेन सप्तदिनैः क्षयज्वर जीर्णज्वर वातपित्त कफज द्विदोषज त्रिदोषादि सर्वजज्वराणां मुक्तिः स्यात् साधकः पार्थिवं शिवलिंगं संपूज्य तदग्रे जपं कुर्यात् एकादशशतं एकादशसहस्रं वा जपः॥

॥ शूलशांतिः ॥५८॥

प्रथमं पार्थिवं शिवलिंगं संपूज्य तदग्रे इमं मंत्रं जपेत ॥

ॐ मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥ इति मंत्रं एकादशशतं एकादशसहस्रं वा जपं कुर्यात् शतशत्या वा संपुटितं आवर्तनं कुर्यात् ॥

॥ शत्रुनाशनं ॥५९॥

(१) कृष्णवर्णे महद्रूपे बृहत्कर्णे भयंकरे। देवि देवि महादेवि मम शत्रुर्विनश्यतु ॥१॥

इति ऋचं प्रतिश्लोकं संपुटितं संहारक्रमेण सप्तशतीं शिवालये पठेत् तदा शत्रवो नश्यंति ॥ कटुतैलार्कमरिचैर्होमः ॥

(२) द्रुतं गच्छ महामाये कृत्ये माहेश्वरि प्रिये। रिपोर्बलं निहत्याशु पशुपुत्रांश्च नाशय ॥१॥

इति ऋचं शिवालये पठेत् सप्तशती पाठं अनेन संपुटितं संहारक्रमेण कुर्यात् शत्रूणां मूलच्छेदो भवति ॥

॥ कर्मणि दिग्भेदः ॥६०॥

पूर्वाभिमुखः धर्मार्थकाम मोक्षप्राप्त्यै–जपेत् हुनेच्च
दक्षिणाभिमुखः मारणे मोहने „ „
पश्चिमाभिमुखः शांतिकर्मणि „ „
उत्तराभिमुखः उच्चाटने „ „
स्वयं जपहोमाद्यशक्तश्चेत् शुचीन्ब्राह्मणान् वरयेत् ॥

॥ कार्यपरत्वे ब्राह्मणानां दिवसानां च सख्या ॥६१॥

अयुग्म ब्राह्मणैः कार्यं युग्मे निष्फलतां यजेत्। अयुग्मदिवसैः क्षिप्रं विद्ध्याचंडिका मखम् ॥१॥

॥ समाप्ति तिथि निर्णयः ॥६२॥

अष्टमी नवमी चैव पूर्णिमा च चतुर्दशी। यथैतेषु समाप्तिः स्यात् तथाऽऽरंभणमाचरेत् ।१।

॥ चंडीपाठे सृष्टि स्थिति संहार क्रम निर्णयः ॥

॥ कामना विशेषे तत्स्वीकारः ॥६३॥

आदिमारभ्य प्रजपेत्सृष्टिक्रम उदाहृतः। जपेच्छकादिमारभ्य समाप्य वरवर्णिनि ।१।
आद्याच्छकादि पर्यंतं स्थितिक्रम उदाहृतः। अंत्यमारभ्य साद्यंतं संहारोयं क्रमो भवेत् ।२।
श्रीकामे शांतिकामे च सृष्टिक्रम उदाहृतः। स्थितिपाठः सर्वकामे मुक्तिकामे च संहृतिः
अत्यंतापदि संप्राप्ते संहारस्तु विशेषतः ॥३॥

॥ हुतद्रव्याणां कामना विशेषे उपयोगः ॥६४॥

तदंते हवनं कुर्याद्दशांशेन जपस्य वै। तर्पणं मार्जनं विप्रभोजनं तद्दशांशतः ।१।

॥ धर्मार्थ काममोक्षार्थ ॥

हुनेत्सर्पिं प्रयुक्तांश्च तिलधान्यादितण्डुलान्। धर्मार्थकाममोक्षाणां संसिद्ध्यै पायसं हुनेत्।२।

॥ मारण मोहनोच्चाटन वश्यकर्मसु ॥

मारणे मोहने चैव तथोच्चाटन कर्मणि ॥ वश्ये—मांसं त्रिमध्वक्तं
स्तंभने—मातुल फलं ॥
मोहने—मधु पायसम् ॥३॥

॥२९५॥

Scanned with OKEN Scanner

॥ वक्ष्ये ॥

वक्ष्ये तु श्वेतसर्षपम् । पायसान्नैस्त्रिमध्वक्तैर्द्राक्षा रंभाफलादिभिः ।४।
मातुलुंगैरिक्षुदंडैर्नारिकेलैस्तिलैरपि । जातीफलैराम्रफलैरन्यैर्मधुरवस्तुभिः ।५।
सप्तशत्या दशावृत्त्या प्रतिमंत्रं हुतं चरेत्। तदशक्तो नमोदेव्यै मंत्रेणैव तु संख्यया ।
हुत्वा तत्फलमाप्नोति नात्र कार्या विचारणा ।६।

॥ पुरश्चरणक्रमः ॥६५॥

प्रत्येक काम्य प्रयोगे रहस्योक्त पूजाप्रकारो ग्रन्थारंभे लिखित एव ग्राह्यः यदा तु तत्तत्कामना भेदेन तत्तच्चरित्रांतर्गतस्य एकैकस्य मंत्रस्योपासनं क्रियते यथा ज्ञानिनामपि चेतांसि ॥ दुर्गेस्मृता हरसिभीति ॥ सर्वा बाधाप्रशमनं ॥ शरणागतदीनार्त ॥ एवमादयः तत्र प्रथमं पूर्वोक्तां पूजां समाप्य पुनस्तत्तन्मंत्र घटिततत्तच्चरित्रस्य तां तां देवतां संपूज्य तस्या निकटे दक्षे कालं वामे मृत्युं च सर्वारिष्टशांतये संपूज्य तत्तच्चरित्रगतस्तोत्रेण–नमो देव्यै–विश्वेश्वरीं–शक्रादयः–इत्यादिभिः तां तां देवतां स्तुत्वा तत्तन्मंत्रं जपेदिति क्रमः । यस्य यस्य मंत्रस्य ऋष्यादिकं नोपलभ्यते तत्रतत्र यच्चरित्रस्थः स मंत्रो भवति तच्चरित्रस्थं ऋषिदेवतादिकं तत्तन्मंत्रजपे ग्राह्यमिति संप्रदायः ॥

॥ नवचंडी पद्धतिः ७ ॥

॥ श्रीगणेशाय नमः ॥ श्रीनवदुर्गायै नमः ॥ अथ नवचंडी पद्धतिर्लिख्यते॥ ॥ प्रथमं हस्तमात्रं स्थंडिलं कृत्वा ॥ आपः क्षीरं शमी पूगं दधि चाक्षतचंदनं ॥ कुश दुर्वा हिरण्यं च अष्टांगा अर्घ उच्यते ॥१॥ कुंकुमादिपुष्पाक्षतैः सह ब्राह्मण-पूजार्थे सपत्नीको यजमानः अर्घं गृहीत्वा स्वस्त्ययनं ब्राह्मणाः पठेयुः ॥ स्वा-सनात्पश्चिमतः स्थितश्च यजमानः पत्नीसहितो मंडपे प्रविश्य तिलकं छेडाबंधनं ॥ सुमुहूर्त शुभलग्नं क्षेमं कल्याणं आरोग्यं निर्विघ्नेन शुभं भवतु ॥ इमं मंत्रेण ॥ यजमानहस्ते अर्घं दत्वा सपत्नीकः नालिकेरोदकपात्रं गृहीत्वा ॥ सर्वे ब्राह्मणा शांतिसूक्तं पठेयुः ॥ शक्रादयः सुरगणाः श्लोक ॥२२॥ सुशांतिर्भवतु ॥ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहं ॥ विष्नुं रुद्रं श्रियं देवीं वंदे भक्त्या सरस्वतीं ॥ स्नानक्षेत्रं नमस्कृत्य दीनानाथं निशाकरं ॥ धरणीगर्भ संभूतं शशि-पुत्रं बृहस्पतिं ॥ दैत्याचार्यंनमस्कृत्य सूर्यपुत्रं शनिश्चरं ॥ राहुं केतुं नमस्कृत्य सर्वारंभे विशेषतः ॥ शक्रादि देवताः सर्वा ऋषयश्च तपोधनाः ॥ गर्गमुनिं नम-स्कृत्य नारदं पर्वतं तथा ॥ व्यासं च्यवनमत्रिं च देवलं गौतमं कृपं ॥ अगस्त्यं च पुलस्त्यं च दक्षपुत्रं पराशरं ॥ भारद्वाजं च मांडव्यं याज्ञवल्क्यं च गालवं ॥

वसिष्ठं च पर्शुरामं जमदग्निं च गौतमं ॥ अन्ये विद्यातपोयुक्ता वेदशास्त्र विशारदाः ॥ तान् सर्वान् प्रणित्याथ करिष्यामोऽर्घपूजनं ॥ सुमुखश्चैक दंतश्च० ॥१॥

इहभुवनकोशेत्यादिप्रयोगः ॥ मम शास्त्रोक्त पुण्यफलावाप्त्यर्थं अस्मिन्पुण्याहे ममेहजन्मनि एतच्छरीरे सकलदुष्कृतनिवृत्यर्थं समस्तापन्निवृत्त्यर्थं इष्ट वस्तु प्राप्त्यर्थं शत्रुभय निवृत्यर्थं भूतप्रेतपिशाचादिभयनिवृत्यर्थं राजभय दस्युभय अनिल-भय संग्रामभय सर्वकाले सर्वाबाधाविनिर्मुक्तये धनधान्यसुतान्वित दीर्घायुः प्राप्तये परमपदगमनाय दशाश्वमेध यज्ञफलावाप्तये अप्सरमाला कुल विमान वरारोहणोत्तर शिवलोकगमन पूर्वक शाश्वत समायुक्त कल्पावच्छिन्न हर्ष विजय प्राप्त्यर्थं राजद्वारे महालक्ष्मीप्राप्त्यर्थं ॐ जयजय नवदुर्गे महिषमर्दिनी शुंभ निशुंभमर्दिनी धूम्रलोचन महिषासुर रक्तबीज चंडमुंडविनाशिनी शत्रूच्चाटन शत्रु-द्वेगकारिणी शत्रुस्तंभिनी शत्रुपरिवार नाशिनी शत्रुकीर्तिबलसेनाविनाशिनी शत्रुपराक्रमनाशिनी शत्रुपराजयकारिणी झटिति शत्रुभ्रंशकारिणा शत्रूणां दुःखदायिनी मम दुःखभंजिनी ममाभयदायिनी मम विजयकारिणी प्राप्तराज्यस्थैर्यकारिणी प्राणिमात्र वशकारिणी इह परत्र च देवासुर दैत्य दानव मुनि नरगण गंधर्व यक्षराक्षस वेतालाद्युपद्रव स्मरणमात्र विनाशिनी ॥ चतुष्पथ दुष्टमार्गावरोधन पर्वत क्षेत्रांतरारण्याटवी नदनदी गुहा दावानल जलाग्नि समुद्र वृक्ष

॥२९८॥

महावृक्ष दारुणदर्शन दुःस्वप्नभयंकर सिंहव्याघ्र गजतुरंगमसरीसृपदंष्ट्रादिभयविनाशिनी तिथिवारनक्षत्रयोगकरण लग्नमुहूर्ताहोरात्रपक्षमासर्त्वयनसंवत्सरोपद्रवविनाशिनी ममाभयदायिनी मम सपरिवारस्य रक्षाकारिणी सर्वोत्पातशांतिकारिणी समस्तवांछाफलप्रदायिनी देवी महादेवी अग्निजलविषमहाविषहालाहल विषाणां स्मरणमात्रेण हारिणी सर्पमहासर्पादि स्तंभिनी दृष्टिमात्रेण सकल शत्रुसेनादिस्तंभिनी झटिति आनंददायिनी यशोदायिनी धनधान्य गोमहिषी अश्वद्विपदचतुष्पददायिनी मांगल्यदायिनी बलबुद्धिपराक्रमदायिनी दृष्टिमात्रेण प्राणिमात्रसंमोहिनी स्मरणमात्रेण त्रैलोक्य मोहन वशकारिणी त्वमसि भगवती ॥ जयजय गौरि वागीश्वरि कालि कात्यायनि भवानि शक्ति पद्मे पद्मालये विजये अंबे अंबालिके कामदुघे अमृतधारे दशवक्त्रा दशभुजे त्रिशल्लोचने अनंतस्वरूपे अगणितरूप धरे असंख्य घट पीयूषधारामृतवर्षिणि मातर्लक्ष्मि भगवति जयजय जगदंबे तव प्रीत्यर्थं श्रीभगवद्व्यासप्रोक्तं मार्कंडेयपुराणांतर्गत सप्तशती स्तोत्रं सावर्णिः सूर्यतनय इत्यारभ्य सावर्णिर्भविता मनुरित्यंतं दुर्गा श्रीभगवती महाकाली महालक्ष्मी महासरस्वती माहात्म्यं आत्मश्रेयोर्थं शास्त्रोक्तपुण्यफलावाप्त्यर्थं मम सकुटुंबस्य क्षेमायुरारोग्य परमश्री सुखावाप्त्यर्थं सर्वोपद्रवविनाशनार्थं भूत भव्य भविष्य त्रिविधो त्पातशांत्यर्थं प्राक् जन्म कोटि लक्षानां गुरुलघ्वादि पापानां बुद्धिपूर्वाबुद्धिपूर्व-

काणां सद्भ्यासकृतानां महापापानां सर्वेषां प्रध्वंसनार्थं उत्तरोत्तरमैश्वर्यादि-परममंगलसुखावाप्त्यर्थं श्रीमहाकाली महालक्ष्मी महासरस्वतीप्रीत्यर्थं कृत क्रियमाणकरिष्यमाणकर्मणां फलावाप्त्यर्थं अभिलषितमनोरथानां सिद्ध्ये पूर्वो-पयाचित नवचंड्याख्यकर्मप्रारंभनिमित्तं आधिव्याधिजरामृत्युभयशोकनिवृत्त्यर्थं अलक्ष्मिविनाशनार्थं दशविधलक्ष्मीफलप्राप्त्यर्थं प्राप्तलक्ष्मीस्थिरीकरणार्थं धर्मार्थकाममोक्षार्थं नवचंड्याख्यकर्म प्रारंभनिमित्तं आचार्यप्रमुखानां समस्त ऋत्विजानां अर्घ्यसंपादनं वरणमहं करिष्ये ॥

॥ द्विजप्रार्थना ॥ पावनाः सर्ववर्णा० ॥ इत्यादि० स्वागतं भो द्विजश्रेष्ठामद-नुग्रहकारकाः ॥ इदमर्घ्यमिदं पाद्यं भवद्भिः प्रतिगृह्यतां ॥ अर्घोअर्घोअर्घः प्रतिगृह्य-तां प्रतिगृह्णामि ॥ आसनेउपविश्य कुंकुमाक्षतान् गृहीत्वा ॥ नवचंडीकर्मणि यजनको जगतां ब्रह्मापूज्यो अर्घेण उदङ्मुखः ॥ आचार्यःप्राङ्मुखः ॥ पश्चात्ऋत्विजउदङ्मुखाः ॥ ५–६–९ ब्राह्मणानां वरुणं० ॥ ब्रह्मन् एतत्ते० ॥ गोत्रप्रवरवेदशाखाध्यायिनं आचार्य त्वामहं वृणे इति यवाक्षतान्दक्षिणजानौनामुक्त्वा वृतोऽस्मीति प्रतिवचनं॥ यत्फलंकपि० ॥ पादप्रक्षालनं० ॥ नमोब्र० ॥ कुंडलमुद्रि० ॥ सर्वेषां एवं वरुणं ॥ स्वपादप्रक्षालनं ॥ आचमनं प्रा० ॥ अर्घ्यविसर्जनं ॥ यदाबध्नेति० यजमानहस्ते कंकणबंधनं ॥ तं-पत्नीभि० पत्नीहस्ते कंकणबंधनं० ॥ दधिक्रा० दधिवंदनं ॥ कांडात्० दुर्वामार्जनं ॥

। याः फलि० फलमहणं वरुणश्राद्धं ॥ आचमन प्राणायाम ॥ उपास्मै० ॥५॥ इदंविष्णु० ।१। अपवित्रः० ॥ आयातुवरुणश्राद्धापहारा० ॥ सर्वेषां पवित्रतास्तु अस्तु देश काल पाक पाक पात्र द्रव्य श्रद्धा संपदस्तु ॥ नवचंड्याख्यकर्मप्रारंभनिमित्तं वरुणश्राद्धमहं करिष्ये ॥ वरुणश्राद्धनिमित्तं॥ ब्रह्मणे इदमासनं ॥ कुंडलमुद्रिका वांसांसि तत्प्रत्याम्नायेन मनः संकल्पितं द्रव्यं ब्रह्मणेअर्चनगंधादि प्रीयतां वः स्वाहा ॥ अत्र चंदनं च पुष्पं ॥ प्रसादात ॥ इदमार्चितंवो ज्योतिः सूर्यो ज्योतिः दीपक ज्योतिः पुष्पं अस्य वरुणश्राद्धपरिपूर्णतास्तु आचमनं ॥ यथा सम्पन्नं ब्राह्मणभोजनं ॥ वृतेभ्यो ब्राह्मणेभ्यः भोजनं वः स्वाहा ॥ अस्य वरुणश्राद्धस्यार्चनविधेः परिपूर्णतास्तु अस्तु परिपूर्णं ॥ दक्षिणा मुखवासं च वः स्वाहा ॥ सुप्रोक्षितायस्तु ॥ अभिवादयामि तिलकं आशीर्वादः ॥ अद्यपूर्वोच्चरितं वरुणश्राद्धविधेः परिपूर्णतास्तु ॥ इति वरुणश्राद्धम् ॥

अथदिग्रक्षणं ॥ ॐ रक्षोहणम्वलगहनम्वैष्णवीमिदमहन्तम्वलगमुत्किरामि यम्मेनिष्ट्योयममात्योनिचखानेदमहन्तम्वलगमुत्किरामियम्मे समानोयमसमानोनिचखानेदमहन्तमम्वलगमुत्किरामियम्मेसबन्धुर्य्यमसबन्धुर्निचखानेदमहन्तम्वलगमुत्किरामियम्मेसजातोयमसजातोनिचखानोत्कृत्याङ्किरामि ॥१॥ रक्षोहणोवोवलगहनः प्रोक्षामिवैष्णवान्रक्षोहणोवोवल गहनोवनयामिवैष्णवान्रक्षोहणोवोवलगहनोवस्तृणामिवैष्णवान्रक्षोहणोवैवलगहनाउपदधामि वैष्णवीरक्षोहणोवांम्वलगहनोपर्यूहामिवैष्ण-

वीष्णवमसिवैष्णवास्थ ॥२॥ रक्षसाम्भागोसिनिरस्तःरक्षऽइदमह ०ॅ० रक्षोभितिष्ठामीदमह ०ॅ० रक्षोवबाधऽइदमह ०ॅ० रक्षोधमन्तमोनयामि ॥ घृतेनद्यावापृथिवीप्रोर्णुवाथांव्वायोव्वेस्तोकानामग्निराज्यस्यव्वेतुस्वाहास्वाहाकृतेऽऊर्ध्वनभसंमारुतङ्गच्छतम् ।३। रक्षोहाव्विश्वचर्षणिरभियोनिमयोहते ॥ द्रोणे सधस्थमासदत् ॥४॥

अपसर्पन्तुतेभूतायेभूताभूमिसंस्थिताः ॥ येभूताविघ्नकर्तारस्तेनश्यन्तुशिवाज्ञया ॥१॥
अपक्रामन्तुभूतानिपिशाचाः सर्वतोदिशं ॥ सर्वेषामविरोधेन चण्डीकर्मसमारभे ॥२॥
यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वतः ॥ स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्र गच्छतु ॥३॥
भूतानिराक्षसा वापियेऽत्रतिष्ठन्तिकेचन ॥ तेसर्वेप्यपगच्छन्तुचण्डीकर्म करोम्यहं ॥४॥
इतिमन्त्रैरीशानादिसर्वदिक्षु विकिरेत् ॥ उदकोपस्पर्शः ॥ इतिदिग्रक्षणम् ॥

अथ पञ्चगव्यकरणं ॥ गायत्र्या गोमूत्रंॐतत्सवितु० ॥१॥ गन्धद्वारामिति गोमयं ॥ ॐगन्धद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ॥२॥ आप्यायस्वेति क्षीरं ॐआप्यायस्वसमेतुतेव्विश्वतःसोमवृष्ण्यम ॥ भवाव्वाजस्यसङ्गथे ॥३॥ दधिक्राव्णइति दधि ॐदधिक्राव्णो० ॥४॥ तेजोसीत्याज्यं ॐतेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्टन्देवयजनमसि ॥५॥ देवस्यत्वेति कुशोदकं ॐदेवस्यत्वासवितुः० ॥६॥ ॐइति प्रणवेन यज्ञकाष्ठेनालोड्य आपोहिष्ठेतित्रिभिर्मन्त्रैः आत्मानंकर्मभूमिंयज्ञसंभारांश्चप्रोक्षेत् ॥इतिपञ्चगव्यकरणं भूमिप्रोक्षणंच॥

अथ भूमिपूजनं ॥ ॐभूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधत्री ॥ पृथिवींय्यच्छपृथिवीन्द ० ० हपृथिवीम्माहि ० ० सीः ॥ ॐभूर्भुवःस्वःपृथिकूर्मानन्तदेवताभ्योनमः इतिमन्त्रेणषोडशोपचारैःपूजयेत् ॥ इतिभूमिपूजनं ॥

ततो यजमानश्च श्रीफलं वा पूगीफलं गृहीत्वा अस्य यागस्य निष्पत्तो भवंतोभ्यर्थिता मया ॥ सुप्रसादं प्रकर्त्तव्यंशांतिके विधिपूर्वकं ॥१॥ श्रीफलं स्थंडिलाग्रे मुक्त्वा ॥ भूतशुद्ध्यादिएकादशन्यासान् कृत्वा ॥ पश्चाज्जापकाः जपध्वं ॥ पाठकाः पठध्वं ॥

अथानंतरं कुशांडीकर्म ॥ अत्राद्य०शुभपुण्यतिथौअस्मिन्सग्रहमखचंडीप्रयोगकर्मणि पञ्चभूसंस्कारपूर्वकं अग्नि प्रतिष्ठापनं करिष्ये ॥ स्थंण्डिले पञ्चभूसंस्काराः । अथातो गृह्यस्थालीपाकानां कर्म, दर्भैः परिसमृह्य, गोमयेनोपलिप्य, स्रुवेणोल्लिख्य, अनामिकांगुष्ठेनोद्धृत्य, उदकेनाभ्युक्ष्य, अग्निमुपसमाधाय ॥१॥

अग्निपूजनम् ॥ ॐअग्निंदूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ२ऽआसादयादिह अग्न्याहरणपात्रेसाक्षतोदकं निषिच्य ॥ अग्निमुखंकृत्वाध्यायेत् ॥ ॐचत्वारिशृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य॥त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२ऽआविवेश॥ सप्तहस्तश्चतुःशृङ्गःसप्तजिह्वोद्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मितः ॥१॥ स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा ॥ विभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं ॥२॥ तोमरंव्यजनंवामेघृतपात्रंचधारयन् ॥ आत्माभिमुखमासीनएवंरूपोहुताशनः ॥३॥

भोअग्ने वैश्वानर शाण्डिल्यगोत्र शांडिल्यासितदेवलेतित्रिप्रवर भूमिमातः वरुणपितः मेषध्वज प्राङ्मुख मम सम्मुखोभव ॥ शान्तिकेवरदनामाग्निप्रतिष्ठाप्य ॐअग्नि-पुरुषायनमः ॥ इतिमन्त्रेण नैर्ऋत्यकोणे वहिरग्नि षोडशोपचारैः संपूज्य प्रार्थयेत् ॥ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनं॥ हिरण्यवर्णमनलं समृद्धं विश्वतोमुखं ॥ इत्यग्निप्रतिष्ठापनं ॥ पश्चात महालक्ष्मीनां स्थापनं ॥ आचमनं ॐ ऐं आत्मतत्त्वायस्वाहा ॥ ॐ ह्रीं विद्यातत्त्वाय स्वाहा ॥ ॐ क्लीं शिवतत्त्वाय स्वाहा॥ ॐ ऐं ह्रीं क्लीं सर्वतत्त्वाय स्वाहा इत्यनेन मंत्रेण करौ प्रक्षाल्य ॥ ततो मूलेन आचमनं प्राणायामः ॥ अत्राद्येति पठित्वा शास्त्रोक्तफलप्राप्त्यर्थं मम नवचंड्याख्यकर्मप्रारंभनिमित्तं श्रीमहाकालीमहालक्ष्मी-महासरस्वतीनां सकलशानां आवाहनंस्थापनं तथा मूर्त्तिनां टंकण छेदन दाहयनादि दोष-परिहारार्थं अग्न्युत्तारणपूर्वकं दशविधस्नानानंतरं प्रतिष्ठापूजनाद्यर्चनमहं करिष्ये॥ इति संकल्प्य॥ रक्तवस्त्रेणाच्छाद्य।अक्षतैर्यंत्रं विधाय प्रथमं बिन्दु त्रिकोणं षट्कोणं वर्त्तुलं अष्टदलं वर्तुलं चतुर्विंशतिदलं भूगृहं चतुर्द्वारसुशोभितं॥ ततः पीठशक्तिस्थापनं॥ ॐजं जयांआवाह-यामि स्थापयामि ॥ विं विजयांआ० ॥ अं अजितांआ० ॥ अं अपराजितांआ० ॥ नं नित्यांआ० ॥ विं विलासिनींआ० ॥ दों दोग्ध्रींआ० ॥ अं अघोरांआ० । मध्येमंगलां आ० ॥ इति पीठशक्तिस्थापनं ॥

यथोक्तरूपां महालक्ष्मीं ध्यात्वा ॥ अक्षस्रक्परशुंगदेषु कुलिशं इति मंत्रं पठित्वा

त्रिकोणमध्ये ह्रीं महालक्ष्मीं आवाहयामि स्थापयामि॥ दक्षिणे ऐं महाकालीं आ० खड्गं चक्र०॥ उत्तरे क्लीं महासरस्वतीं आ० घंटाशूल०॥

षट्कोणे। पूर्वादि॥ ॐनंदजां आ०॥ रक्तदंतिकां आ०॥ शाकंभरीं आ०॥ दुर्गां आ० भीमांआ०॥ भ्रामरींआ०॥

अष्टदलेषुपूर्वादि॥ ॐ ब्राह्मीं० माहेश्वरीं० कौमारीं० वैष्णवीं० वाराहीं० नारसिंहीं० ऐंद्रीं० चामुंडां० दलाग्रेषु ॐ असितांग भैरवं० रुरुभैरवं० चंड भैरवं० क्रोधभैरवं० उन्मत्त भैरवं० कपालीभैरवं० भीषणभैरवं० संहारभैरवं०॥

चतुर्विंशतिदलेषु विष्णुमायां० चेतनां० बुद्धिं० निद्रां० क्षुधां० शक्तिं० तृष्णां० क्षांतिं० जातिं० लज्जां० शांतां० श्रद्धां० कांतिं० लक्ष्मीं० वृत्तिं० स्मृतिं० धृतिं० श्रुतिं० दयां० तुष्टिं० पुष्टिं० मातरं० भ्रांतिं०॥ चितिं०॥२४॥

तत्पूर्वद्वारे ॐ गं गणेशं० दक्षिणे क्षं क्षेत्रपालं० पश्चिमे वं वटुकं०॥ उत्तरे यां योगिनीं०॥

तत आग्नेयादि वेतालानां चतुष्टयं अग्निमुखं वेतालं० प्रेतवाहनवेतालं० ज्वालामुखवेतालं० धूम्राक्षवेतालं०॥

प्रसिद्ध पूर्वादि दिक्पालानां इंद्रं० अग्निं० यमं० नैर्ऋतिं० वरुणं० वायुं० कुबेरं० ईशानं० ब्रह्माणं० अनंतं०॥१०॥

॥३०५॥

आयुधानि वज्रं॰ शक्तिं॰ दंडं॰ खड्गं॰ पाशं॰ अंकुशं॰ गदां॰ त्रिशूलं॰ पद्मं॰ चक्रं॰ ॥ ऐरावतं॰ मेषं॰ महिषं॰ प्रेतं॰ मकरं॰ मृगं॰ शिविकां॰ वृषभं॰ हंसं॰ गरुडं॰ इति वाहनानि ॥ इति महालक्ष्मी स्थापनं ॥

अथ ग्रहमण्डलदेवता स्थापनं ॥ तत्र पीठमध्ये वर्तुले द्वादशाङ्गुले मण्डले प्राङ्मुखं सूर्यं रक्तपुष्पाक्षतैरावाह्य ॐआकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ॐभूर्भुवः स्वः कलिंगदेशोद्भवकाश्यपगोत्ररक्तवर्णभोसूर्यइहागच्छइहतिष्ठ ॐसूर्यायनमःसूर्यआवाहयामि स्था॰ ॥१॥ तत आग्नेय्यांदिशिचतुरस्रेचतुर्विंशत्यङ्गुलेमण्डलेप्रत्यङ्मुखंसोमंशुक्लपुष्पाक्षतैः आ॰ ॐइमन्देवाऽसपत्न ॰ ॰ सुवध्वमहतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्यायेन्द्रस्येन्द्रियाय॥इममुष्यपुत्रममुष्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्माकम्ब्राह्मणाना ॰ ॰ राजा॥ ॐभू॰ यमुनातीरोद्भवआत्रेयगोत्र शुक्लवर्णभोसोमइहागच्छइ॰ ॥२॥ ततोदक्षिणस्यांदिशित्रिकोणेऽयङ्गुलेमण्डलेदक्षिणाभिमुखंभौमंरक्तपुष्पाक्षतैः आ॰ ॐअग्निर्मूर्धादिवः ककुत्पतिः पृथिव्याऽअयम् ॥ अपा ॰ ॰ रेता ॰ ॰ सिजन्वति ॥ ॐभू॰ अवंतिदेशोद्भवभारद्वाजगोत्ररक्तवर्णभोभौमइहा॰ ॥३॥ ततऐशान्यांदिशिबाणाकारेचतुरङ्गुलेमण्डलेउदङ्मुखंबुधंपीतपुष्पाक्षतैःआ॰ ॐउद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्ते॰स ॰ ॰ सृजेथामयंच ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ॐभू॰मगधदेशोद्भव-

आत्रेयगोत्रपीतवर्णभोबुधइ० ॥४॥ ततउत्तरस्यांदिशिलंबदीर्घचतुरस्रेपट्टाकारेषडङ्गुलेमण्डलेबृहस्पतिंपीतपुष्पाक्षतैः आ० ॐबृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतंप्रजाततदस्मासुद्रविणन्धेहिचित्रम् ॐभू० सिंधुदेशोद्भवआङ्गिरसगोत्रपीतवर्णभोबृहस्पतेइ० ॥५॥ ततःपूर्वस्यांदिशिपञ्चकोणेनवाङ्गुलेमण्डलेप्राङ्मुखंशुक्रंशुक्लपुष्पाक्षतैःआ० ॐअन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिवत्क्षत्रम्पयःसोमम्प्रजापतिः ॥ ऋतेनसत्यमिन्द्रियम्विपान ॰ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॐभू० भोजकटदेशोद्भवभार्गवगोत्रशुक्लवर्णभोशुक्रइ० ॥६॥ ततःपश्चिमायांदिशिधनुराकारेद्व्यङ्गुलेमण्डलेप्रत्यङ्मुखंशनिंकृष्णपुष्पाक्षतैः आ० ॐशन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शय्योरभिस्रवन्तुनः ॥ ॐभू० सौराष्ट्रदेशोद्भवकाश्यपगोत्रकृष्णवर्णभोशनैश्चरइहा० ॥७॥ ततोनैर्ऋत्यांदिशिशूर्पाकारेद्वादशाङ्गुलेमण्डलेदक्षिणाभिमुखंराहुंकृष्णपुष्पाक्षतैः आ० ॐकयानश्चित्रऽआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॐभु० राठिनापुरोद्भवपैठिनसगोत्रनीलवर्णभोराहो इ० ॥८॥ ततोवायव्यांदिशिध्वजाकारेषडङ्गुलेमण्डलेदक्षिणाभिमुखान्केतून्धूम्रपुष्पाक्षतैः आ० ॐकेतुंकृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॐभृ० अन्तर्वेदिसमुद्भवाः जैमिनिगोत्राः धूम्रवर्णाः भोः केतवः इहागच्छत इहतिष्ठत केतुभ्योनमः केतून्आवाह० ॥

ततोधिदेवतास्थापनंग्रहदक्षिणपार्श्वे ॥ ॐत्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्धनम ॥

उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ सूर्यदक्षिणापार्श्वे ॥ ॐभू० भो ईश्वर इहागच्छ इहतिष्ठ ईश्वरायनमः एवं सर्वत्र ॥ ॐश्रीश्चतेलक्ष्मी० सोमदक्षिणपार्श्वे ॥ ईश्वरआवाहयामि ॥१॥ उमे इ० उमायै० उमांआ० ॥२॥ ॐयदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीपात् ॥ श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यम्महियातन्तेऽअर्व्वन् ॥ भौमदक्षिणापार्श्वे ॐ भू० स्कन्द इहा० स्कन्दाय० स्कन्दं आ० ॥३॥ ॐविष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवेत्वा बुधदक्षिणपार्श्वे ॐ भू० विष्णोइहा० विष्णवेनमः विष्णुंआ ॥४॥ ॐआब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यःशूरऽइषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वा नाशुःसप्तिःपुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्जन्योवर्षतुफलवत्योनऽओषधयःपच्यन्तान्योगक्षेमोनःकल्पताम् गुरुदक्षिणपार्श्वे ॐभू० ब्रह्मन्इ० ब्रह्मणेन० ब्रह्माणंआ० ॥५॥ ॐसजोषाऽइन्द्रसगणोमरुद्भिःसोमम्पिबवृत्रहाशूरविद्वान् ॥ जहिशत्रूँ २ रपमृधोनुदस्वाथाभयङ्कृणुहिविश्वतोनः ॥ शुक्रदक्षिणपार्श्वे ॥ ॐभू० इन्द्रइहा० इन्द्राय० इन्द्रंआ० ॥६॥ ॐयमायत्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्म्मायस्वाहाघर्म्मःपित्रे ॥ शनिदक्षिणपार्श्वे ॐभू० यम इ० यमाय० यमं आ० ॥७॥ ॐकार्षिरसिसमुद्रस्यत्वाक्षित्याउन्नयामि ॥ समापोऽअद्भिरग्मतसमोषधीभिरोषधी राहुदक्षिणपार्श्वे ॥ ॐभू० काल इ० कालाय० कालं० ॥८॥ ॐचित्रावसोस्वस्ति-

तेपारमशीय ॥१॥ केतुदक्षिणपार्श्वे ॥ ॐभू० चित्रगुप्त इ० चित्रगुप्ताय० चित्रगुप्तं०॥

ततःप्रत्यधिदेवतास्थापनं ग्रहवामपार्श्वे ॥ ॐअग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ २ आसदयादिह ॥१॥ सूर्यवामपार्श्वे॥ ॐ भू० अग्ने इ० अग्नये० अग्निं० ॥ ॐ आपोहिष्ठा० ॥२॥ सोमवामपार्श्वे ॥ ॐभू० आपइहागच्छत इहतिष्ठत अद्भ्योनमः अपः आवा० ॥ ॐस्योनापृथिवि० ॥३॥ भौमवामपार्श्वे ॥ ॐभू० पृथिवि इ० पृथिव्यै० पृथिवीं आ०॥ॐइदम्विष्णुर्विचक्रमेत्रेधानिदधेपदम्॥समूढमस्यपा ँ सुरे स्वाहा ॥४॥ बुधवामपार्श्वे ॥ ॐभू० विष्णो इहा० विष्णवे० विष्णुं आ० ॥ ॐत्रातारमिन्द्रमविता-रमिन्द्र ँ हवेहवेसुहव ँ शूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्र ँ स्वस्तिनोमघवा-धात्विन्द्रः ॥५॥ गुरुवामपार्श्वे ॥ ॐभू० इन्द्रइहा० इन्द्रा० इन्द्रं आ० ॥ ॐअदित्यै रास्नासीन्द्राण्याऽउष्णीषः ॥ पूषासिघर्मायदीष्व ॥६॥ शुक्रवामपार्श्वे ॥ ॐभू० इन्द्राणि इहा० इन्द्राण्यै० इन्द्राणीं आ० ॐप्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताब-भूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवय ँ स्यामपतयोरयीणाम् ॥७॥ शनिवामपार्श्वे ॥ ॐभु० प्रजापते इहा० प्रजापतये० प्रजापतिं आ० ॥ ॐनमोस्तुसर्पेभ्योयेकेचपृथि-वीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यःसर्पेभ्योनमः ॥८॥ राहुवामपार्श्वे ॐभू० सर्पा इहा-गच्छत सर्पेभ्यो० सर्पान् आ० ॥ ॐब्रह्मजज्ञानम्प्रथमम्पुरस्ताद्विसीमतःसुरुचोवेनऽ-आवः ॥ सबुध्न्याऽउपमाऽऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥९॥ केतुवामपार्श्वे॥

॥२०९॥

ॐभू० ब्रह्मन्इ० ब्रह्मणे न० ब्रह्माणं आ० ॥

ततो विनायकादिपञ्चदेवताश्चावाहयेत् ॥ ॐगणानान्त्वा० ॥१॥ राहोरुत्तरतः ॐभू० गणपते इहा० गणपतये० गणपतिं आ० ॥ ॐअम्बेअम्बिके० ॥२॥ शनेरुत्तरतः ॐभू० दुर्गे इहा० दुर्गायै० दुर्गां० ॥ ॐआनोनियुद्भिः शतिनीभिरध्वर ँ सहस्त्रिणीभिरुपयाहियज्ञम् ॥ वायोऽस्मिन्त्सवनेमादयस्वयूयम्पातस्वस्तिभिःसदानः ॥३॥ रवेरुत्तरतः ॐभू० वायो इहा वायवे न० वायुं आ० ॥ ॐघृतङ्घृतपावानःपिबतव्वसाम्वसापावानःपिबतान्तरिक्षस्यहविरसिस्वाहा॥दिशःप्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यः स्वाहा॥४॥ राहोर्दक्षिणे॥ॐभू० आकाश इहा० आकाशाय० आकाशं आ० ॥ ॐयावाङ्कशामधुमत्यश्विनासूनृतावती ॥ तयायज्ञम्मिमिक्षताम् ॥५॥ केतुदक्षिणे ॥ ॐभू० अश्विनौ इहागच्छतं इह तिष्ठतं अश्विभ्यां० अश्विनौ आवाहयामि ॥ अथवा विनायकादयः पंचोत्तरत एव स्थाप्या इति संप्रदायः ॥ उत्तरतः क्षेत्राधिपतिं वास्तोष्पतिं चावाहयेदित्येके ॥ ॐनहिस्पशमविदं० ॥१॥ उत्तरे ॐभू० क्षेत्राधिपते इ० क्षेत्राधिपतये० क्षेत्राधिपतिं आ० ॥ ॐवास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे ॥१॥ उत्तरे ॐभू० वास्तोष्पते इ० वास्तोष्पतये० वास्तोष्पतिं आ० ॥ इतिक्रतुसाद्गुण्यदेवताः ॥

अथ प्रागादितः पीठसमन्ताद्दिक्पालानष्टौदशवासूर्याभिमुखानावाहयेत्॥ ॐत्राता-

रमिन्द्र० ॥१॥ पूर्व ॐभूः इन्द्र० इन्द्रं आ० ॥ ॐत्वन्नोऽअग्नेतवदेवपायुभिर्म्मघोनोरक्षतन्वश्च-
वन्द्य ॥ त्रातातोकस्यतनयेगवामस्यनिमेष ० रक्षमाणस्तवव्रते ॥२॥ आग्नेय्यां ॐभू०
अग्ने इहाग० इ० अ० अग्निं आ० ॥ ॐयमायत्वांगिर० ॥३॥ दक्षिणे ॐभू० यम इ० इ०
य० यमं आ० ॥ ॐअसुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्य-
मस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥४॥ नैर्ऋत्यां ॐभू० निर्ऋते इ० नि-
र्ऋतये० निर्ऋतिं आ० ॥ ॐतत्त्वायामि० ॥५॥ पश्चिमे ॐभू० वरुण इ० वरुणाय०
वरुणं आ० ॥ ॐआनोनियुद्भिःशतिनीभिरध्वर ० सहस्त्रि० ॥६॥ वायव्यां ॐभू०
वायो इहा० वा० वायुं आ० ॥ ॐवय ० सोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजाव-
न्तःसचेमहि ॥७॥ उत्तरे सोम इहा० सो० सोमं आ० ॥ ॐतमीशानंजगतस्तस्थुषस्प-
तिन्धियञ्जिन्वमवसेहूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये
॥८॥ ईशान्यां ॐभू० ईश्वर इ० ई० आवा० ॥ ॐअस्मेरुद्रामेहनापर्व्वतासोवृत्रहत्येभर-
हूतौसजोषाः ॥ यःश ० सतेस्तुवनेधायिपज्रऽइन्द्रज्येष्ठाऽअस्माँ २ अवन्तुदेवाः ॥९॥
पूर्वेशानयोर्मध्ये ऊर्ध्वायां ॐभू० ब्रह्मन् इहा० ब्र० ब्रह्माणं आ० ॥ ॐस्योनापृथिविनो०
॥१०॥ निर्ऋतिपश्चिमयोर्मध्ये अधःस्थायां ॐभू० अनंत इहा० अनन्ताय अनन्तं आ०
इतिदिक्पालदेवताः ॥

ॐमनोजूतिर्जु० ॥ एषवै० ॥ सूर्याद्यावाहितग्रहमण्डलदेवताः सुप्रतिष्ठिताः

वरदा भवन्तु ॥ पूजामन्त्रस्तु ॥ ॐमहाऽऊर्याहुतयोव्यन्तोविप्रायमतिम ॥ तेषा त्रिविशिप्रियाणा म्वोहमिपमूर्य्य ०‿० समग्रभमुपयामगृहीतोसीन्द्रायत्वायुष्टङ्गृह्ला-म्येपतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥१॥ ॐभूभुवःस्वः सूर्यादिनवग्रहमंडलदेवताभ्यो नमः इति षोडशोपचारैः संपूज्य विशेषार्घं दद्यात ॥ आदित्याद्या ग्रहाः सर्वे पीठे चात्र प्रतिष्ठिताः ॥ ते गृह्णतु मया दत्तमिममर्घं नमोऽस्तु वः ॥१॥—ततः प्रार्थयेत् ॥ आयु-र्वियां धनं सौख्यं यशः शौर्यं च पुष्कलं ॥ पुत्रान्दत्त धनंदत्त सर्वान्कामांश्च दत्त मे ॥१॥ अनया पूजया आदित्यादिग्रहमण्डलदेवताः प्रीयन्तां ॥ इतिग्रहस्थापनं ॥ तत ईशान्यां रुद्र-कलशस्थापनं ॥ महोयौरित्यादिप्रसन्नो भवसर्वदेत्यन्तंपृष्ट २० द्रष्टव्यं ॥ तत्र सांगरुद्रजपः ॥

पश्चात ईशान्यां नवग्रह मंत्रदेवता स्थापनं ॥ पश्चाद्यंत्रमध्ये महालक्ष्मीकलशस्थापनं तद्विधानं पृष्ठ २॥मध्ये ज्ञेयं ॥ भूरसि० भुमिशोधनं ॥ आजिघ्रेति कलशस्था० ॥ महीद्यौ रिति-उदकपूरणं० ॥ गंधद्वारामि निगंधं ॥ याओषधीतिसर्वौषधीप्रक्षेपः ॥ व्रीहयश्चमेतियवा प्र० ॥ कांडात्कांडादूर्वाप्र० ॥ अश्वत्थेवोइतिपंचपल्लवप्र० ॥धान्यमसीतिधान्य प्र० ॥स्योनापृथिवीति पंचसप्तवा स्थानात्मृतिकाप्र० ॥ याः फलिनीफलप्र० ॥ परिवाजपतिपंचरत्नप्र० ॥ हिरण्य-गर्भे० हि ण्य० ॥ सुजातो ज्योतिषावन्त्वे० ॥ पूर्णादर्वीतिपूर्णपात्रं ॥ मनोज्यूतिरिप्रतिष्टा ॥

अथ मूर्त्तिनांवह्न्युत्तारणं ॥ आचमनं प्राणायामः अत्राद्य० सर्वासां मूर्त्तिनां वह्न्युत्तारण महं करिष्ये ॥ वह्निसूक्तं ॐभूर्भुवःस्वः ॥ समुद्रस्यत्वा ॥१॥ हिमस्यत्वा ॥२॥ उपज्मन् ॥३॥

अपामिदं ॥४॥ अग्नेपावक ॥५॥ मनःपावक ॥६॥ पावकया ॥७॥ नमस्तेहरसे ॥८॥ त्र्यंबदेवेद् ॥९॥ जेदेवादेवानाम ॥१०॥ जेदेवादेवेषु ॥११॥ प्राणदाअपानदा ॥१२॥ इतिवह्निसूक्तं॥ दशविधस्नानं॥ इंद्रस्यकोडा इति भस्मस्नानं॥१॥ स्योनापृथिवीति मृत्तिका ॥२॥ गायत्र्या गोमूत्रं ॥३॥ मानस्तोकेति गोमयस्नानं॥४॥ पयःपृथिवीति पयः० ॥५॥ दधिक्राव्ण इतिदधि० ॥६॥ घृतंघृतेति घृतं० ॥७॥ याओषधीति सर्वौषधी० ॥८॥ याः फलिनीति फलं० ॥९॥ देवस्यत्वेति कुशोदकस्नानं ॥१०॥

अथ मूर्तीनां प्राणप्रतिष्ठा । ॐ आं ह्रीं क्रों आसां महालक्ष्म्यादिमूर्तीनां प्राणा इह प्राणाः ॐ आं ह्रीं क्रों आसां मूर्तिनां।जीव इह स्थितः । ॐ आं ह्रीं क्रों आसां मूर्तीनां सर्वेंद्रियाणि इह स्थितानि। ॐ आं ह्रीं क्रों आसां मूर्तीनां वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाः इहागत्य सुखं चिरं तिष्ठंतु स्वाहा । ततः प्रतिष्ठा । तदस्तुमित्रा ऋक् । मनोजूति०।यजुः । वाक्प्राणो० । साम । महालक्ष्म्यादि यंत्राधिष्ठातृदेवताः सकलशांतमूर्तिसहिताः सुप्रतिष्ठिता वरदा भवंतु । सुप्रतिष्ठितेषु इदमत्र चंदनं च पुष्पं । ततः प्रतिष्ठानंतरं स्थापनोक्तपूजामारभेत् ॥

अथ नवग्रहपूजनं । आचमनं प्राणानायम्य अद्याद्य० । शास्त्रोक्त पु० । नवचंड्याख्यकर्मनिमित्तंमहालक्ष्मीप्रीत्यर्थंमहालक्ष्मीपीठे स्थापितदेवतानां सकलशानां मूर्त्तिसहितानांपोडशोपचारपूजनाख्यंनमहं करिष्ये॥ पीठे मंडूकात्परतत्त्वांतं पूजयेत् ॥ तद्यथा–

नत्वा पुष्पाक्षतानादाय पीठमध्ये ॐमं मंडूकाय नमः ॥१॥ ॐ कं कालाग्निरुद्राय नमः ॥२॥ ॐ अं आधारशक्त्यै नमः ॥३॥ ॐ कूं कूर्माय नमः ॥४॥ ॐ अं अनंताय नमः ॥५॥ ॐ पृं पृथिव्यै नमः ॥६॥ ॐ क्षीं क्षीरसागराय नमः ॥७॥ ॐ रं रत्नद्वीपाय नमः ॥८॥ ॐ रं रत्नमंडपाय नमः ॥९॥ ॐ कं कल्पवृक्षाय नमः ॥१०॥ ॐ रं रत्नवेदिकायै नमः ॥११॥ ॐ रं रत्नसिंहासनाय नमः ॥१२॥ आग्नेयाम् ॐ धं धर्माय नमः ॥१३॥ नैर्ऋत्याम् ॐ ज्ञां ज्ञानाय नमः ॥१४॥ वायव्ये ॐ वैं वैराग्याय नमः ॥१५॥ ऐशान्ये ॐ ऐं ऐश्वर्याय नमः ॥१६॥ पूर्वे ॐ अं अधर्माय नमः ।१७। दक्षिणे ॐ अं अज्ञानाय नमः ।१८। पश्चिमे ॐ अं अवैराग्याय नमः ।१९। उत्तरे ॐ अं अनैश्वर्याय नमः ।२०। पुनः पीठमध्ये । ॐ आं आनंदकंदाय नमः ।२१। ॐ सं संविन्नालाय नमः ।२२। ॐ सं सर्वतत्त्वकमलासनाय नमः ।२३। ॐ प्रं प्रकृतिमयपत्रेभ्यो नमः ।२४। ॐ विं विकारमयकेसरेभ्यो नमः ।२५। ॐ पं पंचाशद्वर्णाढ्यकर्णिकाभ्यो नमः ।२६। ॐ अं अर्कमंडलाय द्वादशकलात्मने नमः ।२७। ॐ सों सोममंडलाय षोडशकलात्मने नमः ।२८। ॐ वं वह्निमंडलाय दशकलात्मने नमः ।२९। ॐ सं सत्त्वाय नमः ।३०। ॐ रं रजसे नमः ।३१। ॐ तं तमसे नमः ।३२। ॐ आं आत्मने नमः ।३३। ॐ पं परमात्मनेनमः ।३४। ॐ अं अंतरात्मने नमः ।३५। ॐ ह्रीं ज्ञानात्मने

॥३१४॥

नमः ।३६। ॐ मं मायातत्त्वाय नमः ।३७। ॐ कं कलातत्त्वायनमः ।३८। ॐ विं वियातत्त्वाय नमः ।३९। ॐ पं परतत्त्वाय नमः ॥४०॥ इति पीठदेवताः संस्थाप्य प्रयोगोक्तनवपीठशक्तीः पूजयेत् ॥

पीठशक्तिपद्मपत्रेपुपूर्वादि ॥ ॐ जयायैनमः ॐ विजयायै नमः ॥ ॐ अजितायै नमः ॥ अपराजितायै नमः ॥ विमलायै नमः ॥ दोग्ध्र्यै नमः ॥ अघोरायै नमः ॥ कर्णिकायां मंगलायैनमः ह्रींसर्वशक्तिकमलासनाय नमः ॥ इति गंधाद्यैः संपूज्य ॥

अथ षोडशोपचारैर्देवीपूजा रुद्रयामले ॥ ध्यायामि मनसा दुर्गा नाभिमध्ये व्यवस्थितां ॥ आवाहयेत्ततो दुर्गा संसारभयतारिणीं ॥१॥ कल्याणजननीं सत्यां कामदां करुणालयां ॥ अनंतशक्तिसंपन्नां दुर्गामावाहयाम्यहं ॥२॥ इति आवाहनं । देवेशि भक्तिसुलभे परिवारसमन्विते ॥ यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ॥ इति संप्रार्थ्य ॥ दुर्गे देवि सुरेशानि ज्ञानमार्गप्रदे शिवे ॥ आसनं मणिभूपाढ्यं गृहाण त्वं सुरेश्वरि ॥ इति आसनं ॥ कात्यायनि महादुर्गे चामुंडे शंकरप्रिये ॥ पाद्यं गृहाण देवेशि भद्रकालि नमोस्तुते ॥ इतिपाद्यं ॥ जगत्पूज्ये त्रिलोकेशि सर्वदानवभंजिनि ॥ अष्टांगार्घ्यं मया दत्तं देवि विश्वार्त्तिहारिणि ॥ इति अर्घ्यं ॥ ज्ञानमूर्त्ति भद्रकालि दिव्यमूर्त्ति सुरेश्वरि ॥ स्नानं गृहाण देवेशि तीर्थोदकविभूषितं ॥ इति स्नानं ॥ वस्त्रं स्वच्छं महार्हं वै पदसूत्रविनिर्मितं ॥ गृहाण सुभगे देवी पट्टकूलं सुरार्चितं ॥ इति

वस्त्रं ॥ सुरासुरशिरोरत्ननिघृष्टचरणांबुजे ॥ अलंकारान् गृहाण त्वं नानारत्नविभूषितान् ॥ इति अलंकारान्स० ॥ श्रीखंडागरुकर्पूरगोरोचनाभिसंयुतं ॥ गृहाण गंधं देवेशि सर्वकामफलप्रदे ॥ श्रीमहालक्ष्म्यै गंधं समर्पयामि ॥ अनामिकाङ्गुष्ठाभ्यां गंधं समर्पयेत् ॥

अथावरणपूजां कुर्यात् ॥ त्रिकोणमध्ये ह्रीं महालक्ष्म्यै अष्टादशभुजायै महिषमर्दिन्यै नमः ॥ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये देवो प्रथमावरणार्चनं ॥१॥

दक्षिणे ॥ गं महाकाल्यै सायुधायै सवाहनायै नमः । उत्तरे ॥ क्लींमहासरस्वत्यै-सायुधायैसवाहनायै नमः ॥ अभीष्टसि० द्वितियावरणार्चनं ॥२॥

षट्कोणे ॥ ॐनंदायै० रक्तदंतिकायै शाकंभर्य्यै० दुर्गायै० भीमायै० भ्रामर्य्यै० ॥६॥ अभीष्टसि० तृतीयावर्णा० ॥

अष्टदले ॥ ब्राह्म्यै० ॥ माहेश्वर्य्यै० ॥ कौमार्य्यै० ॥ वैष्णव्यै० ॥ वाराह्यै० ॥ नारसिंह्यै० ॥ ऐन्द्र्यै० ॥ चामुंडायै० ॥ अभीष्ट० ॥ चतुर्थाव० ॥

दलाग्रे ॥ असितांगभैरवाय० ॥ रुरुभैरवाय० ॥ चंडभैरवाय० ॥ क्रोधभैरवाय० ॥ उन्मत्तभैरवाय० ॥ कपालीभैरवाय० ॥ भीषणभैरवाय० ॥ संहारभैरवाय० ॥ अभीष्ट० ॥ पंचमावर० ॥

चतुर्विंशतिदले ॥ ॐविष्णुमायायै० ॥ चेतनायै० ॥ बुद्ध्यै० ॥ निद्रायै० ॥ क्षुधायै० ॥ छायायै० ॥ शक्तये० ॥ तृष्णायै० ॥ क्षांत्यै० ॥ जात्यै० ॥ लज्जायै० ॥ शांत्यै० ॥ श्रद्धायै० ॥ कांत्यै० ॥ लक्ष्म्यै० ॥ धृत्यै० ॥ वृत्त्यै० ॥ श्रुत्यै० ॥ स्मृत्यै० ॥ दयायै० ॥ तुष्ट्यै ॥ पुष्ट्यै० ॥ मातृरूपिण्यै० ॥ भ्रांत्यै० ॥ अभीष्ट० ॥ षष्टावर० ॥

पूर्वे । गं गणेशाय० ॥ दक्षिणे क्षं क्षेत्रपालाय० ॥ पश्चिमे वं वटुकाय० ॥ उत्तरे ॥ यां योगिन्यै० ॥ अभिष्ट० ॥ सप्तमा० ॥

आग्नेयादि ॥ अग्निमुखवैतालाय० ॥ प्रेतवाहनवैतालाय० ॥ ज्वालामुखवै० ॥ धूम्राक्षवै० ॥ पूर्वे इंद्राय० ॥ आग्नेयां अग्नये० ॥ दक्षिणे यमाय० ॥ नैर्ऋत्यां निर्ऋतये ॥ पश्चिमे वरुणाय ॥ वायव्यां वायवे ॥ उत्तरे कुबेराय ॥ ईशान्यां ईशानाय० ॥ पूर्वेशानयोर्मध्ये ऊर्ध्वे ब्रह्मणेनमः ॥ पश्चिमनैर्ऋतयोर्मध्ये अधः अनंताय नमः ॥ अभिष्ट अष्टमा० ॥

वज्राय० ॥ शक्तये० ॥ दंडाय० ॥ खड्गाय० ॥ पाशाय० ॥ अंकुशाय० ॥ गदायै० ॥ त्रिशूलाय० ॥ पद्माय० ॥ चक्राय० ॥ इत्यायुधानि ॥ ऐरावताय० ॥ मेषाय० ॥ महिषाय० ॥ प्रेताय० ॥ मकराय० ॥ मृगाय० ॥ शिबिकाय० ॥ वृषभाय० ॥ हंसाय० ॥ गरुडाय० ॥ इतिवाहनानि ॥ अभिष्ट० ॥ सर्वावरणार्चनं ॥

नानापुष्प विचित्राढ्यां पुष्पमालां सुशोभनां ॥ प्रयच्छामि महादेवि गृहाणत्वं

सुरेश्वरि ॥१॥ इतिपुष्पं ॥ सिंदूरं शोभनं रक्तं रंजनं सुमनोहरं ॥ सर्वदं कामदं चैव सिंदूरं प्रतिगृह्यतां ॥ इतिसिंदूरं ॥ रक्तराजीवसंतेज उत्सवे परमं शुभं ॥ मस्तके धार्यते देवी सर्वांगं ददातु मे ॥ इति गुलालं ॥ श्वेतं सुगंधमंबीरं सुराणां वल्लभं सदा ॥ भक्त्या समर्पितं देवि गृहाण त्वं महेश्वरि । इति अंबीरं । माल्यादीनि सुगंधीनि मालत्यादीनि वै शिवे ॥ मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥ पुष्पं ॥ ततोधूपं देवाग्रे धूपपात्रं निर्धूमांगारं संन्यस्य फट् इति संप्रोक्ष्य, गुग्गुलं घृतसंयुक्तम-गुर्वादिसमायुतं ॥ धूपं दशांगं गृहाण भद्रकालि नमोस्तुते ॥ धूपं सम० तर्जन्यंगुष्ठे-न धूपमुद्रां प्रदर्श्य ॥ रक्तसूत्र रसवर्ति गोघृतेन च पूरितं ॥ दीपं गृहाण देवेशि नमस्ते लोकसुंदरि ॥ इति दीपं स० ॥ फलेन फलितं सर्वं त्रैलोक्यं सचराचरं ॥ फलदान प्रभावेण सफलाः संतु मनोरथाः ॥ इतिफलं ॥ इदं फलं मया देवी स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ श्रीफलेनअर्घ्यं समर्पयामि ॥ क्रियान्नरस संयुक्तनानाभक्ष्यसुसंस्कृतं ॥ लेह्यचोष्यसमायुक्तमन्नं देवि गृहाणमे ॥ सांगायैसायु-धायैमहालक्ष्म्यैनमः मोदकनैवेद्यं समर्पयामि ॥ नमस्ते देवदेवेशि सर्वतृप्तिकरं परं ॥ अखंडानंदसंपूर्णं गृहाण जलमुत्तमं सांगा० ॥ आचमनीयं स० ॥ गृहाण देवि तांबूलं कर्पूरेण सुवासितं ॥ पूगीफलसमायुक्तं सचूर्णं मुखमंडले ॥ सांगायै० मुखवासं स० ॥ नीराजनं जगद्ध्वनिमंत्रमातः स्वाहा ॥ इतिघंटां संपूज्य ॥ तां वादयन् ॥ पंचधा सप्तधा वा

नीराजयेत ॥ मंगले कालिके दुर्गे महिषासुरमर्दिनि ॥ नीराजनं मया दत्तं गृहाण सुरसुंदरि ॥ इति आरार्तिकं० ॥ दुर्गे देवि नमस्तुभ्यं सकलासुरनाशिनि ॥ पुष्पाजलिं गृहाण त्वं मया दत्तं सुरार्चिते ॥ इति पुष्पाजलिं सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोस्तुते ॥ इति नमस्कारं ॥ मया जन्मसहस्रेषु अर्जितं पापसंचयं ॥ तत्सर्वं नाशयेत्क्षिप्रं प्रदक्षिणं पदेपदे ॥ सां० प्रदक्षिणाम् ॥ पूजायाः पूरणार्थं तु दक्षिणा दीयते मया ॥ तां गृहाण महेशानि पूजां मे सफलां कुरु ॥ सांगा० महाल० हिरण्यदक्षिणां समर्पयामि ॥

पूजानंतरं केचित् नवार्णवमंत्रस्यः अष्टोत्तरशतं जपं कुर्वंति ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे ॥ इति नवार्णवमंत्रः ॥ महिषघ्नि महामाये चामुंडे पापहारिणि ॥ यशो देहि धनं देहि तव भक्तिं च देहि मे ॥ इति प्रार्थना ॥ तैलं। छत्रं। चामरं। आदर्शं। राजोपचारं। महानिराजनं। पुष्पांजलिं देव्या-श्चरणे आत्मानंनिवेद्य ॥ निर्माल्यपुष्पाणि स्वशिरसि निधाय ॥ यथासुखं विहरेत्। तिलकं। आशिर्वादः ॥ अग्रपूर्वो० एवं ॥ शास्त्रोक्तपुण्य० ॥ महालक्ष्मीपीठे स्थापित देवतानां प्रसादात्सर्वविधेः परिपूर्णतास्तु ॥ गृहे वृद्धिरस्तु ॥ बहु पुत्रं बहु धनं चायुष्यं चास्तु ॥ पश्चात् कुमारिकापूजनम् ॥

Scanned with OKEN Scanner

मंत्राक्षरमयीं देवीं मातृणांरूपधारिणीम् ॥
नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥
इति कुमारीमावाह्य यथासंभवं पूजयेत् कुशकंडिका० ॥

दक्षिणतो ब्रह्मासनं यावत्कर्म समाप्येत तावत्त्वं ब्रह्मा भव ॥ भवामीति प्रति वचनम् ॥ उत्तरतः प्रणितासनं ॥ ईशानादिपूर्वाग्रदर्भैरेकमुष्ट्या परिस्तरणम् । पात्रासादनम् ॥ कुशपवित्रच्छेदनानि त्रीणि पवित्रे द्वे ॥ प्रोक्षणीपात्रम् ॥ आज्यस्थाली ॥ चरुस्थाली ॥ संमार्जन कुशाः ॥ उपयमनकुशाः ॥ समिधस्तिस्रः ॥ स्रुवः ॥ स्रुचः ॥ आज्यं ॥ तंदुलाः ॥ पूर्णपात्रम् ॥ दक्षिणा ॥ समिधः ॥ हुतद्रव्यम् ॥ द्वयोरुपरित्रीणि निधाय॥द्वयोर्मूलेन त्रिः प्रदक्षिणीकृत्य ॥ त्रिछिय छेदयेत् ॥ नखैर्न स्पृशेत् ॥ त्रिस्त्याज्य ॥ द्विग्राह्य, सपवित्रांगुहस्तेन प्रोक्षण्यांत्रिपूरणम् ॥ उद्दिगनम् ॥ उत्पवनम् ॥ देशेनिधानम ॥ सव्यहस्तकरणम् ॥ ताभिस्तामेव प्रोक्षणम् ॥ आज्यस्थाल्याः प्रोक्षणम् ॥ चरुस्थाल्याः प्रोक्षणम ॥ सन्मार्गकुशानां प्रोक्षणम् ॥ उपयमनकुशानां प्रोक्षणम॥समिधः प्रोक्षणम् समिधानांप्रोक्षणं। स्रुवस्य प्रो०। स्रुचस्य प्रो०। आज्यस्य प्रो०। तंदुलानां प्रो०। असंचरेअग्निनैर्ऋतयोर्मध्येप्रोक्षणीनिधानम्॥ आज्यस्थाल्यामाज्यनिर्वापः। अपद्रव्यनिरसनम्॥ चरुस्थाल्यां चरुनिर्वापः॥ तंदुलांस्त्रिःप्रक्षाल्य ॥ प्रणितोदकमासिच्य ॥ दक्षिणतः आज्याधिश्रयणम् ॥ मध्ये चरोरधिश्रयणम् ॥ गृहितोल्मुकेन

उभयोः पर्यग्निकरणम् ॥ तदिध्मनमग्नौ प्रक्षेपः ॥ अर्धशृते चरोरधिश्रयणम् ॥ सन्मार्गं कुशैः स्रुवसंमार्जनम् ॥ स्रुचसंमार्जनं ॥ अग्रेअग्रं ॥ मूलेमूलम् ॥ प्रणितोदकेनाभ्युक्षणम् ॥ पुनः प्रतपनं ॥ देशेनिधानम् ॥ आज्योद्वासनं ॥ चरोरुद्वासनम् ॥ अपद्रव्यनिरसनम् ॥ प्रोक्षणीशेषोदकेनाग्निपर्युक्षणम् ॥ सपवित्रांबुहस्तेन वह्निं कुर्यात्प्रदक्षिणम् ॥ हव्यवाट्सलिलंटप्त्वाविभेतःसंमुखोभव ॥ ब्रह्मान्वारंभे स्रुवेण होमः ॥

प्रजापतिं इंद्रं अग्निं सोमं एषां आज्येन प्रत्येकं एकैकयाऽऽहुत्या तथा आदित्यादिनवमहान् अर्कादिसमिचरुतिलाज्यद्रव्यैः प्रत्येकं प्रतिद्रव्येण अष्टाष्टसंख्याभिराहुतिभिः जुहुयात् ॥ अधिदेवता प्रत्यधिदेवताश्चतुश्चतुः संख्याभिश्च गणपत्यादिपंच क्षेत्रपाल वास्तोस्पति इंद्रादि दशदिक्पालांश्च द्वाभ्यां द्वाभ्यामाहुतिभ्यां जुहुयात् ॥ ततः अग्निं वायुं सूर्यं अग्निं वरुणं सवितारं विष्णुं विश्वान् देवान् मरुतः स्वर्कान् वरुणं आदित्यं अदितिं प्रजापतिं एता अंगप्रधानार्थदेवता आज्येन अस्मिन्नवचंड्याख्ये कर्मण्यहं यक्ष्ये इति संकल्प्य अग्न्यन्वाधानं ॥

देशकालौ स्मृत्वा मया ब्राह्मणद्वारा कृतनवचंडीजपतत्संपूर्णतासिद्ध्यर्थं स्थापित देवतानां पाठजप दशांशेन तिलादिमिश्र पायसद्रव्येण होमं करिष्ये ॥ ततः समहनवचंडीजपदशांशहोमं कर्तुं मंगलनामानमग्निं प्रतिष्ठाप्य ध्यायेत षोडशोपचारैः पूजयेत् ॥

उत्थाय तिस्रःसमिधोभ्याधाय स्वाहा ॥ ततः आघारावाज्यभागो जुहुयात ॥ ॐनमः प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ ॐ इंद्राय स्वाहा इदमिंद्राय न मम ॥ इत्याघारो ॥

ॐ अग्नये स्वाहा इदमग्नये न मम ॐ सोमाय स्वाहा इदं सोमाय न मम ॥ इत्याज्य भागौ ॥

पंच वरुणाहुतयः ॥ वरुणस्योत्तंभनमसि स्वाहा इदं वरुणाय न मम ॥ वरुणस्य स्कंभसर्जनीस्थस्स्वाहा इदं वरुणाय न मम । वरुणस्य ऋतसदन्यसि स्वाहा इदं वरुणाय न मम ॥ वरुणस्य ऋतसदनमसि स्वाहा इदं वरुणाय न मम ॥ वरुणस्य ऋतसदनमासीदस्वाहा इदं वरुणाय न मम ॥

अथ व्याहृतिहोमः ॐभूःस्वाहा इदमग्नये नमम ॥ ॐभुवः स्वाहाः इदं वायवे नमम॥ ॐ स्वः स्वाहा इदं सूर्याय नमम॥ भूर्भुवः स्वः स्वाहा इदं प्रजापतये न मम॥

ॐ ऐं महाकाल्यै स्वाहा ॐ ह्रीं महालक्ष्म्यै स्वाहा ॐ क्लीं महासरस्वत्यै स्वाहा ॥

ततः नंदादि भ्रामरीपर्यंतं षडाहुतयः ॥

ततः ब्राह्म्यादि चामुंडापर्यंतं अष्टाहुतयः ॥

ततः असितांगभैरवादि संहारभैरव पर्यंतं अष्टाहुतयः ॥

ततः विष्णुमायादि भ्रांति पर्यंतं चतुर्विंशति देवीनां आहुतयः ॥

ततः गणपत्यादि योगिनीपर्यंतं चतुराहुतयः ॥

ततः अग्निमुखवैतालादि धूम्राक्षवैताळ पर्यंतं चतुराहुतयः ॥

ततः इंद्रादि अनंत पर्यंतं दशदिग्पालाहुतयः ॥

ततः वज्रादि चक्रपर्यंतं दशायुधानामाहुतयः ॥

ततः ऐरावतादि गरुडपर्यंतं दशवाहनानामाहुतयः ॥

ततः मंडूकादि परतत्त्वपर्यंतं चत्वारिंशदाहुतयः ॥

ततः जयादि मंगलापर्यंतं पीठशक्तीनां नवाहुतयः ॥

ततः नर्वाणमंत्रमष्टोत्तरशतं जुहुयात् ॥

ततः सावर्णिः सूर्यतनयो–सावर्णिर्भविता मनुःपर्यंतं ७०० हुत्वा पुनः नवार्णमंत्रमष्टोत्तरशतं जुहुयात् ॥

द्राक्षेशुपूगनारिंगजंबीरवीजपूरकं॥ उतती नारिकेरं च दाडिमानि फळानिच ॥१॥

ततः याःफलिनीर्जा० इतिमंत्रेण फलहोमः॥ त्र्यंबकेन गुग्गुळुहोमः ॥ गणानांत्वा० इतिमोदकेन गुडेन वा गणपतिहोमः ॥ सजोपेति मंत्रेण च सर्पावाथेति मंत्रेण सर्पपहोमः ॥ हिरण्यवर्णां० इतिश्रीसूक्तस्यषोडशमंत्रैः महालक्ष्म्यैस्वाहा इति एकाहुत्या लक्ष्मीहोमः ॥ ततः चरुशेषेण हुतद्रव्यशेषेण च स्विष्टकृताऽऽहुतिं दद्यात् ॐअग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते नमम ॥

॥ अथ नवाहुतयः ॥

ॐ भूःस्वाहा इदमग्नये न मम ॥ ॐ भुवः स्वाहा इदं वायवे न मम ॥ ॐ स्वः स्वाहा इदं सूर्याय न मम ॥ ॐ त्वन्नो अग्ने० स्वाहा इदमग्निवरुणाभ्यांनमम ॥ ॐ सत्वन्तो अग्ने० स्वाहा इदमग्निवरुणाभ्यां न मम ॥ ॐ अयाश्चाग्ने० स्वाहा इदमग्नये न मम ॥ ॐ येते शतं० स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भयः स्वर्केभ्यश्च नमम ॥ ॐ उदुत्तमं० स्वाहा इदं वरुणायाऽऽदित्यायाऽदितये न मम ॥

ततः होमांते स्थापितदेवतानां पुनः नाममंत्रेण पूजनं अत्राय० ॥ स्थापितदेवतानां पुनः पूजनमहं करिष्ये इति संकल्पः ॥ गंधाक्षत पुष्पधूपदीपादि पंचोपचारैः पूजनं ॥ संकल्पः कृतस्यनवचंड्याख्यकर्मणः परिपूरणार्थ हवनकर्मसांगतासिद्ध्यर्थं इन्द्रादिदशदिक्पालानां गणपत्यादि चतुर्द्वारपालानां तथाचस्थापितदेवतानां पूजनवलिदानमहं करिष्ये ॥

॥ अथ बलिदानं ॥

मूलांते श्रीमहालक्ष्म्यै नमः पायसबलिं समर्पयामि इतिमहाकाल्यादियोगिन्यंतयंत्रस्थावरणदेवताभ्यः प्रत्येकं प्रत्येकं सर्वाभ्यो बलिं दद्यात् ॥

अथकुष्मांडबलिविधानं ॥ आचम्य प्राणानायम्य देशाद्युच्चार्य मम सकुटुंबस्य सर्वारिष्टप्रशांति सर्वाभीष्टसिद्धि कल्पोक्त फलावाप्तिद्वारा श्रीमहाका० ३ तीदेवताप्रीत्यर्थं श्री नवचंडीकर्मांगत्वेन कूष्मांडबलिदानंकरिष्ये ॥ मूलेन मुख्य देवतां पंचोपचारैः संपूज्य तत्पुरतःस्वयमुदङ्मुखो बलिं प्राङ्मुखं पीठे वस्त्रगुंठीतं कूष्मांडं निधाय ॐकूष्मांडबलयेनमः इति आवाहनवस्त्रगंधादिभिः संपूज्य अभिमंत्रयेत् ॥ पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणं ॥१॥ चंडिकाप्रीतिदानेनदातुरापद्विनाशनं ॥ चामुंडाबलिरूपाय बले तुभ्यं नमोनमः ॥२॥ यज्ञाय बलयः सृष्टाः स्वयमेव स्वयंभुवा ॥ अतस्त्वां घातयाम्यद्ययस्माद्यज्ञे मतो वधः ॥ ततः शस्त्रं गंधादिना संपूज्य अभिमंत्रयेत् ऐंह्रींश्रीं रसना त्वं चंडिकायाः सुरलोकप्रसाधकः ॥ ह्रांह्रींखड्ग आंहुंफट् इति हस्ते शस्त्रं गृहीत्वा ॐ कालिकालिवज्रेश्वरि लोहदंडायै नमः इति पठन् छित्वा छेदनावसरे न विलोकयेत् ॥ कौशिकी रुधिरेणाप्यायतामिति देव्यै अर्धं निवेद्य अवशिष्टार्धस्य पंचभागान्कृत्वा पूतनायै बलिभागं निवेदयामि। चरक्यै बलि०। विदार्यै० बलि०। पापराक्षस्यै बलि० ॥ ततोमाषपिष्टपशुं शत्रुं शस्त्रेण छित्वा स्कंदाय पश्वर्धं समर्पयामि ॥ विशिखाय पश्वर्धं स० इति समर्प्य शेषं रक्षोभ्यो हरेत ॥ मंत्रास्तु ॐह्रींस्फुरस्फुर ॐक्रींॐहूंफट्मर्दमर्द हूं इति तच्छेषं बहिर्दद्यात ॥ बलिं ग्रहणं-

स्विमं देवाआदित्या वसवस्तथा ॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असु-
रा यातुधानाश्च पिशाचोरगराक्षसाः ॥ डाकिन्यो यक्षवेताला योगिन्यः पूतनाशिवाः ॥
जृंभकाः सिद्धगंधर्वाः साध्या विद्याधरा नगाः॥ दिक्पाला लोकपालाश्च येच. विघ्नविनाय-
काः ॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः॥ माविघ्नं माच मेपापं मासंतु परिपंथिनः॥
सौम्या भवंतु तृप्तास्ते भूतप्रेताः सुखावहाः ॥ भूतानि यानीह वसंति तानि बलिं गृहीत्वा
विधिवत्प्रयुक्तं ॥ अन्यत्र वासं परिकल्पयंतु रक्षंतु मां तानि सदैव चात्र इति ॥ ततः
स्नात्वा कृततिलको देवीं प्रार्थयेत् खड्गिनीशू० ५ शूलेनपा० ४ सर्वस्वरूपे० ५ रूपं-
देहिजयंदेहि भगं भवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वकामांश्च देहिमे ॥
महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ॥ आयुरारोग्यमैश्वर्यं देहि देवि नमो-
स्तुते इति प्रार्थयेत् ॥ एतद्बलिदानं होमांगं तच्च होमोत्तरमेव ॥ तत्र च पायसबलि-
दानमवश्यमेव ॥ इति बलिदानविधिः ॥

॥ अथ दिक्पालानां बलिदानम् ॥

पूर्वे इंद्राय नमः तस्यानुचरेभ्यो नमः ॥

एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश ॥
संवीज्यमानोप्सरसांगणेन रक्षाध्वरन्नो भगवन्नमस्ते ॥१॥

ॐ त्रातारमिंद्र० ॥ ॐ भूर्भुवः स्वः ॥ इन्द्रं सांगं सपरिवारमावाहयामि संपू-

जयामि ॥ इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपं माषभक्त वलिं समर्पयामि ॥ भों इंद्र इमं वलिं भक्ष स्वां दिशं रक्ष मम सकुटुंबस्य सपरिवारस्य गृहे आयुःकर्ता पुष्टिकर्त्ता तुष्टिकर्त्ता क्षेमकर्त्ता विघ्नहर्ता वरदोभव अनेन वलिदानेन इंद्रः प्रीयतां ॥१॥

आग्नेय्यामग्नये नमः तस्यानुचरेभ्यो नमः ॥

एह्येहि सर्वामरहव्यवाह मुनिप्रवर्यैरभितोभिजुष्टम् ॥
तेजोवता लोकगणेन सार्धं ममाऽध्वरं पाहि कवे नमस्ते ॥२॥

ॐ त्वन्नो अग्ने०॥ ॐ भूर्भुवः स्वः अग्निं सांगं सपरिवारमावाहयामि पूजयामि॥ अग्नये सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपं माषभक्तवलिं समर्पयामि॥ भो अग्ने इमं वलिं भक्ष स्वां दि रक्ष मम सकुटुंबस्य सपरिवारस्य गृहे आयुःकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता विघ्नहर्ता वरदो भव ॥ अनेन वलिदानेन अग्निः प्रीयतां ॥२॥

दक्षिणे यमाय नमः तस्यानुचरेभ्यो नमः ॥

एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते ॥
शुभाशुभानंदशुचामधीश शिवाय नः पाहि मखं नमस्ते ॥३॥

ॐ यमात्वा० ॥ ॐ भूर्भुवः स्वः यमं सांगं सपरि० आवा० पूज० ॥ यमाय सां० सपरि० सायु० सशक्ति० इमं सदीपं माषभक्तवलिं सम० ॥ भो यम इमं वलिं

॥३२७॥

भक्ष स्वां दिशं रक्ष मम सकुटुंबस्य सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव अनेन बलिदानेन यमराजः प्रीयतां ॥३॥

नैर्ऋत्यां निर्ऋतये नमः तस्यानुचरेभ्यो नमः ॥

एह्येहि रक्षोगणनायकस्त्वं विशाल वेताल पिशाचसंघैः ॥

ममाध्वरं पाहि पिशाचनाथ लोकेश्वर त्वं भगवन्नमस्ते ॥४॥

ॐ असुन्वन्त० ॥ ॐ भूर्भुवः स्वः निर्ऋतिं सांगं सपरि० आवा० पूज० ॥ निर्ऋतये सांगा० सपरि० सायु० सश० इमं सदीपं माष० सम० ॥ भो निर्ऋते इमं बलिं भक्ष स्वां दिशं रक्ष मम सकुटुंबस्य सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव अनेन बलिदानेन निर्ऋतिः प्रीयतां ॥४॥

पश्चिमे वरुणाय नमः तस्यानुचरेभ्यो नमः ॥

एह्येहि यादोगणवारिधीनां गणेन पर्जन्यमहाप्सरोभिः ॥

विद्याधरेंद्रामरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते ॥५॥

ॐ तत्त्वायामि० ॥ ॐभूर्भुवः स्वः यमं सांगं सपरि० आवा० पूज० ॥ वरुणाय सांगा० सपरि० सायु० सश० इमं सदीपं माष० समर्पयामि ॥ भो वरुण इमं बलिं भक्ष स्वां दिशं रक्ष मम सकुटुंबस्य सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव अनेन बलिदानेन वरुणः प्रीयताम् ॥५॥

वायव्यां वायवे नमः तदनु० नमः ॥

एह्येहि वायो मम रक्षणाय मृगाधिरूढः सहसिद्धसंघैः ॥
प्राणाधिपः काल कवे सहाय गृहाण पूजां भगवन्नमस्ते ॥६॥

ॐ आनो नियुद्भिः० ॥ ॐ भूर्भुवः स्वः वायुं सांगं सपरि० आवा० पूज० ॥ वायवे सां० सपरि० सायु० सश० इमं सदीपं मापभक्त बलिं समर्पयामि ॥ भोः वायो इमं बलिं भक्ष स्वदिशिमां रक्ष मम यजमानस्य सकुटुंबस्य सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव ॥ अनेन बलिदानेन वायुः प्रीयतां ॥६॥

उत्तरे कुबेराय नमः तदनु० नमः ॥६॥

एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्धम् ॥
सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते ॥७॥

ॐ वय ँ सोम० ॐभूर्भुवः स्व० कुबेरं सांगं सपरि० आवा० पूज० ॥ कुबेराय सां० सप० सायु० सश० इमं सदीपं माप भक्त बलिं समर्पयामि ॥ भोः कुबेर इमं बलिं भक्ष स्वदिशिमां रक्ष मम यजमानस्य सकुटुंबस्य सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव० ॥ अनेन बलिदानेन कुबेरः प्रियतां ॥७॥

ईशान्यां ईशानाय नमः तस्यानुचरेभ्यो नमः ॥

Scanned with OKEN Scanner

एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वांगधरेण सार्धम् ॥
लोकेश भूतेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते ॥८॥

ॐ तमीशानं० ॐ भूर्भुवः स्वः ईशानं सांगं सपरि० आवा० पूज० ॥ ईशानाय सांगा० सपरि० सायु० सश० इमं सदीपं माषभक्तबलिं समर्पयामि ॥ भोः ईशान इमं बलिं भक्ष स्वदिशिमां रक्ष मम यजमानस्य सकुटुंबस्य सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव ॥ अनेन बलिदानेन ईशानः प्रीयतां ॥८॥

पूर्वेशानयोर्मध्ये ब्रह्मणे नमः तस्यानु० नमः ॥

एह्येहि विष्ण्वाधिपते मुनीन्द्र लोकेन सार्धं पितृदेवताभिः ॥
सर्वस्य धातास्यमितप्रभावो विशाध्वरं नः सततं शिवाय ॥९॥

ॐ अस्मेरुद्रा० ॥ ॐ भूर्भुवः स्वः ब्रह्माणं सां० सप० आवा० पूज० ॥ ब्रह्मणे सां० सप० सायु० सश० इमं सदीपं माषभक्तबलिं समर्पयामि ॥ भोः ब्रह्मन् इमं बलिं भक्ष स्वदिशिमां रक्ष मम यजमानस्य सकुटुंबस्य सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव ॥ अनेन बलिदानेन ब्रह्मा प्रीयतां ॥९॥

पश्चिम नैर्ऋत्योर्मध्ये अनंताय नमः तस्यानु० नमः ॥

एह्येहि पातालधरेन्द्र नाग नागांगनाकिन्नरगीयमान ॥
यक्षोरगेन्द्रामरलोकसंघैरनंत रक्षाध्वरमस्मदीयम् ॥१०॥

ॐ स्योना पृथिवी० ॥ ॐ भूर्भुवः स्वः अनंतं सांगं सपरि० आवा० पूज० ॥ अनंताय सांगा० सपरि० सायु० सश० इमं सदीपं माप० समर्पयामि ॥ भोः अनंत इमं बलिं भक्ष स्वदिशिमां रक्ष मम यजमानस्य सकुटुंबस्य सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव ॥ अनेन बलिदानेन अनंतः प्रीयतां ॥१०॥

पूर्वे गणपतये नमः तस्यानुचरेभ्यो नमः ॥

ॐ गणानांत्वा० ॐ भूर्भुवः स्वः गणपतिं सांगं सपरि० आवा० पूज० ॥

खर्वस्थूलगजेंद्रतुल्यवदनं लंबोदरं सुंदरं
प्रस्यंदं मधुलुब्धमत्तमधुपव्यालोलगंडस्थलम् ॥
दैत्योद्यानविदारितारिरुधिरैः सिंदूरशोभाकरं
वंदे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम् ॥११॥

गणपतये सांगा० सपरि० सायु० सश० इमं सदीपं माप० समर्पयामि ॥ भोः गणपते इमं बलिं भक्ष स्वदिशिमां रक्ष मम यजमानस्य सकुटुंबस्य सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव अनेन बलिदानेन गणपतिः प्रीयताम् ॥११॥

दक्षिणे क्षं क्षेत्रपालाय नमः तस्यानुचरेभ्यो नमः ॥

कूलीरे चित्रकूटे हिमगिरिविवरे याति जालंधरे वा ॥
सौराष्ट्रे सिंधु देशे मगध सुखकरे कोशले वा कलिंगे ॥

कर्णाटे कूंकणे वा भृगुवर नगरे कान्यकुब्जे स्थितो वा ॥
सर्वत्र क्षेत्रपालो ह्यपहरतु भयं पातु वीरेन्द्रवंद्यः ॥१२॥

ॐ नहिस्पशम०॥ ॐ भूर्भुवः स्वः क्षेत्रपालं सांगं सपरिवारमावाहयामि पूजयामि॥ क्षेत्रपालाय सांगा० सपरि० सायु० सश० इमं सदीपं माषभक्त दधि भक्तवलिं समर्पयामि ॥ क्षां क्षीं क्षूं क्षैं क्षौं क्षः भोः क्षेत्रपाल चित्रतुरंगवाहन भूत प्रेत पिशाच डाकिनी शाकिनी वेतालादि परिवृत दध्योदनप्रिय त्रिशूलशक्तिसहित इमं माषभक्त वलिं भक्ष स्वदिशिमां रक्ष मम यजमानस्य सकुटुंबस्य सपरिवारस्य गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव ॥ अनेन वलिदानेन क्षेत्रपालः प्रीयतां ॥१२॥

उत्तरे यां योगिनीभ्यो नमः तदनुचरेभ्यो नमः ॥

ऊर्ध्वं ब्रह्मांडतो वा दिवि गगनतले भूतले वा तले वा ।
पाताले पर्वते वा पवनसलिलयोर्यत्र कुत्र स्थिता वा ॥
क्षेत्रे पीठापपीठादिषु च कृतपदा धूपदीपादिकेन ।
प्रीता देव्यः सदा नः शुभवलिविधिना पांतु वीरेन्द्रवंद्याः ॥१३॥

ॐ अंवे अंविके० ॥ ॐ भूर्भुवः स्वः ॥ योगिनीः सांगाः सपरिवाराआवाहयामि पूजयामि ॥ योगिनीभ्यः सांगाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदोपं माषभक्त वलिं समर्पयामि ॥ भोः योगिन्यः इमं वलिं भक्षत स्वदिशिमां रक्षत

मम यजमानस्य सकुटुंबस्य सपरिवारस्य गृहे आयुःकर्त्र्यः पुष्टिकर्त्र्यः तुष्टिकर्त्र्यः क्षेमकर्त्र्यः विघ्नहर्त्र्यः वरदा भवन्तु ॥ अनेन बलिदानेन योगिन्यः प्रीयन्तां ॥१३॥

उत्तरे वं वटुकभैरवाय नमः तस्यानुचरेभ्यो नमः ॥

करकलित कपाली कुंडलोदंडपाणिस्तरुणतिमिरनीलो व्यालयज्ञोपवीती ॥
क्रतुसमयसपर्या विघ्नविच्छेदहेतुर्जयति वटुकनाथः सिद्धिदः साधकानाम् ॥१४॥

ॐ ये भूतानां० ॥ ॐ भूर्भुवः स्वः वटुकनाथं सांगं सपरिवारं आवाहयामि पूजयामि ॥ वटुकभैरवाय सांगा० सपरि० सायु० सश० इमं सदीपं माषभक्त बलिं समर्पयामि ॥ यां यीं यूं यैं यौं यः भोः वटुकभैरव एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभार भासुरनेत्रज्वालामुख सर्वविघ्नाशनाशयनाशय सर्वोपचारसहितं इमं बलिं भक्ष स्वदिशिमां रक्ष मम यजमानस्य सकुटुंबस्य सपरिवारस्य गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव ॥ अनेन बलिदानेन वटुकनाथः प्रीयतां ॥१४॥

सूर्यादि ग्रहेभ्योधिप्रत्यधिदेवेभ्योनमः तेषामनुचरेभ्यो नमः ॥

ॐ महाऊर्जा० ॥ ॐ भूर्भुवः स्वः आदित्यादिनवग्रहान् अधिप्रत्यधिदेवान् विनायकादिलोकपालान् सांगान् सपरिवारान् आवाहयामि पूजयामि ॥ सूर्यादिनवग्रहदेवताभ्यः अधिप्रत्यधिदेवताभ्यः विनायकादिलोकपालेभ्यस्तेभ्यः सर्वेभ्यो देवेभ्यः सांगेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः इमं सदीपं माषभक्तबलिं

समर्पयामि ॥ भोः सूर्यादिदेवाः इमं बलिं भक्षत स्वदिशि मां रक्षत मम यजमानस्य सकुटुंबस्य सपरिवारस्य गृहे आयुःकर्तारः पुष्टिकर्तारस्तुष्टिकर्तारः क्षेमकर्तारो विघ्नहर्तारो वरदा भवंतु ॥ अनेन बलिदानेन सूर्यादिग्रहाः अधिप्रत्यधिदेवताः विनायकादिलोकपालाः प्रीयन्ताम् ॥

गौर्यादि मातृभ्यो नमः तासामनुचरेभ्यो नमः ॥

ॐ समङ्ग्ये देव्या० ॥ ॐ भूर्भुवः स्वः गौर्यादिचतुर्दशमातृदेवीः सपरिवाराः आवाहयामि पूज० ॥ गौर्यादिचतुर्दशमातृभ्यः सांगाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदीपं माषभक्तबलिं समर्पयामि ॥ भोः भोः गौर्यादि चतुर्दश मातरः इमं बलिं भक्षत स्वदिशि मां रक्षत मम यजमानस्य सकुटुंबस्य सपरिवारस्य गृहे आयुःकर्त्र्यः पुष्टिकर्त्र्यस्तुष्टिकर्त्र्यः क्षेमकर्त्र्यो विघ्नहर्त्र्यो वरदा भवंतु ॥ अनेन बलिदानेन गौर्यादि चतुर्दश मातरः प्रीयन्ताम् ॥१८॥

महालक्ष्म्यादि सर्वस्थापितदेवताभ्यो नमः ॥ तदनुचरेभ्योनमः ॥

ॐ श्रीश्चतेलक्ष्मी० ॥ ॐ भूर्भुवः स्वः महालक्ष्म्यादि स्थापितदेवता आवाहयामि पूजयामि ॥ महालक्ष्म्यादि स्थापितदेवताभ्यः सांगाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदीपं माषभक्तबलिं समर्पयामि ॥ भो भो महालक्ष्म्यादिदेवताः इमं बलिं भक्षत स्वदिशि मां रक्षत मम यजमानस्य सकुटुं० सपरि०

॥३३४॥

गृहे आयुःकर्त्र्यः पुष्टि० तुष्टि० क्षेम विघ्नहर्त्र्यः वरदा भवंतु ॥ अनेन पूजनेन महालक्ष्म्यादि सर्वस्थापितदेवताः प्रीयन्ताम् ॥१७॥

ऊर्ध्वं आकाशाय नमः तदनुचरेभ्यो नमः ॥

ॐ घृतं घृतपावानः० ॥ ॐ भूर्भुवः स्वः आकाशं सांगं सपरि० आवा. पूज० ॥ आकाशाय सांगाय सपरि० सायु० सश० इमं सदीपं माषभक्तबलिं समर्पयामि ॥ भोः आकाश इमं बलिं भक्ष स्वदिशिमां रक्ष मम यजमानस्य सकुटुं० सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम० विघ्नहर्ता वरदो भव ॥ अनेन पूजनेन आकाशः प्रीयताम् ॥१८॥

अश्विभ्यां नमः तदनु० नमः ॥

ॐ यावां कशा० ॥ ॐ भूर्भुवः स्व० अश्विनौ सांगौ सपरिवारौ आवा० पूज० ॥ अश्विभ्यां सांगाभ्यां सपरिवाराभ्यां सायुधाभ्यां सशक्तिकाभ्यां इमं सदीपं माषभक्तबलिं समर्पयामि ॥ भोः अश्विनौ इमं बलिं भक्षतां स्वदिशिमां रक्षतां मम यजमानस्य सकुटुं० सपरि० गृहे आयुःकर्तारौ पुष्टि० तुष्टि० क्षेम० विघ्नहर्तारौ वरदौ भवेतां ॥ अनेन बलिदानेन अश्विनौ प्रीयेताम् ॥

वास्तोष्पतये नमः तदनु० नमः ॥

ॐ वास्तोष्पते विश्वारूपीण्या० ॥ ॐ भूर्भुवः स्वः वास्तोष्पतिं सांगं सपरि० आवा० पूज० ॥ वास्तोष्पतये सांगाय सपरि० सायु० सश० इमं सदीपं माषभक्तबलिं समर्पयामि ॥

भोः वास्तोष्पते इमं बलिं भक्ष स्वदिशिमां रक्ष मम यजमानस्य सकु० सपरि० गृहे आयुःकर्ता पुष्टि० तुष्टि० क्षेम विघ्नहर्ता वरदो भव ॥ अनेन बलिदानेन वास्तोष्पतिः प्रीयताम् ॥२०॥

मंडूकादि परतत्त्वपर्यंतपीठदेवताभ्यः सर्वावरणदेवताभ्यस्तदनुचरेभ्यश्च नमः ॥

ॐ भूर्भुवः स्वः मंडूकादि परतत्त्वपर्यंतपीठदेवता आवरणदेवताश्च सांगाः सपरिवारा आवा० पूज० ॥ पीठदेवताऽऽवरण देवताभ्यः सांगाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदीपं माषभक्तबलिं समर्पयामि ॥ भोः भोः पीठदेवताः सर्वावरणदेवताश्च इमं बलिं भक्षत स्वदिशि मां रक्षत मम यजमानस्य सकुटुंबस्य सपरि० गृहे आयुःकर्त्र्यः पुष्टि० तुष्टि० क्षेम० विघ्नहर्त्र्यः वरदा भवन्तु ॥ अनेन बलिदानेन मंडूकादि परतत्त्वपर्यंताः पीठदेवताः सर्वा आवरणदेवताश्च प्रीयन्ताम ॥२१॥

अथ चत्वर क्षेत्रपाल महाबलिः ॥ एकस्मिन्वंशपात्रे कुशानास्तीर्य गोधूम पिष्ट कृतशरावे चतुर्दश वर्तिकाभिः दीपान्प्रज्वाल्य तत्र आहार चतुर्गुणं द्विगुणं वा माषभक्त दध्योदनं जलपात्रं च निधाय हरिद्रा कुंकुमादि पताकायुतं कृत्वा ॥ अद्यपू० सकलारिष्ट शान्तिपूर्वकं मया कृतस्य नवचंड्याख्यकर्मणः साङ्गतासिद्ध्यर्थं चत्वर क्षेत्रपालपूजनं बलिदानं च करिष्ये ॥ ॐनहिस्पश० ॥१॥ इति मन्त्रेण क्षेत्रपालाय नमः इति षोडशो-

पचारैः संपूज्य प्रार्थयेत् ॥ ॐ नमस्तेक्षेत्रपालत्वं भूतप्रेतगणैः सह ॥ पूजांबलिं गृहाणेमं सौम्यो भवतु सर्वदा ॥ आयुरारोग्यं मे देहि निर्विघ्नं कुरु सर्वदा ॥१॥ ॐ नमो भगवन् क्षेत्रपाल चित्रतुरङ्गवाहन सर्वभूतप्रेतपिशाच शाकिनीडाकिनीवेतालादिपरिवृत दष्ट्रोद्भवप्रिय सकलशक्तिसहित इमां पूजां गृहाण अनया पूजया क्षेत्रपालः प्रीयतां ॥ ततो बलिदानं ॥ क्षेत्रपालाय साङ्गाय भूतप्रेतपिशाचशाकिनीडाकिनीवेतालादि परिवारयुताय सायुधाय सशक्तिकाय सवाहनाय इमं सदीपं माषभक्तबलिं समर्पयामि ॥ भो भो क्षेत्रपाल सर्वतोदिशां रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शांतिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन सत्वर क्षेत्रपालः प्रीयतां ॥ पश्चादनवेक्षमाणेन दुर्ब्राह्मणेन बलिं नीत्वा चतुष्पथे निक्षेपयेत् ॥ ततो यजमानस्तस्य पृष्ठतो द्वारपर्यन्तं गत्वा जलं क्षिपेद्धिंकारेति मन्त्रेण ॥ ॐ हिङ्कारायस्वाहा हिङ्कृतायस्वाहाक्रन्दतेस्वाहा वक्रन्दायस्वाहा प्रोथतेस्वाहा प्रप्रोथायस्वाहा गन्धायस्वाहा घ्रातायस्वाहा निविष्टायस्वाहोपविष्टायस्वाहा सन्दितायस्वाहा वल्गतेस्वाहा सीनायस्वाहा शयानायस्वाहा स्वपतेस्वाहा जाग्रतेस्वाहा कूजतेस्वाहा प्रबुद्धायस्वाहा विजृम्भमाणायस्वाहा विचृतायस्वाहा स ◌ ◌ हानायस्वाहोपस्थितायस्वाहायनायस्वाहा प्रायणायस्वाहा ॥१॥

ततः पूर्णाहुतिः ॥ यजमानः पाणिपादं प्रक्षाल्याचम्य पूर्णाहुतिहोमं कुर्यात् ॥

अद्यपू० कृतस्य नवचंड्याख्यकर्मणः सांगतासिद्ध्यर्थं वसोर्धारासमन्वितं पूर्णाहुति-
होमं करिष्ये । मृडनाम्ने वैश्वानराय इदमत्र चंदनं च पुष्पं । ततः पात्रान्तरे
स्रुवेण चतुर्गृहीतमाज्यं द्वादशवारं गृहीतं वा गृहीत्वा पात्रोपरिसमिधं धृत्वा पूर्णाहुत्यां
कौशेयरक्तवस्त्र (चुंदडी) मुगुट (मोडियो) चंद्रक (चांदलो) श्रीफल सुगंधितैल ताम्बूल
चंदन माल्यादिभिः श्रीफलमलंकृत्य गृहीत्वापात्रे स्रुगुपरिनिधाय धृत्वोभयपाणिभ्यां
यजमानस्तिष्ठेत् ॥ प्रथमं शक्रादयः संपूर्णं पठित्वा ततोमन्त्राः ॥ ॐ
समुद्रादूर्म्मिर्मधुमा ०‿० उदारदुपा ०‿० शुनासममृतत्वमानट् ॥ घृतस्यनाम गुह्यन्य-
दस्ति जिव्हा देवानाममृतस्यनाभिः ॥१॥ वयन्नामप्रब्रवामाघृतस्यास्मिन्यज्ञेधारया-
मानमोभिः ॥ उपब्रह्माशृणवच्छस्यमानञ्चतुःशृङ्गोवमीद्गौरऽएतत् ॥२॥ चत्वारिशृङ्गा-
त्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य ॥ त्रिधावद्धोवृषभोरोरवीतिमहोदेवोमर्त्यां
२ऽआविवेश ॥३॥ त्रिधा हितम्पणिभिर्गुह्यमानङ्गविदेवासो घृतमन्वविन्दन् ॥ इन्द्रऽ-
एक ०‿० सूर्यएकञ्जजमानवेनादेक ०‿० स्वधयानिष्टतक्षुः ॥४॥ एताऽअर्षन्तिहृद्या-
त्समुद्राच्छतव्रजारिपुणानावचक्षे ॥ घृतस्यधाराऽअभिचाकशीमिहिरण्ययोवेतसोमध्य-
ऽआसाम् ॥५॥ सम्यक्स्रवन्तिसरितोनधेनाऽअन्तर्हृदामनसापूयमानाः ॥ एतेऽअर्षन्त्यू-
र्म्मयोघृतस्यमृगाऽइवक्षिपणोरीषमाणाः ॥६॥ सिन्धोरिवप्राध्वनेशूघनासोवातप्रमियः
पतयन्तियह्वाः ॥ घृतस्यधाराऽअरुषोनवाजीकाष्ठाभिन्दन्नूर्म्मिभिःपिन्वमानः ॥७॥ अभि-

प्रवन्तसमनेवयोषाःकल्याण्यःस्मयमानासोऽअग्निं ॥ घृतस्यधाराःसमिधोनसन्तताजु-
षाणोहर्य्यतिजातवेदाः ॥८॥ कन्याऽइववहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि ॥
यत्रसोमःसूयतेयत्रयज्ञोघृतस्यधाराऽअभितत्पवन्ते ॥९॥ अभ्यर्षतसुष्टुतिङ्गव्यमाजिम-
स्मासुभद्राद्रविणानिधत्त॥ इमंयज्ञन्नयतदेवतानोघृतस्यधारामधुमत्पवन्ते ॥१०॥ धाम-
न्तेविश्वम्भुवनमधिश्रितमन्तः समुद्रेहृद्यन्तरायुषि ॥ अपामनीकेसमिथेयऽआभृतस्तम-
श्यामामधुमन्तन्तऽऊर्मिम् ॥११॥ पुनस्त्वादित्यारुद्रावसवःसमिन्धताम्पुनर्ब्रह्माणोवसुनी-
थयज्ञैः ॥ घृतेनत्वन्तन्वँवर्धयस्वसत्याःसन्तुयजमानस्यकामाः ॥१२॥ सप्ततेऽअग्नेसमि-
धःसप्तजिह्वाःसप्तऽऋषयःसप्तधामप्रियाणि ॥ सप्तहोत्राःसप्तधात्वायजन्तिसप्तयोनीरापृण-
स्वाघृतेनस्वाहा ॥१३॥ पूर्णादर्व्विपरापत सुपूर्णापुनरापत ॥ वस्नेव विक्रीणावहा-
ऽइषमूर्ज्जं ०—० शतक्रतो ॥१४॥

ततोवसोर्द्धारांजुहुयात् ॥ तत्र प्रथमं सर्व स्वरूपे इति पंचमंत्राः ॥ ततः
ॐसप्ततेअग्नेसमिधः० ॥१॥ शुक्रज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्चज्योतिष्मांश्च ॥
शुक्रश्चऽऋतपाश्चात्य ०—० हाः ॥२॥ ईदृङ्चान्यादृङ्चसदृङ्चप्रतिसदृङ्च ॥ मितश्चस-
म्मितश्चसभराः ॥३॥ ऋतश्चसत्यश्चध्रुवश्चधरुणश्च ॥ धर्त्ताचविधर्त्ताचविधारयः ॥४॥
ऋतजिच्चसत्यजिच्चसेनजिच्चसुषेणश्च ॥ अन्तिमित्रश्चदूरेऽअमित्रश्चगणः ॥५॥ ईदृक्षास-
ऽएतादृक्षासऽऊषुणःसदृक्षासःप्रतिसदृक्षासऽएतन ॥ मितासश्चसम्मितासोनोऽअद्यस-

भरसोमस्त्वोयज्ञेऽअस्मिन् ॥६॥ स्वतवाँश्चप्रघासीच सान्तपनश्चगृहमेधीच ॥ क्रीडीच शाकीचोज्येपि ॥७॥ इन्द्रन्दे्वीर्विशोमरुतोनुवर्त्मानोभवन्यथेन्द्रन्दे्वीर्विशोमरुतोनुवर्त्मानोभवन् ॥ एवमिमञ्यजमानन्दे्वीश्चविशोमानुषीश्चानुवर्त्मानोभवन्तु ॥८॥ इम० ० स्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्नेसरिरस्यमद्ध्ये ॥ उत्सञ्जुषस्वमधुमन्तमर्व्वन्त्समुद्रिय ० ० सदनमाविशस्व ॥९॥ घृतम्मिमिक्षेघृतमस्यु० ॥१०॥

ततस्त्र्यायुषकरणं ॥ श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं श्रियं बलम् ॥ तेज आयुष्यमारोग्यं देहि मे हव्यवाहन ॥१॥ ॐत्र्यायुषं जमदग्नेःकश्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ भस्मना ललाटे ग्रीवायां दक्षिणे ० ० से हृदि च त्र्यायुषमिति प्रतिमन्त्रं ॥

शुचि जलं पूरयित्वा आघारादि पूर्णाहुति पर्यंतं यद्यद्द्रव्यं यावद्यावत्संख्याकं यस्यै यस्यै देवतायै यावत्यो यावत्य आहुतयस्तास्ता देवताः प्रीयन्ताम्। तत्र तर्पणं—

ॐ मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत पशुन्मेतर्पयत गणान्मेतर्पयत गणान्मे|मा वितृषन्त ॥१॥ तर्पयित्वा शुचिगतजलेन संकल्पं कुर्यात्। अद्येति० नवचंड्याख्य कर्मांगभूतेन यथाशक्त्या ब्राह्मण सुवासिनी वटुक कुमारिका भोजनेन कर्मांग देवताः प्रीयंताम् ॥

~~अग्नेनयसुपथारायेऽअस्मान्विश्वानि देव वयुना निविद्वान् ॥ युयोध्य-~~

॥ ततः क्षमापनं ॥

अग्नेनय सुपथाराये॒ऽअस्मान्विश्वानि देव व्वयुना निविद्वान् ॥ युयोद्ध्य स्स्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्ति व्विधेम स्वाहा ॥ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेवच ॥ हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥ इति क्षमापनं ॥

ततः संस्रवप्राशनं । कुशपवित्राभ्यां मार्जनं । ॐ आपः शिवाः शिवतमाः शांताः शांततमास्तांस्ते कृण्वंतु भेषजम् ॥ ततः अग्नौ पवित्रप्रक्षेपः । प्रणिता विमोकः । ब्रह्मणे पूर्णपात्रदानं ॥ कृतस्य कर्मणः सांगतासिद्ध्यर्थं हे ब्रह्मन् इदं पूर्णपात्रं सदक्षिणं तुभ्यमहं संप्रददे । प्रतिगृह्यतां इति यजमानो ब्रूयात् । प्रतिगृह्णामीति ब्रह्मा ब्रूयात् । द्यौस्त्वां ददातु पृथिवीत्वां प्रतिगृह्णातु । इति ब्रह्मा प्रतिगृह्णाति । कुशविसर्जनं । कर्मसमाप्तिः ।

॥ ततः अग्निपूजनं ॥

पंचोपचारैः चंदनाक्षतपुष्पधूपदीपनैवेद्यैः पूजयेत् ॥ ततः अग्नेरारार्तिकं

अग्निर्देवता व्वातोदेवता सूर्य्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता व्विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता व्वरुणो देवता ॥१॥

ॐ इद ०‿० हविःप्रजननम्मेऽअस्तु दशवीर ०‿० सर्व्वगण ०‿० स्वस्तये ॥

आरमत्तनिष्प्रजात्तनिपशुत्तनिलोकत्तन्न्यमयत्तनि ॥ अग्निः प्प्रजाम्बहुलाम्मे करोत्वन्नम्पयोरेतोऽअस्मासु धत्त ॥२॥

या श्रीःस्वयं सुकृतिनां भुवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥
श्रद्धा सतां कुलजनप्रभवस्य लज्जा तांत्वां नताःस्म परिपालय देविविश्वम ॥३॥

॥ ततः श्रेयःसंपादनं ॥

आचार्यादयो वरणक्रमेण स्वं स्वं श्रेयोदानं कुर्युः । अद्येत्यादि कृतस्य नवचंड्याख्यकर्मणः यजमानाय श्रेयोदानं करिष्ये ॥ तत्रादौ वचः प्रतिवचनं । शिवा आपः सन्तु । सौमन्स्यमस्तु अस्तु सौमनस्यं । अक्षतं चारिष्टं चास्तु अस्तु अक्षयं चारिष्टं । यत्पापं यद्रोगं अशुभं अकल्याणं तद्दूरे प्रतिहतमस्तु । यच्छ्रेयस्तदस्तु भवन्नियोगेन मया अस्मिन्कर्मणि यत्कृतं आचार्यत्वं तदुत्पन्नश्रेयस्तत्तुभ्यमहं संप्रददे प्रतिगृह्यतां । प्रतिगृह्णामि । तेन श्रेयसा त्वं श्रेयस्वान् भव । भवामीति प्रतिवचनं । एवमेव ब्रह्मादय ऋत्विजो जापकाश्च श्रेयोदानं कुर्युः ॥ आचार्यादि समस्त ऋत्विग्भ्यः दक्षिणां दद्यात् ॥

॥ ततो ब्राह्मणानामाशीर्वादाः ॥

ॐ ध्रुवासिध्रुवो यंयजमानोस्मिन्नायतनेप्रजयापशुभिर्भूयात् ॥ घृतेनद्यावापृथिवी पूर्येथामिन्द्रस्य च्छदिरसिविश्वजनस्यच्छाया ॥१॥ ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामा-

राष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः ॥ सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥२॥

॥ ततः अभिषेकः ॥

रुद्रकलशजलं महालक्ष्मीकलशजलं च एकस्मिन्पात्रे एकीकृत्य दूर्वापंचपल्लवैः उदङ्मुख आचार्यस्तिष्ठन् अविधुराश्चत्वारो ऋत्विजश्च सपत्नीकं यजमानं प्राङ्मुखमुपविष्टं अभिषिंचेयुः । अभिषेके पत्नी वामतः ॥

तत्रमंत्राः ॥ ॐ आपोहिष्ठा० ॥१॥ योवःशिव० ॥२॥ तस्माऽअरं० ॥३॥ आपोअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥ विश्व ͜ हि रिप्रम्प्रवहन्तु देवीरुदिदाभ्यः शुचिरापूतऽएमि ॥४॥ इदमापःप्रवहतावद्यञ्च मलञ्च यत् ॥ यच्चाभिदुद्रोहान्नृतं यच्च शेपेऽभीरुणम् ॥ आपोमा तस्मादेनसः पवमानश्च मुञ्चतु ॥५॥ स्तोकानामिन्दुम्प्रति शूरऽइन्द्रो वृषायमाणो वृषभस्तुराषाट् ॥ घृतप्रुषा मनसा मोदमानाः स्वाहा देवाऽअमृता मादयन्ताम् ॥६॥ आयात्विन्द्रो वसऽउपनऽइह स्तुतः सधमादस्तु शूरः ॥ वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्नक्षत्रमभिभूति पुष्यात् ॥ आनऽइन्द्रो दूरादानऽआसादभिष्टिकृदवसे यासदुग्रः ॥ ओजिष्ठेभिर्नृपतिर्वज्रबाहुः सङ्गे समत्सु तुर्वणिः पृतन्यून् ॥८॥ आनऽइन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च ॥ तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाज-

जसातो ॥९॥ त्रातारमिन्द्र० ॥१०॥ इमम्मेव्वरुणश्रुधिहवमद्याचमृडय ॥ त्वामवस्यु-
राचके ॥११॥ तत्त्वायामि० ॥१२॥ त्वन्नोऽअग्ने ॥१३॥ सत्वन्नोऽअग्ने० ॥१४॥ उदुत्तम-
म्व्वरुण० ॥१५॥ व्वरुणस्योत्तम्भ० ॥१६॥ प्रातरग्निम्प्रातरिन्द्र ०‿० हवामहेप्रातर्म्मि-
त्रावरुणाप्रातरश्विना ॥ प्रातर्भगम्पूषणम्ब्रह्मणस्पतिम्प्रातःसोममुतरुद्र ०‿० हुवेम॥१७॥
भगप्रणेतर्भगसत्यराधोभगेमान्धियमुदवाददन्नः ॥ भगप्रनोजनयगोभिरश्वैर्भगप्रनृभि-
र्नृवन्तःस्याम ॥१८॥ समुद्रायत्वाव्वातायस्वाहासरितायत्वाव्वातायस्वाहा ॥ अनाधृष्या-
यत्वाव्वातायस्वाहाप्रतिधृष्यायत्वाव्वातायस्वाहा ॥ अवस्यवेत्वाव्वातायस्वाहाशिमिदा-
यत्वाव्वातायस्वाहा ॥१९॥ आप्यायस्व० ॥२०॥ पञ्चनद्यःसरस्वतीमपियन्तिसस्रोतसः
॥ सरस्वतीतुपञ्चधासोदेशेभवत्सरित् ॥२१॥ पुनन्तुमादेवजनाः० ॥२२॥ पवित्रेणपु-
नीहिमाशुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतुँरनु ॥२३॥ यत्तेपवित्रमर्चिस्यग्ने व्विततम-
न्तरा ॥ ब्रह्मतेनपुनातुमा ॥२४॥ पवमानःसोऽअद्यनःपवित्रेणव्विचर्षणिः ॥ यः पो-
तासपुनातुमा ॥२५॥ उभाभ्यान्देवसवितःपवित्रेणसवेनच ॥ माम्पुनीहिव्विश्वतः ॥२६॥
व्वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमाबह्व्यस्तन्न्वोव्वीतपृष्ठाः ॥ तयामदन्तःसधमादेषुव-
य ०‿० स्यामपतयोरयीणाम्॥ चित्पतिर्म्मापुनातुव्वाक्पतिर्म्मापुनातुदेवोमासवितापुना-
त्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः॥ तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम्
शिरोमेश्रीर्यशोमुखन्त्विषिःकेशाश्चश्मश्रूणि ॥ राजामेप्राणोऽअमृत ०‿० सम्राट्चक्षु-

ञ्चिराट्श्रोत्रम ॥२९॥ जिह्वामेभद्रंश्वाश्चहोमनोमन्युःस्वराड्भामः ॥ मोदाःप्रमोदाऽअ-
ङ्गुल्योरङ्गानिमित्रम्मेसहः ॥३०॥ बाहूमेबलमिन्द्रिय ०‿० हस्तौमेकर्म्मवीर्यम् ॥ आत्मा-
क्षत्रमुरोमम ॥३१॥ पृष्ठीर्मेराष्ट्रमुदरम ०‿० सौंग्रीवाश्चश्रोणी ॥ ऊरूऽअरत्नीजानुनी-
र्विशोमेङ्गानिसर्व्वतः ॥३२॥ नाभिर्म्मेचित्तम्विज्ञानम्पायुर्म्मेपचितिर्भसत् ॥ आनन्द-
नन्दावाण्डौमेभगःसौभाग्यम्पसः ॥ जङ्घाभ्यांम्पद्भ्यांधर्मोस्मिविशिराजाप्रतिष्ठितः ॥३३॥
पय.पृथि० ॥३४॥ देवस्य० सरस्व० यन्त्रिये० म्यसौ ॥३५॥ देवस्य० सरस्व०यन्त्रे-
णाग्नेः० चामि ॥३६॥ देवस्य० अश्विनोर्भ० ॥३७॥ विश्वानिदेव० ॥३८॥
धामच्छदग्नि० ॥३९॥ त्वष्टविष्ट० ॥४०॥ अन्नपते० ॥४१॥ द्यौःशान्तिरन्तरि०
॥४२॥ यतोयतःस० ॥४३॥ अथपुराणोक्तमन्त्राः ॥ सुरास्त्वामभिषिञ्चन्तुब्रह्मविष्णु-
महेश्वराः ॥ वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः ॥१॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु
विजयायते ॥ आखण्डलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥२॥ वरुणः पवनश्चैव
दानाध्यक्षस्तथा शिवः ॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा ॥३॥ कीर्तिर्लक्ष्मी-
र्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥४॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ॥ आदित्यश्चन्द्रमा भौमबुधजीवसितार्कजाः ॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥५॥
ऋषयो मनवो गावो देवमातर एवच ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसांगणाः

॥७॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ औषधानि चरत्नानि कालस्यावयवाश्च ये ॥८॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥९॥ अमृताभिषेकोऽस्तु ॥ एवमभिषेकानन्तरं ॥ सर्वौषधीभिरनुलिप्य शुद्धोदकेन स्नात्वा उभयोः स्नानवस्त्रत्यागः ॥ वस्त्राण्याचार्याय दद्यात् ॥

शुक्लमाल्यांबरधरो धृतमङ्गलतिलकः सपत्नीको यजमानः स्वासने उपविश्याज्याज्यावलोकनं कुर्यात् ॥ तिलपात्र घृतपात्र मुखावलोकनपात्रदानं ॥ ॐ रूपेणवोरूपमभ्यागान्तुथोवोविश्ववेदाविभजतु ॥ ऋतस्यपथाप्रेतचन्द्रदक्षिणाविस्वःपश्यव्यन्तरिक्षन्यतस्वसदस्यैः ॥१॥ रूप ० ० रूपम्प्रतिरूपोबभूव तदस्यरूपम्प्रतिचक्षणाय ॥ इन्द्रोमायाभिःपुरुरूपईयतेयुक्ताह्यस्यहरयःशतादशेत्ययंवैहरयोयंवैदशचसहस्त्राणिबहूनि चानन्तानिचतदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्माब्रह्मसर्वानुभूरित्यनुशासनम् ॥१॥ इदं आज्यपात्रं सदक्षिणाकं आचार्याय तुभ्यमहं संप्रददे ॥

ततो ब्राह्मणभोजनसंकल्पः ॥ कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं यथाशक्ति ब्राह्मणान्भोजयिष्ये ॥ तेन श्रीकर्माङ्गदेवताः प्रीयन्तां ॥ कर्मसाङ्गतासिद्ध्यर्थं आचार्याय दक्षिणां दद्यात् ॥ ऋत्विगादिभ्यो यथाशक्ति दक्षिणां दत्वा अन्येभ्यो ब्राह्मणेभ्यो यथाशक्तिभूयसीं दक्षिणां दातुमहमुत्सृजे इति दत्वा तेषामाशिषो गृह्णीयात् ॥

ततो देवताग्निविसर्जनं ॥ यान्तु ग्रहगणाः सर्वे स्वशक्त्या पूजिता मया ॥ इष्टकामप्रसिध्यर्थं पुनरागमनायच ॥१॥ ॐउत्तिष्ठब्रह्मणस्पतेदेवयन्तस्त्वेमहे ॥ उपप्रयन्तुमरुतःसुदानवऽइन्द्रप्राशूर्भवासचा ॥१॥ गच्छगच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥१॥ ॐयज्ञयज्ञङ्गच्छ यज्ञपतिङ्गच्छ स्वां-योनिङ्गच्छस्वाहा ॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकः सर्ववीरस्तञ्जुषस्वस्वाहा ॥१॥

मासोत्तमे अमुकमासे अमुकपक्षे अमुकतिथौ मया यत्कृतं नवचंड्याख्यं कर्म तत्कालहीनं भक्तिहीनं श्रद्धाहीनं ब्राह्मणानां वचनात् श्रीसूर्याद्यावाहितदेवताप्रसादात् सर्वं परिपूर्णमस्त्विति भवन्तो ब्रुवन्तु ॥ अस्तु परिपूर्ण इति ब्राह्मणा प्रतिब्रूयुः ॥ प्रमादात्कुर्वतांकर्मप्रच्यवेदध्वरेषुयत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥१॥

॥ अथ परिशिष्टं ॥

॥ आचार्याय सूचना ॥

निम्नलिखितकर्माणि नवचंडीप्रयोगारंभे न दर्शितानि अतः परिशिष्टे प्रकाशितानि संति । इमानि कर्माणि प्रथमं संपाद्य ततः चंडीप्रयोगारंभं कुर्यात् ॥

॥ अथप्रथमदिवसकृत्यम् ॥

अत्राद्य——कर्मांग भूत निर्विघ्नता सिद्ध्यर्थं गणपतिपूजनं, तदंगत्वेन

स्वस्ति पुण्याहवाचनं मातृकापूजनं वसोर्धारां आयुष्यमंत्र जपं आभ्युदयिक श्राद्धं (नांदिश्राद्धं) च करिष्ये इति संकल्पः ॥

॥ अथ गणपति पूजनं ॥

पट्टे वामृणमये पीठे रक्तवस्त्रेऽरुणाक्षतैः ॥ कार्यमष्टदलं पद्मंतस्योपरि गणेश्वरम् ॥१॥ गणानांत्वेतिसंस्थाप्य पूजयेत्तदनन्तरमिति ॥ अथ ध्यानम् ॥ श्वेतांगं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगंधैः क्षीराब्धौ रत्नदीपैः सुरतरुविमले रत्नसिंहासनस्थम ॥ दोर्भिः पाशांकुशेष्टाभयधृतिविशदं चंद्रमौलिं त्रिनेत्रं ध्यायेच्छांत्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम ॥१॥ ॐ भूर्भुवःस्वः अस्मिन्पूगीफलेसिद्धिबुद्धिसहितमहागणपतयेनमः ध्यायामि ॥ हेहेरंबत्वमेह्येहि अंबिकात्र्यंबकात्मज ॥ सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुःपितः ॥१॥ नागास्य नागहार त्वं गणराज चतुर्भुज ॥ भूषितः स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः ॥२॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ॥ इहागत्य गृहाण त्वं पूजां क्रतुं च रक्ष मे ॥३॥ आवाह्यैवं गणेशं तं पूजाद्रव्यैः प्रपूजयेत ॥ ॐगणानांन्त्वागणपति ०_० हवामहेप्रियाणान्त्वाप्रियपति ०_० हवामहे वसोमम ॥ आहमजानिगर्भधमात्वमजासिगर्भधम ॥ ॐभूर्भुवःस्वःसिद्धिबुद्धिसहितमहागणपतयेनमः गणपतिमावाहयामि ॥ ॐरम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम ॥ आसनं च मया दत्तं गृहाण परमेश्वर ॥१॥ ॐभू०सि०म०आसनं

समर्पयामि ॥ ॐउष्णोदकं निर्मलं च सर्वसौगंध्यसंयुतम् ॥ पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥ ॐभू॰सि॰म॰पाद्यं समर्पयामि ॥२॥ अर्घ्यं ॥ ताम्रपात्रे स्थितं तोयं गंधपुष्पफलान्वितम् ॥ सहिरण्यं ददाम्यर्घ्यं गृहाण परमेश्वर ॥ ॐभू॰सि॰म॰ अर्घ्यं स॰ ॥१॥ सर्वतीर्थसमायुक्तं सुगंधिनिर्मलं जलं ॥ आचमनार्थं मया दत्तं गृहाण परमेश्वर ॐभू॰सि॰म॰ आचमनं स॰ ॥१॥ अथपंचामृतस्नानम् ॥ पंचामृतं मया नीतं पयोदधिघृतं मधु ॥ शुभ्रशर्करया युक्तं स्नानार्थं प्रतिगृह्यताम् ॥ प्रथमं पयःस्नानम् ॥ ॐपय॰पृथिव्यांपयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीः प्रदिशः सन्तुमह्यम् ॥ ॐभू॰सि॰म॰ पयःस्नानं स॰ ॥ पयःस्नानांते शुद्धोदकस्नानं स॰ ॥ शुद्धोदकस्नानांते आचमनीयं स॰ ॥ दधिस्नानम् ॥ ॐदधिक्राव्णोऽअकारिषं जिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणऽआयू॰ पितारिषत् ॥ ॐभू॰सि॰म॰ दधिस्नानं स॰ ॥ दधिस्नानांते शुद्धोदकस्नानं स॰ ॥ घृतस्नानम् ॥ ॐघृतंघृतपावनः पिबतवसांवसापावानः पिबतान्तरिक्षस्यहविरसि स्वाहा ॥ दिशःप्रदिशआदिशोविदिशऽउद्दिशोदिग्भ्यःस्वाहा ॥१॥ ॐभू॰सि॰म॰ घृतस्नानं स॰ ॥ घृतस्नानांते शुद्धोदकस्नानं स॰ ॥ मधुस्नानम् ॥ ॐमधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः । माध्वीर्नःसन्त्वोषधीः ॥१॥ मधुनक्तमुतोषसोमधुमत्पार्थिव॰ रजः ॥ मधुद्यौरस्तुनःपिता ॥२॥ मधुमान्नोवनस्पतिर्मधुमाँरअ-

स्तुसूर्यं ॥ मादृक्वीर्गावोभवंतुनः ॥३॥ ॐभू०सि०म०मधुस्नानं० ॥ मधुस्नानांते शुद्धोदकस्नानं स०॥शर्करास्नानम्॥ॐअपा ०‿० रसमुद्वयस ०‿० सूर्येसन्त ०‿० समाहितम् ॥ अपा ०‿० रसस्ययोरसस्तंत्वोगृण्हाम्युत्तममुपयामगृहीतासीन्द्रायत्वा जुष्टङ्गृह्णाम्येषते योनिरिन्द्रायत्वाजुष्टतमम्॥१॥ ॐभू० सि० म० शर्करास्नानं स० ॥ शर्करास्नानान्ते शुद्धोदकस्नानं स० ॥ इति पंचामृतस्नानम्॥ अथशुद्धोदक स्नानम् ॥ ॐ शुद्धवालः सर्वशुद्धवालोमणिवालस्तऽआश्विनाःश्येत श्येताक्षोरुणस्तेरुद्रायपशुपतयेकर्ण्णायामाऽअवलिप्तारौद्रानभोरूपाःपार्जन्याः ॥१॥ ॐभू. सि० म० शुद्धोदकस्नानं स० ॥ ततः ॐभूर्भुवःस्वः सिद्धिबुद्धिसहितमहागणपतयेनमः इतिमंत्रेणपंचोपचारैःसंपूज्य । उत्तरे निर्माल्यं विसृज्य। अभिषेकमाचरेत् ॥ तदुपरि जलधारां कुर्यात् ॥ ॐआपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन ॥ महेरणायचक्षसे ॥१॥ योवः शिवतमो रसस्तस्यभाजयतेहनः उशतीरिवमातरः ॥२॥ तस्माऽअरंगमामवो यस्य क्षयायजिन्वथ । आपोजनयथाचनः ॥३॥ ॐशांतिः शांतिः सुशांतिर्भवतु ॥ ॐ भू.सि.म. अभिषेकं स० ॥ ॐ भू.सि.म. अभिषेकस्नानांते शुद्धोदकस्नानं स. ॥ ॐयुवा सुवासाःपरिवीतऽआगात्सऽउश्रेयान्भवतिजायमानः ॥ तंधीरास कवयऽउन्नयन्ति स्वाध्योमनसादेवयन्तः ॥ ॐभू सि. म. वस्त्रं स. ॥ नवभिस्तंतुभिर्युक्तं त्रिगुणं च मयाऽऽहृतं ॥ उपवीतं मया दत्तं गृहाण परमेश्वर॥१॥ ॐभू.सि.म. यज्ञोपवीतं स. ॥

चंदनं ॥ श्रीखंडचंदनं दिव्यं केशरादि समन्वितं ॥ विलेपनं सुरश्रेष्ठ चंदनंप्रतिगृह्यताम् ॐभू.सि.म. चंदनं स.॥ गंधं॥ ॐत्वाङ्गन्धर्वा अखनं स्त्वामिन्द्रस्य बृहस्पतिः ॥त्वा-मोपधेसोमेराजाविद्वान्यक्ष्मादमुच्यत ॥ ॐभू.सि.म. गंधं स० ॥ अक्षताः ॥ अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभनाः ॥ मया निवेदिता भक्त्या गृहाणपरमेश्वर ॥१॥ ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ॥ अस्तोषतस्वभानवोविप्रान्नविष्ठयामतीयोजान्वि-न्द्रतेहरी ॥ ॐभू.सि.म. अक्षतान्स० ॥ पुष्पाणि ॥ माल्यादीनि सुगंधीनि माल-त्यादीनि वै प्रभो ॥ मयाऽऽहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ॥ ॐओषधीः प्रतिमोदध्वंपुष्पवतीः प्रसूवरीः इवसजित्वरीर्वीरुधः पारयिष्णवः॥१॥ॐभु.सि.म. सुगंधि द्रव्यसंयुतानि पुष्पाणि स०॥ दुर्वांकुराः॥ दुर्वे ह्यमृतसंपन्ने शतमूले शतांकुरे ॥सर्वपातक-संहर्त्रि शतमायुष्यवर्धिनि ॥१॥ ॐकाण्डात्काण्डात्प्ररोहन्ति परुषःपरुषस्परि ॥ एवा-नोदूर्वेप्रतनुसहस्रेणशतेन च ॥ ॐभु.सि.म. दूर्वाङ्कुरान् स० ॥ परिमलसौभाग्य-द्रव्यम् ॥ हरिद्राकुंकुमं चैव सिंदूरादिसमन्वितम् ॥ सौभाग्यद्रव्यसंयुक्तं गृहाण परमेश्वर ॥१॥ सुगन्धोषधिचूर्णं च नानापरिमलानि च ॥ नानासुगंधतैलानि अतः शांति प्रयच्छ मे ॥२॥ ॐअहिरिवभोगैःपर्य्येतिबाहुञ्ज्यायाहेतिं परिबाधमानः ॥ हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमा ० ० संपरिपातुविश्वतः ॥ ॐभु.सि.म. सौभाग्यद्रव्याणि स. ॥ धूपम् ॥ वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः ॥ आघ्रेयः

सर्वदेवानांधूपोयंप्रतिगृह्यताम् ॥१॥ ॐधूरसिधूर्वधूर्वन्तन्धूर्वतंयोऽस्मान्धूर्वतितन्धूर्वयं-
व्वयंधूर्वामः ॥ देवानामसिवन्हितम ०‿० सस्नितमंपप्रितमञ्जुष्टतमन्देवहूतमम् ॥२॥
ॐभू.सि.म. धूपं स० ॥ दीपम् ॥ साज्यं च वर्तिसंयुक्तं वन्हिना योजितं मया ॥
दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥१॥ ॐअग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा
सूर्य्योज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ अग्निर्वर्च्चोज्योतिर्व्वर्चःस्वाहा सूर्योवर्च्चो
ज्योतिर्वर्च्चःस्वाहा ॥ ज्योतिः सूर्य्यः सूर्य्योज्योतिः स्वाहा ॥२॥ ॐभू.सि.म.
दीपं स० ॥नैवेद्यं ॥ शर्कराखंडखाद्यानि दधिक्षीरघृतानि च ॥ आहारं भक्ष्यभोज्यं च नैवेद्यं
प्रतिगृह्यताम् ॥१॥ ॐयेदेवासोदिव्येकादशस्थ पृथिव्यामध्येकादशस्थ ॥ अप्सु-
क्षितोमहिनैकादशस्थ तेदेवासोयज्ञमिमं जुषध्वम् ॥२॥ ॐभू.सि.म. नैवेद्यं स०
॥ गायत्रीमंत्रेण संप्रोक्ष्य ॥ धेनुमुद्रांप्रदर्श्य ॥ पंचप्राणाहुतीर्दद्यात् ॥ ॐप्राणाय-
स्वाहा ॥ ॐअपानायस्वाहा ॥ ॐव्यानायस्वाहा ॥ ॐउदानायस्वाहा ॥ ॐसमा-
नायस्वाहा ॥ नैवेद्यांते आचमनं स० ॥ मध्ये पानीयं स० ॥ पुनः अमृतंकरोमि ॥
ॐभू.सि.म.उत्तरापोशनं स. ॥ ॐभू.सि.म.हस्तप्रक्षालनं स० ॥ ॐभू.सि.म. मुख-
प्रक्षालनं स० ॥ केशरागरुकस्तुरीमांसी च सिकतातथा ॥ सुगंधद्रव्यसंयुक्तं करोद्वर्तनं
गृह्यताम् ॥१॥ ॐभू.सि.म करोद्वर्तनार्थं गंधं स० ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥
तेन मे सफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥१॥ ॐयाःफलिनीर्याऽअफलाऽअपुष्पा

याश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचन्त्व ०‿० हसः ॥१॥ ॐभू.सि.म. फलं स० ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ एलादिचूर्णं संयुक्तं तांबूलं प्रतिगृह्यताम् ॥१॥ ॐयत्पुरुषेण हविषादेवा यज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यं ग्रीष्म ऽइध्मः शरद्धविः ॥ ॐभू.सि.म. तांबूलं स० ॥ हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः ॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छमे ॥ ॐहिरण्यगर्भः समवर्तताग्रे भूतस्यजातः पतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवाय हविषाविधेम ॥ ॐभू.सि.म. हिरण्यदक्षिणां स० ॥ कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ॥ आरार्तिकमहं कुर्वे पश्यमे वरदा भव ॥१॥ ॐइद ०‿० हविःप्प्रजननम्मेऽअस्तुदशवीरः सर्व्वगण ०‿० स्वस्तये ॥ आत्मसनिप्प्रजासनिपशुसनिलोकसन्यभयसनि ॥ अग्निः प्प्रजांबहुलाम्मे करोत्वन्नम्पयोरेतोऽअस्मासुधत्त ॥१॥ ॐभू.सि.म. आरार्तिकं स० ॥ पुष्पांजलिः ॥ नानासुगंधपुष्पाणि यथाकालोद्भवानि च ॥ पुष्पांजलिर्मयादत्ता गृहाण परमेश्वर ॥१॥ ॐनमोगणेभ्यो गणपतिभ्यश्च वो नमोनमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमोनमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमोनमो विरूपेभ्यो विश्वरूपेभ्यश्चवोनमः ॥ ॐभू.सि.म. मंत्रपुष्पांजलिं स० ॥ प्रदक्षिणा ॥ यानिकानि च पापानि ज्ञाताज्ञातकृतानि च ॥ तानि सर्वाणि नश्यंति प्रदक्षिणपदेपदे ॥१॥ ॐसप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ॥ देवायद्य-

ज्ञन्तन्त्वानाअवभ्रन्त्पुरुपम्पशुम् ॥१॥ ॐभृ.सि.म. प्रदक्षिणां स० ॥ अथ विशेषार्घ्यः ॥
अर्घ्यपात्रे सजलगंध रक्तचंदनाक्षतपुष्पदूर्वा हिरण्यसहित नालीकेरं गृहीत्वा ॥ रक्ष-
रक्षगणाध्यक्ष रक्षत्रैलोक्यरक्षक ॥ भक्तानामभयंकर्ता त्राताभवभमार्णवात् ॥१॥ द्वैमा-
तुरकृपासिन्धो षाण्मातुराग्रज प्रभो ॥ वरद त्वं वरं देहि वांछितं वांछितार्थद ॥२॥
गृहाणार्घमिमंदेव सर्वदेवनमस्कृत ॥ अनेन फलदानेन फलदोऽस्तु सदामम ॥३॥
ॐभृ.सि.म. विशेषार्घं स० । अथ प्रार्थना ॥ विघ्नेश्वराय वरदाय सुरप्रियाय लंबो-
दराय सकलाय जगद्धिताय ॥ नागाननाय श्रुतियज्ञ विभूषिताय गौरीसुताय
गणनाथ नमोनमस्ते ॥१॥ भक्तार्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय
सुरेश्वराय ॥ विद्याधराय विकटाय च वामनाय भक्तप्रसन्न वरदाय नमो नमस्ते
॥२॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ॥ नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥
३॥ विश्वरूप स्वरूपाय नमस्ते ब्रह्मचारिणे ॥ भक्तप्रियाय देवाय नमस्तुभ्यं
विनायक ॥४॥ लंबोदर नमस्तुभ्यं सततं मोदकप्रिय ॥ निर्विघ्नं कुरु मे देव सर्व
कार्येषु सर्वदा ॥५॥ त्वां विघ्नशत्रुदलनेति च सुंदरेति भक्तप्रियेति सुखदेति वर-
प्रदेति ॥ विद्याप्रदेत्यघहरेति च ये स्तुवंति तेभ्यो गणेशवरदो भव नित्यमेव ॥६॥
ॐभृ.सि.म. प्रार्थनापूर्वकं नमस्कारान् समर्पयामि अनयापूजया सिद्धिबुद्धिसहित
महागणपतिः साङ्गः सपरिवारः प्रीयताम् ॥ इति गणपति पूजनम् ॥

॥ अथ पुण्याहवाचन प्रयोगः ॥

अद्यपूर्वो० अमुकवासरे अद्यकरिष्य माणकर्मा गतया विहितं स्वस्ति पुण्याहवाचनं च करिष्ये ॥ स्वाग्रेधान्यराशिंकृत्वा तदुपरिकलशं संस्थापयेत ॥ यथा ॥ भूरसीत्यादि कर्मारंभे २० तमे पृष्टेऽवलोकनीयम् ॥

अवनिकृतजानुमंडलः कमलमुकुलसदृशमंजलिं शिरस्याधायानन्तरं दक्षिणेन पाणिना स्वर्णपूर्णकलशं धारयित्वा दीर्घानागानद्योगिरयस्त्रीणि विष्णुपदानि च ॥ ॐत्रीणिपदाविचक्रमेविष्णुर्गोपाअदाभ्यः ॥ अतोधर्माणिधारयन् ॥ तेनायुःप्रमाणेनपुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु इति यजमानो वदेत् ॥ पुण्यं पुण्याहं दीर्घमायुरस्तु इतिद्विजाब्रूयुः ॥ एवं वारत्रयं कृत्वाकलशं भूमौ धान्यराशौ संस्थाप्य ॥ ब्राह्मणानां हस्तेषु सुप्रोक्षितमस्तु ॥ शिवा आपः सन्तु ॥ सन्तु शिवा आपः ॥ सौमनस्यमस्तु ॥ अस्तुसौमनस्यम् ॥ अक्षतंचारिष्टंचास्तु ॥ अस्त्वक्षतमरिष्टं च ॥ गंधाः पान्तुसौमंगल्यं चास्त्विति भवंतोब्रुवंतु ॥ गंधाःपान्तुसौमंगल्यंचास्तु ॥ एवंसर्वत्र ॥ अक्षताःपान्तुआयुष्यमस्त्विति० ॥ अक्षताःपान्तुआयुष्यमस्तु ॥ पुष्पाणिपान्तुसौश्रियमस्त्विति० ॥ पुष्पाणिपान्तुसौश्रियमस्तु ॥ तांबूलानिपान्तुऐश्वर्यमस्त्विति० ॥ तांबूलानिपान्तुऐश्वर्यमस्तु ॥ पूगीफलानिपान्तुबहुदेयंचास्त्विति० ॥ पूगीफलानिपान्तुबहुदेयंचास्तु ॥ दक्षिणाःपान्तुबहुधनमस्त्विति० ॥ दक्षिणापान्तुबहु-

धनमस्तु ॥ पुनरत्राः पान्तुस्वर्चितमस्त्विति० ॥ पुनरत्राः पान्तुस्वर्चितमस्तु ॥ श्रीर्यशोविद्याविनयोवित्तं बहुपुत्रं बहुधनं चायुष्यं चास्त्विति भवंन्तो ब्रुवन्तु ॥ श्रीर्यशोविद्याविनयोवित्तं बहुपुत्रं बहुधनं चायुष्यंचास्तु । दीर्घमायुः श्रेयःशांतिःपुष्टिस्तुष्टिश्चास्त्विति भवंतोब्रुवंतु ॥ दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु इति यजमानमूर्ध्न्यभिषिंचेयुः ॥

ॐव्रतजपनियमतपः स्वाध्यायक्रतु दमदयादान विशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् । इतियजमानः ॥ समाहितमनसः स्मः । इतिद्विजाः ॥ प्रसीदंतुभवंतः । इतियजमानोब्रूयात ॥ प्रसन्नाःस्मः । इतिद्विजाब्रूयुः ॥ ततोयजमानोब्रूयात ॥ ॐशांतिरस्तु ॥ अस्तु शांतिरितिद्विजाः ॥ एवं प्रतिवचनं सर्वत्रदद्युः ॥ एवं ॐपुष्टिरस्तु ॥ अस्तुपुष्टिः ॥ ॐतुष्टिरस्तु ॥ अस्तुतुष्टिः ॥ ॐवृद्धिरस्तु ॥ अस्तुवृद्धिः ॥ ॐअविघ्नमस्तु ॥ अस्तुअविघ्नम् ॥ ॐआयुष्यमस्तु ॥ अस्तुआयुष्यम् ॥ ॐआरोग्यमस्तु ॥ अस्तुआरोग्यम ॥ ॐशिवंकर्मास्तु ॥ अस्तु शिवंकर्म ॥ ॐकर्मसमृद्धिरस्तु ॥ अस्तुकर्मसमृद्धिः ॥ ॐवेदसमृद्धिरस्तु ॥ अस्तुवेद समृद्धिः ॥ ॐशास्त्रसमृद्धिरस्तु ॥ अस्तुशास्त्रसमृद्धिः ॥ ॐधनधान्यसमृद्धिरस्तु ॥ अस्तुधनधान्यसमृद्धिः ॥ ॐपुत्रपौत्रसमृद्धिरस्तु ॥ अस्तुपुत्रपौत्रसमृद्धिः ॥ ॐइष्टसंपदस्तु ॥ अस्तुइष्टसंपत ॥ ॐअरिष्टनिरसनमस्तु ॥ पश्चिमेद्विवारं ॥ अस्तुअरि-

ष्टनिरसनम् ॥ ॐयत्पापंरोगमशुभमकल्याणंतद्दूरेप्रतिहतमस्तु ॥ अस्तुयत्पापंरोगमशुभमकल्याणंतद्दूरेप्रतिहतम् ॥ ॐयच्छ्रेयस्तदस्तु ॥ अस्तुयच्छ्रेयस्तत् ॥ ॐउत्तरे कर्मणिनिर्विघ्नमस्तु ॥ अस्तुउत्तरेकर्मणिनिर्विघ्नम् ॥ ॐउत्तरोत्तरमहरहरभिवृद्धिरस्तु अस्तु उत्तरोत्तरमहरहरभिवृद्धिः ॥ ॐउत्तरोत्तराःक्रियाःशुभाःशोभनाः संपद्यंताम् ॥ संपद्यन्तां उत्तरोत्तराः क्रियाःशुभाः शोभनाः॥ ॐतिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु ॥

ब्राह्म्यं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकम् ॥ वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवंतु नः ॥ पुनंतु मादेवजनाः ॥१॥ भोब्राह्मणा मह्यं सकुटुंबिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय अद्यकरिष्यमाण नवचंड्याख्य कर्मागभूतग्रहशांत्यादि कर्मणः पुण्याहंभवंतोब्रुवंतु इति यजमानो वदेत् ॥ अस्तुपुण्याहंपुण्याहं इति द्विजाः ॥

पृथिव्यामुद्धृतायां तुयत्कल्याणंपुराकृतं ॥ ऋषिभिः सिद्धगंधर्वैस्तत्कल्याणं ब्रुवंतु नः॥ भोब्राह्मणाः अद्य०कर्मणः कल्याणं भवंतोब्रुवंतु अस्तुकल्याणम् ॥ ॐयथेमांवाचङ्कल्याणीमावदानिजनेभ्यः ॥ ब्रह्मराजन्याभ्या ०‿० शूद्रायचार्यायचस्वायचारणाय च ॥ प्रियोदेवानांदक्षिणायैदातुरिहभूयासमयम्मेकामः समृध्यतामुपमादोनमतु ॥

सागरस्ययथावृद्धिर्महालक्ष्म्यादिभिः कृताः ॥ संपूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवंतुनः ॥ भोब्राह्मणाःअद्य०कर्मणः ऋद्धिंभवन्तो ब्रुवन्तु ॥ कर्मऋध्यताम् ॥ ॐसत्रस्य ॥

ऋद्धिरस्यगन्मज्योतिरमृताऽअभूम ॥ दिवंपृथिव्याऽअध्यारुहामाविदामदेवान्स्व-
ज्योंति ॥ सत्रस्यऋक् ॥

स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा ॥ विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तुनः ॥ भो ब्राह्मणाः अद्यऽकर्मणेस्वस्तिभवन्तोब्रुवन्तु ॥ आयुष्मतेस्वस्ति ॥ ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिनः पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्ति-नोबृहस्पतिर्दधातु ॥

समुद्रमथनाज्जाता जगदानंदकारका ॥ हरिप्रिया च मांगल्या तां श्रियं च ब्रुवन्तु नः ॥ भोब्राह्मणाःअद्यऽकर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु ॥ अस्तुश्रीः ॥ ॐश्री-श्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइ-षाणसर्वलोकम्मऽइषाण ॥

अनेन पुण्याहवाचनाख्येन कर्मणा प्रजापतिः प्रीयताम् ॥ अस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च सर्वः परिपूर्णोस्तु ॥ अस्तुपरिपूर्णः ॥

अथाभिषेकः ॥ अभिषेके पत्नी वामतः ॥ एकस्मिन्पात्रेवरुणकलशोदकं गृहीत्वा अविधुराश्चत्वारोब्राह्मणा दूर्वाम्रपल्लवैर्यजमानमभिषिंचेयुः ॥ तत्रमंत्राः ॥ ॐपयः पृथिव्यांपयऽओषधीषुपयोदिव्यंतरिक्षेपयोधाः ॥ पयस्वतीः प्रदिशः सन्तु-

मह्यम ॥१॥ ॐपंचनद्यः सरस्वतीमपियन्तिसस्रोतसः ॥ सरस्वतीतुपंचधासोदेशेभवत्सरित ॥२॥ ॐवरुणस्योत्तम्भनमसिवरुणस्यस्कंभसर्ज्जनीस्थोवरुणस्यऽऋतसदन्यसिवरुणस्यऽऋतसदनमसिवरुणस्यऽऋतसदनमासीद ॥३॥ ॐपुनन्तुमादेवजनाः पुनन्तुमनसाधियः ॥ पुनन्तुविश्वाभूतानिजातवेदःपुनीहिमा ॥४॥ ॐदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम ॥ सरस्वत्यैवाचोयन्तुर्यन्त्रियेदधामि बृहस्पतेष्ट्वासाम्राज्येनाभिषिंचाम्यसौ ॥५॥ ॐदेवस्यत्वा० ॥ सरस्वत्यैवाचोयन्तुर्यन्त्रेणाग्नेःसाम्राज्येनाभिषिंचामि ॥६॥ ॐदेवस्यत्वा० ॥ अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिंचामिसरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषिंचामीन्द्रस्येन्द्रियेणबलाय श्रियैयशसेभिषिंचामि ॥७॥ ॐविश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रंतन्नऽआसुव ॥८॥

ॐद्यौःशान्तिरन्तरिक्ष ँ शान्तिः पृथिवीशान्तिरापः शांतिरोषधयः शांतिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्व ँ शान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥१॥ ॐयतोयतःसमीहसेततोनोअभयंकुरु ॥ शंनः कुरुप्रजाभ्योभयन्नःपशुभ्यः ॥ इति अमृताभिषेकोस्तु ॥ ॐशांतिःशांतिःशांतिः सुशांतिर्भवतु ॥ स्वस्थानेउपविश्य ॥ हस्तेजलंगृहीत्वा ॥ अभिषेककर्तृभ्योब्राह्मणेभ्योयथास्माईदक्षिणांदास्येएभिःपंचवाक्यैः पुण्याहवाचनेन प्रजापतिःप्रीयतां इतिपुण्याहवाचनप्रयोगः ॥

अद्येत्यादि० तिथौ अमुकवासरे अद्य करिष्यमाणकर्मांगतया विहितं श्री·

गणपतिसहितगौर्यादिषोडशमातृकाणां वसोर्द्धारासहितानां स्थापनपूजनप्रतिष्ठापनाद्य-
र्चनमहंकरिष्ये इति संकल्पः ॥ ततो देवता आवाहयेत् ॥ हस्ते अक्षतान् गृहीत्वा ॥
अग्निकोणे ॥ ॐगणानांत्वागणपति ०‿० हवामहे प्रियाणांत्वाप्रियपति ०‿० हवामहे
निधीनान्त्वानिधिपति ०‿० हवामहेव्वसोमम ॥ आहमजानिगर्भधमात्वमजासिगर्भधम्
॥१॥ ॐभूर्भुवःस्वःगणेशाय नमः गणेशमावाहयामिस्थापयामि ॥ एवं सर्वत्र ॥ ईशान
कोणे ॥ ॐअंबेऽअंबिकेऽम्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकःसुभद्रिकाङ्काम्पील-
वासिनीम् ॥२॥ ॐभूर्भुवःस्वःकुलदेवतायैनमः कुलदेवतामावा०मि ॥ नैर्ऋत्यकोणे
॥ आयंगौःपृश्निरक्रमीदसदन्मातरपुरः ॥ पितरञ्चप्रयन्त्स्वः ॥३॥ ॐभू०गौर्यै०
गौरीमावा० मि ॥ वायव्यकोणे ॥ ॐहिरण्यरूपाऽउपसोव्विरोकऽउभाविन्द्राउदिथः-
सूर्यश्च ॥ आरोहतंव्वरुणमित्रगर्तंततश्चक्षाथामदितिन्दितिंच मित्रोऽसिव्वरुणोसि ॥४॥
ॐभू०पद्मायै० पद्मामावा०मि० ॥ वायव्यपश्चिमे ॥ ॐकदाचनस्तरीरसिनेन्द्रसश्चसि-
दाशुषे ॥ उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपृच्यतऽआदित्येभ्यस्त्वा ॥५॥ ॐभू.
शच्यै०शचिमा०मि ॥ तदुत्तरे ॥ ॐमेधाम्मेव्वरुणोददातुमेधामग्निःप्रजापतिः ॥
मेधामिन्द्रश्चव्वायुश्चमेधान्धाताददातुमेस्वाहा ॥६॥ ॐभू०मेधायै०मेधामा०मि ॥
दक्षिणे ॥ ॐतत्सवितु० ॥७॥ ॐभू०सावित्र्यै०सावित्रीमा०मि ॥ तत्पूर्वे ॥ ॐवि-
ज्यंधनुः कपर्दिनो विशल्योवाणवाँ२उत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषंगधिः ॥८॥

ॐभू० विजयायै० विजयामा०मि ॥ उत्तरे ॥ ॐयातेरुद्रशिवातनूरघोरापापकाशिनी
तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥९॥ ॐभू० जयायै० जयामा० मि ॥ तत्पूर्वे ॥
ॐइन्द्रऽआसान्नेताबृहस्पतिर्द्दक्षिणायज्ञःपुरऽएतुसोमः ॥ देवसेनानामभिभंजतीना-
ञ्जयन्तीनांमरुतोयन्त्वग्रम् ॥१०॥ ॐभू०देवसेनायै० देवसेनामा०मि ॥ वाह्याग्नेयकोणे
॥ ॐपितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः
प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥ अक्षन्पितरोमीमदन्त पितरोतीतृपन्त
पितरः पितरः शुंधध्वम् ॥११॥ ॐभू०स्वधायै० स्वधामा० मि ॥ वाह्येशानकोणे ॥
ॐस्वाहायज्ञंवरुणःसुक्षत्रोभेषजङ्करत ॥ अतिच्छन्दाइन्द्रियम्बृहदृषभोगौर्व्वयोदधुः ॥१२॥
ॐभू० स्वाहायै० स्वाहामा० मि ॥ पूर्वे ॥ ॐसमख्येदेव्याधियासन्दक्षिणयोरुचक्ष-
सा ॥ मामऽआयुःप्रमोषीर्मोऽअहंतववीरंविदेयतवदेविसन्दृशि ॥१३॥ ॐभू० मातृ-
भ्यो० मातृरा० मि ॥ तदुत्तरे ॥ ॐआपोऽअस्मान्मातरः शुन्धयन्तुघृतेननोघृतप्वः
पुनन्तु ॥ विश्व०~०हिरिप्रम्प्रवहन्तिदेवीरुदिदाभ्यःशुचिरापूतऽएमि ॥ दीक्षातप-
सोस्तनूरसितान्त्वाशिवा०~०शग्मामपरिदधेभद्रंवर्णम्पुष्यन् ॥१४॥ ॐभू०लोकमातृ-
भ्यो० लोकमातृरावाहया० मि ॥ मातृलोकमातृमध्ये ॐभार्यदार्व्वाहारम्प्रभायाऽअ-
ग्न्येधंब्रध्नस्यविष्टपायाभिषेक्तारंव्वर्षिष्ठाय नाकायपरिवेष्टारं देवलोकाय पेशितारम्मनु-
ष्यलोकाय प्रकरितार०~०सर्व्वेभ्य लोकेभ्यऽउपसेक्तारमवऋत्यैव्वधायोपमन्थितारं

मेधायव्वासःपप्तूलीप्रकामायरजयिष्यीम् ॥१५॥ ॐभू०धृत्यैन० धृतिमा०मि ॥ बाह्वनैकृते ॥
ॐत्वष्टातुरीपोअद्भुतइन्द्राग्नीपुष्टिवर्धना ॥ द्विपदाछन्दऽइन्द्रियमुक्षागौर्नवयोदधुः
॥१६॥ ॐभू० पुष्ट्यैन० पुष्टिमावा० मि० ॥ बाह्ववायव्ये ॥ ॐयत्प्रज्ञानमुतचेतो-
धृतिश्चयज्ज्योतिरन्तरमृतंप्रजासु ॥ यस्मान्नऋतेकिंचनकर्मक्रियतेतन्मेमनः शिवसं-
कल्पमस्तु ॥१७॥ ॐभू० तुष्ट्यैन० तुष्टिमा० मि ॥ ॐमनोजूतिर्जुषता० ॥२८॥
ॐभूर्भुवःस्वःसगणेशगौर्याद्यावाहितमातरः सुप्रतिष्ठितावरदाभवत ॥ ॐसमख्येदेव्या-
धियासन्दक्षिणयोरुचक्षसा ॥ मामऽआयुः प्रमोषीर्मोऽअहन्तववीरंविदेयतवदेविस-
न्दृशि ॥१९॥ इतिमंत्रेणषोडशोपचारैः पूजनंकार्यम् ॥ अनयापूजयाश्रीगणेशगौर्या-
द्यावाहितमातरः प्रीयंताम् ॥

अथ घृतमातरः ॥ अथ कुड्येकुंकुमतिलकोपरिसप्तघृतमातृकास्थापनम् ॥ ॐ
भू० श्रियैनमः श्रियमावाहयामि स्थापयामि ॥ ॐभू०लक्ष्म्यैन० लक्ष्मीमा० ॥ ॐ
भू०धृत्यैन० धृतिमा० ॥ ॐभू०मेधायैन० मेधामा० ॥ ॐभू०पुष्ट्यैन० पुष्टिमा० ॥
ॐभू०श्रद्धायैन० श्रद्धामा० ॥ ॐभू०सरस्वत्यैन० सरस्वतीमा० ॥ इत्यावाह्य ॥ ॐ
मनोजूतिर्जुषता० ॥२०॥ ॐभूर्भुवःस्वःश्रियाद्यावाहितमातरः सुप्रतिष्ठितावरदाभवत॥
ॐश्रीणामुदारोधरुणोरयीणाम्मनीषाणाम्प्रार्पणःसोमगोपाः ॥ वसुः सूनुःसहसोऽअ-
प्सुराजाविभात्यग्रऽउषसामिधानः ॥२१॥ इतिमंत्रेणषोडशोपचारैस्तासां पूजनंकार्यम् ॥

॥३६२॥

अनयापूजयाश्रियाच्यावाहितमातरःप्रीयंताम् ॥

ततोवसोर्धारा ॥ यक्षकुड्यंआवाहितघृतमातृकोपरिरोप्यमुद्गांगुडयुक्तां कृत्वाना- गवल्लीदलेनकेवलेनवाघृतेनाभितोधारां वसोःपवित्रमितिमंत्रेणपातयेत ॥ ॐवसोः पवित्रमसिशतधारंवसोःपवित्रमसिसहस्रधारम् ॥ देवस्त्वासवितापुनातुवसोपवित्रेण शतधारेणसुप्वाकामधुक्षः ॥२२॥ इतिमंत्रेणसप्तधाराकर्तव्या ॥

अथायुष्यमंत्रजपः ॥ ॐआयुष्यंवर्चस्य ०‿० रायस्पोषमौद्भिदम् ॥ इद ०‿० हिरण्यंवर्चस्वज्जैत्रायाविशतादुमाम् ॥२३॥ ॐनतद्रक्षा ०‿० सिनपिशाचास्तरन्तिदेवा- नामोजः प्रथमज ०‿० ह्येतत् ॥ योबिभर्तिदाक्षायण ०‿० हिरण्य ०‿० सदेवेषुकृणु- तेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः ॥२४॥ ॐयदाबध्नन्दाक्षायणाहिरण्य ०‿० शतानीकायसुमनस्यमानाः ॥ तन्मऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ इत्यायुष्यमंत्रजपः ॥

अथ नांदीश्राद्धम् ॥ तत्रमातापितृमातामहेपुर्जीवत्सुनांदीश्राद्धलोपएव ॥ जी- वत्पितृकस्यतु ॥ गोत्राःजनकस्यपितृपितामहप्रपितामहाःनांदीमुखाइत्यागृहः ॥ जीवे- त्तुयदिवर्गाद्यस्तंवर्गंतुपरित्यजेत्—इत्युक्तेः ॥ तत्रप्रयोगः ॥ ताम्रपात्रेत्रीन्अक्षतपुंजा- न्कृत्वातेषामुपरिपूगीफलानिनिधाय दक्षिणहस्तेदूर्वाङ्कुरान्गृहीत्वा वामहस्तेनजलंदू- र्वोपरिपातयेत् ॥ यथा—सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः ॐभूर्भुवःस्वःइदंवः

पाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः ॥ गोत्राः पितृपितामहप्रपितामहाः सपत्नीकाः नांदीमुखाः ॐभूर्भुवःस्वः इदं वः पाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः ॥ द्वितियगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः ॐभू०इदंवःपाद्यं० ॥ अद्यपू०अस्यमहशांत्याख्यस्यकर्मणोंगत्वेनसांकल्पिकेनविधिना नांदीश्राद्धंकरिष्ये ॥ आसनदानम–सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः ॐभूर्भु० इदमासनम् ॥ सुखासनम् ॥ नान्दीश्राद्धेक्षणो क्रियेताम ॥ ॐतथा ॥ प्राप्नुतांभवन्तो कर्ता ॥ प्राप्नुवावः विप्रो ॥ गोत्राः पितृपितामहप्रपितामहाः सपत्नीकाः नांदीमुखाः ॐ भूर्भुवः इदमासनम ॥ सुखासनम् ॥ नान्दीश्राद्धेक्षणाः क्रियन्ताम ॥ तथा ॥ प्राप्नुवन्तु भवन्तः ॥ प्राप्नवाम ॥ द्वितीयगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः ॐभू०इदमासनम ॥ सुखासनम् ॥ नान्दीश्राद्धे क्षणाः क्रियन्ताम ॥ तथा ॥ प्राप्नुवंतु भवन्तः ॥ प्राप्नवाम ॥ ततो गंधादिदानम–सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः इदंवोगंधाद्यर्चनंस्वाहासंपद्यतांवृद्धिः ॥ गोत्राः पितृपितामहप्रपितामहाः सपत्नीकाः नांदीमुखाः इदंवो गंधा० ॥ द्वितीयगोत्राः माता-महप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः इदंवोगंधाद्य० ॥ भोजननिष्क्रय-द्रव्यदानम–सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः ब्राह्मणयुग्मभोजनपर्याप्तमन्नंत-न्निष्क्रयीभूतंकिंचिद्धिरण्यंवादत्तंअमृतरूपेणवः स्वाहासंपद्यतांवृद्धिः ॥ गोत्रा पितृ-

पितामहप्रपितामहाः सपत्नीकाः नांदीमुखाः ब्राह्मणयुग्म० ॥ द्वितीयगोत्राः माता-
मह प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः ब्राह्मणयुग्म० सक्षीरयवमुदक-
दानम्–सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः प्रीयंताम् ॥ गोत्राः पितृ पितामह
प्रपितामहाः सपत्नीकाः नांदीमुखाः प्रीयंताम ॥ द्वितीयगोत्राः मातामह प्रमातामह
वृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः प्रीयंताम ॥ आशीर्वादग्रहणम्–गोत्रं नो वर्द्धताम ॥
वर्द्धतां वो गोत्रम ॥ दातारो नोभिवर्द्धताम । अभिवर्द्धतांवोदातारः ॥ वेदाश्च नोभि-
वर्द्धताम् । अभिवर्द्धतां वो वेदाः ॥ संततिर्नोभिवर्धताम् । अभिवर्धतां वः संततिः ॥ श्र-
द्धा च नो व्यगमत् । माव्यगमद्वः श्रद्धा ॥ बहुदेयं च नोस्तु । अस्तु वो बहुदेयम् ॥ अन्नं
च नो बहु भवेत । भवतु वो बह्वन्नम् ॥ अतिथींश्च लभामहै । लभ्यंतामतिथयः ॥
याचितारश्च नः संतु । संतु वो याचितारः ॥ एता आशिषः सत्याः सन्तु । संत्वेताः सत्या
आशिषः ॥ दक्षिणादानम्–सत्यवसुसंज्ञकेभ्यो विश्वेभ्योदेवेभ्यो नांदीमुखेभ्यः कृतस्य
नांदीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूल निष्क्रयीभूतां दक्षिणांदातुमह-
मुत्सृजे ॥ गोत्रेभ्यः पितृपितामह प्रपितामहेभ्यः सपत्नीकेभ्यो नांदीमुखेभ्यः कृतस्य०
॥ द्वितीयगोत्रेभ्यो मातामह प्रमातामह वृद्धप्रमातामहेभ्यः सपत्नीकेभ्यो नांदीमुखे-
भ्यः कृतस्य० ॥ ततोनांदीश्राद्धंसंपन्नमितिकतांवदेत । सुसंपन्नमिति विप्राः ॥ ततो
वाजेवाजइतिविसर्जनम् ॥ ॐवाजेवाजेऽवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाः ॥

अस्यमश्व — पिवतमादयध्वन्तृप्तायातपथिभिर्देवानैः ॥ आमावाजस्येत्यनुव्रजेत ॥
ॐआमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे ॥ आमागन्ताम्पितरामातरा
चामासोमोअमृतत्वेनगम्यात् ॥ नमस्कारः ॥ पितापितामहश्चैवतथैवप्रपितामहः ॥
मातामहस्तत्पिताचप्रमातामहकादयः ॥१॥ एतेभवन्तुमेप्रीताःप्रयच्छंतुचमंगलम् ॥
इति संप्रार्थ्य । अस्मिन्नांदीश्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचना-
न्नांदीमुखप्रसादाच्च सर्वः परिपूर्णोस्तु इति कर्ता वदेत् ॥ अस्तु परिपूर्णः इति विप्राः ॥
इति नांदीश्राद्धम् ॥

॥ सर्वकामनासिद्धिप्रदगायत्रीप्रयोगः ॥

ॐ भूर्भुवः स्वः ॐतत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि धियो यो नः प्रचोदयात् ॥

ॐहंसः श्रीं त् या द् चो प्र नः यो यो धि ॐहंसः श्रीं हि म धी
साध्यनाम साध्यस्य च जन्म नक्षत्रं अमुकस्य वश्याकर्षणं कुरुकुरु
ॐ हंसः श्रीं स्य व दे र्गो भ ण्यं ॐहंसः श्रीं रे वं तु
वि स त् त ॐ हंसः श्रीं स्वः वः र्भु भू ॐ हंसः श्रीं

आयुष्यवर्धनार्थ लक्षजपः सुवर्णमाला विल्वदलहोमः ॥ आकर्षणार्थे वशीकरणार्थे च हरिद्रया होमः लक्षजपः ॥ उच्चाटन विद्वेषण मारणार्थे लक्षजपः अर्कपुष्प राजिका सैंधव मच्छेरंडतैलैः होमः अत्र गर्दभ दंतजा माला चेदुत्तमा ॥

॥ दुर्गासप्तशती षोडशांगानुक्रमणी ॥

अंगानुक्रमः	अंगनाम	पृष्ठं
१	श्रीदुर्गा महाचंडी देवताया आवाहनं प्रथमांगं	१
२ अ	श्री भगवतीस्तुतिः द्वितीयांगं	५
,, आ	श्री महालक्ष्मी हृदयस्तुतिः पुनः द्वितीयं द्वितीयांगं	८
३ अ	श्री नवार्णन्यासः एकादशन्यासाः तृतीयांगं	१६
,, आ	दलं पुनश्च तृतीयांगं	१९ज
,, इ	श्री चंडीहृदयं पुनश्च तृतीयांगं (सप्तशती हृदयं)	१९ठण
,, ई	रुद्रचंडी पुनश्च तृतीयांगं	२०
४	कंठादि मातृकान्यासः चतुर्थांगं	३०
५	महातत्त्व न्यासः पंचमांगं	३४
६	कमलामातृकान्यासः षष्ठांगं	३७
७ अ.	सप्तशती न्यासः सप्तमांगं	४२
,, आ	श्री वनदुर्गा गायत्री कवचस्तोत्रं पुनश्च सप्तमांगं	४६
८	मृतसंजीवनी शुक्रविद्या अष्टमांगं	६२
९	कुंजिका स्तोत्रं नवमांगं	६४

१० महाकाली सूक्तं दशमांगं	६७
११ महालक्ष्मी सूक्तं एकादशांगं	७२
१२ महासरस्वती सूक्तं द्वादशांगं	७७
१३ अ श्रीदुर्गायाः वैदिकं तान्त्रिकं ध्यानं त्रयोदशांगं	८३
,, आ श्री भगवती महिम्नः स्तोत्रं पुनश्च त्रयोदशांगं	८५
१४ अ सर्वोत्कीलनं चतुर्दशांगं	९१
,, आ श्री देवीकवचं–वज्रकवचं पुनश्च चतुर्दशांगं	९२
१५ अर्गला स्तोत्रं पंचदशांगं	१००
१६ कीलक स्तोत्रं षोडशांगं	१०३
॥ इति षोडशांगं समाप्तं ॥	
अथ श्री सप्तशती दुर्गा पाठारंभः	१०५
नवार्ण जपः	११९
शापोद्धारः	१११
सर्वमंत्रोत्कीलनं	११२
श्री देव्यादुर्गाया अथर्वशीर्षं	११५
श्री यजुर्वेदीयं रात्रिसूक्तं	११८

तंत्रोक्तं रात्रिसूक्तं	पृष्ठं ११९	अध्यायः	८	मंत्राः ६१	पृष्ठं १९०
सप्तशतीन्यासाः पंचाक्षर न्यासाः	,,	,,	९	,, ३४	१९१
दशश्लोकीन्यासाः	१२०	,,	१०	,, १८	२०३
सप्तशती दुर्गापाठारंभे प्रथम चरित संकल्पः	१२३	,,	११	,, ४७	२०७
		,,	१२	,, २४	२१३
श्री प्रथमचरितं मधुकैटभ वधः		,,	१३	,, १३	२१८
अध्यायः १ मंत्राः १०६	,,	उत्तर न्यासाः			२२१
श्री मध्यमचरितं		यजुर्वेदोक्तं देवीसूक्तं			२२२
अध्यायः २ मंत्राः १४४	१४१	तंत्रोक्तं देवीसूक्तं			२२५
अध्यायः ३ मंत्राः ६६	१६०	प्राधानिकं रहस्यं			२२७
अध्यायः ४ ,, ४२	१६९	वैकृतिकं		,,	२३०
श्री उत्तमचरितं	१७४	मूर्ति		,,	२३३
अध्यायः ५ मंत्राः ७८	,,	दुर्गा पंजर स्तोत्रं			२३५
,, ६ ,, २०	१८३	देव्यपराध क्षमापन स्तोत्रं			२३६
,, ७ ,, २६	१८६	श्री सप्तशत्या भिन्नपाठक्रमः			२३९

४३५

॥ परिशिष्टम् ॥

१	कुमारीलक्षणं पूजनं	पृष्ठं २५७	४	सार्धनवचंडी प्रयोगः	पृष्ठं २६२
२	नित्यचंडी पाठविधिः	२५९	५	सप्तशती दीपदानविधिः	२६५
३	नवदुर्गा प्रयोगविधिः	२६१			

॥ प्रयोगखण्डः॥ २६९

६५ संख्याकाः विविधकामनासिद्धिप्रदाः प्रयोगाः पृष्टं २६९ तः २९६ पर्यंतं

॥ नवचंडी पद्धतिः ॥ २९७

	पृष्ठं		
महासंकल्पः	२९७	ग्रहमंडलदेवतास्थापनं	३०६
द्विज प्रार्थना वरुणश्राद्धं	३००	वह्न्युत्तारणं	३१२
दिग्रक्षणं	३०१	मूर्तीनां प्राणप्रतिष्ठा	३१३
पंचगव्यकरणं	३०२	नवग्रह पूजनं	,,
भुमिपूजनं	३०३	देवी पूजा	३१५
कुशांडीकर्म	,,	होमारंभः	३२१
अग्निपूजनं	,,	बलिदानं	३२४
पीठशक्तिस्थापनं	३०४	कुष्मांडबलिः	३२५
महालक्ष्मीस्थापनं		पूर्णाहुतिः	३३७

वसोर्धाराः	पृष्ठं ३३९	ब्राह्मणानामाशीर्वादाः	पृष्ठं ३४४
भस्मधारणं	३४०	अभिषेकः	३४३
क्षमापनं	३४१	पात्रदानं	३४६
अग्निपूजनं	,,	भोजन संकल्पः	,,
श्रेयःसंपादनं	३४२	देवताग्नि विसर्जनं	३४७

॥ परिशिष्टं ॥

प्रथमादिवसकृत्यम्	३४७
गणपतिपूजनं	३४८
पुण्याहवाचन प्रयोगः	३५५
घृतमातरः	३६२
वसोर्धारा	३६३
आयुष्यमंत्रजपः	,,
नांदीश्राद्धं	,,
सर्वकामनासिद्धिप्रद गायत्रीप्रयोगः	३६६
दुर्गासप्तशती षोडशांगानुक्रमणी	३३७

॥३९

Scanned with OKEN Scanner

३४ वर्षनुं विश्वविख्यात आयुर्वेदिक दवाओ बनावनारु कारखानुं



आ कारखानामां आशरे २००० जातनी सर्वोत्तम अने शास्त्रोक आयुर्वेदिक दवाओ राजवैद्य जीवराम कालिदास शास्त्रीजी नी सिधी देखरेख नीचे बने छे अने जुदा जुदा विषयो उपर पुस्तको प्रसिद्ध थाय छे.

पजंट थवा इच्छनारे छापेल पजन्सीनुं फोर्म मंगावयुं.

गामो गाम पजंट जोइए छीये मुंबइ अमदावाद मद्रास कलकत्तामां पजंसीओ आपवी छे ते बाबत गोंडल पत्र-व्यवहार करवो.

सूचीपत्रक मफत

आ कारखानानी दवाओ गोंडल कारखानामां तथा अमारा एजंटो पासेथी मळशे.

रसशाला इलेक्ट्रीक प्रीन्टींग प्रेस-गोंडल.